Bill No. 3/07-08

190.

2008 - 0357

त्रिदोषवाद: - By पं. भानुशंकर शर्मा - pinholes in the entire book but not affecting much the reading matter.

Bhavanagar, 1935.

1219

15

॥ ॐ नमः श्रीधन्वन्तरयेऽन्तर्य्यामिणे ॥

त्रिदोषवादः ।

श्री काशीक्षेत्रनिवासिनां—

महामहोपाध्याय रामकृष्ण (तात्याशास्त्री)

पटवर्धनचरणानां, कविराज भिषङ् मूर्धन्य—

श्री उमाचरणचरणानां चान्तेवासिना

त्रिवाड्युपाह्व निर्भयरामात्मज भानुशङ्करशर्म्मणा

आयुर्वेदकल्पतरुभ्यः

संगृहीतः

मुख्याध्यापकः, शेठ जी प्र. इत्याख्यराजकीय

आयुर्वेदीयपाठशाला ।

भावनगर—(काठियावाड)

प्रकाशकः—
पं. हरिहर भानुशङ्कर त्रिवाडी.
ठि० वरतेज दरवाजा,
भावनगर—(काठियावाड.)

मुद्रकः—
शेठ देवचंद दामजी
श्री आनंद प्रिन्टींग प्रेस—भावनगर. (काठियावाड़)

प्रथमावृत्तिः
प्रति १०००
वि. सं. १९९१ इ. स. १९३५



वैद्य यादवजी त्रिकमजी आचार्य
मुंबई.

॥ ॐ नमः श्री धन्वन्तरयेऽन्तर्यामिणे ॥

अर्पण पत्रिका..

आशां प्राचीं स्थितोऽसौ द्विजजनहृदयाह्लाददायी सुमान्यः,
साहित्योद्घोषको यो निजमतकिरणै रञ्जयन् स्वान्तकानि ।
जातेः सारूप्य मिच्छन्नुदयमभिगतः शिक्षयन् स्वां प्रवृत्तिम्
प्राप्यः सर्वै र्मनुष्यै रविरिव जयतात् "यादवोऽयं वरेण्य." ॥१॥

आयुर्वेदमार्तण्डा वैद्यजगति मुकुटायमाना आयुर्वेदमर्मज्ञा स्तत्रभवन्तः सार्वभौमाः आचार्योपाह्वाः श्रीयादवजीशर्म्मार्णः सविनय मभ्यर्थ्यन्ते—

बहुविधफलपुष्पसारोपपन्नात् सुरम्यादुपवनादिव अगाधगाम्भीर्यात् सुललितगुणदोषविधिनिषेधकल्पतरुसंपन्नादायुर्वेदोपवनात् मालाकारेणेव विविधप्रमाणीभूतगुणवाक्यै ग्रंथितः 'त्रिदोषवाद' नामा प्रत्यक्षानुमानाप्तवाक्यैर्यथामति वर्णितः भवद्भ्यो मुद्यमाणो विज्ञापित एवास्ते,

'सुजनवदने दोषा अपि गुणायन्ते' इति सुभाषितत्वात्, वातपित्तश्लेष्मणां शरीरानुबन्धित्वेन कचिद् गुणत्वस्वीकाराच्च म-

याऽऽलेखितः त्रिदोषत्वाद्दोऽपि श्रीमतां करकमलेषु आयुर्वेदगुणा-नुवादरूपः स्यादित्याशंसानः महाकवेः श्रीभार्गवे वचनं स्मरामि—

इयमिष्टगुणाय रोचतां रुचिरार्था भवतेऽपि भारती ।
ननु वक्तृविशेषनिःस्पृहा गुणगृह्या वचने विपश्चितः ॥

अत आयुर्वेदाल्पज्ञेन मया संगृहीतोऽयमायुर्वेदीयग्रन्थः आयुर्वेदमार्तण्डेभ्यस्तत्रभवद्भ्यः श्री यादवशर्म्मभ्य एव समर्पितो भवत्वित्याशास्ते ।

विदुषां कृपाभाजनम्

त्रिवाडयुपाह्वो निर्भयरामात्मज भानुशङ्कर शर्म्मा
प्रधानाध्यापकः शेठ. जी. प्र. आयुर्वेदीय पाठशाला
भावनगर—(काठियावाड.)



॥ ॐ नमः श्री श्रीधन्वन्तरयेऽन्तर्यामिणे ॥

॥ उपोद्घातः ॥

विदितचरमेव प्रायः सर्वेषां नो भारतवर्षीयाणां इतरदेशनिनिवासिनां च सूक्ष्मतत्त्वविदां यदियं गन्धगुणवती पृथिवी वाय्वग्निजलैः सर्वदा आप्याय्यते परिणमति, क्षीयते च। प्रतिक्षणं विक्रियमाणा—परिणम्यमाना, क्षीयमाणा च दृष्टिगोचरा भवतीति सर्वेषां तत्त्वविदां प्रतीतिरेव, नात्र शङ्कालवलेशोऽपि। तथैवेदं सकलमपि प्राणिजातं पार्थिवविकारजन्यमपि, वाय्वग्निजलैः "आप्यायते परिणमति, क्षीयते" इति त्रिविधो विकारः सर्वेष्वपि प्राणिषु दृष्टिगोचरो भवति, समष्टौ वाय्वग्निजलस्थानीयाः वातसूर्यचन्द्रमसः प्रत्यक्षदेवताः प्रसिद्धा एव स्वयंप्रकाशस्वरूपाः स्वं स्वं कर्म अभिनिर्वर्त्य जगदेतत् पोषयन्ति धारयन्ते वा, कर्मगतिवशाच्च विकृताः सन्तः जगदेतदुपघ्नन्तीति प्रायः सर्वैरपि तत्त्वविद्भिः सिद्धान्तितं। तथैव व्यष्टावपि—पार्थिवशरीरे पोषणधारणोपक्षयकर्मसिद्ध्यर्थं पृथक् पृथक् स्थानापन्नाः पार्थिवशरीरनिवासवन्तो धातुसंज्ञां वा लभमाना वातपित्तश्लेष्माणः कथङ्कार मिदं शरीरं धारयन्ति पोषयन्ति विनाशयन्ति वा इति आर्षग्रन्थेषु चरकसुश्रुतप्रभृतिषु शरीरोत्पत्तौ, व्याध्युत्पत्तौ चिकित्साविषयेषु प्रतिपादितमपि "वात-

पित्तश्लेष्मणा " मेव तत्कर्मेति मन्यमाना वयमार्षभिषजः नान्यथा स्वमतिं विपरिणामयितुमर्हामहे ,

सांप्रतमसांप्रतिका असांप्रतमेव विवदन्ते उद्घोषयन्ति च स्वडिंडिमं यत्किलैतद् दरीदृश्यमानं जगत् द्विनवति (९२) संख्याकैस्तत्त्वैः परिपूर्णं, एतानि तत्त्वानि विहाय किमपि कार्यजातं पारयितुं नैव पारयामः । नानाविधेषु यन्त्रेषु विशिष्टकार्योत्पत्तौ तान्येव द्विनवति (९२) तत्त्वान्यपेक्षितानि, स्थूलस्यैतस्य पार्थिवशरीरस्य व्यवहारे तान्येव तत्त्वान्यपेक्षितानि, व्याध्युत्पत्तौ तान्येव विक्रियन्ते अतस्तेषां द्विनवतितत्त्वानां ज्ञानं विहाय न कामपि चिकित्सां साधयितुं दक्षतरो वैद्यो भिषग् वा शक्नोति इति । अतो भारतवर्षीया भिषजः तेषां ज्ञानं विना अवैज्ञानिका इव लक्ष्यन्ते, अतस्तेषां विज्ञानमशास्त्रीय मनियन्त्रितं वेति जल्पन्तः वैज्ञानिकाः शोश्रूयन्ते ।

अहो नु खलु पाण्डित्यं वैज्ञानिकानाम् ? यदस्मदीयं तत्साधु यदितरद् तदसाधु अशास्त्रीयं वेति ब्रुवन्तो भवन्त एव अद्यावधि दृष्टिपथ मायाताः श्रुतिगोचरा वा कृताः " यद्यत् प्रमाणतया प्रतिपाद्यते तत्तत् प्रमाणानि लक्षणानिर्वचनैः प्रमाणीकृत्यैव प्रतिपाद्यते, अत्र तु प्रमाणलक्षणमेव नास्ति व्यतिकरे च अन्यत्र भादौ प्रसर्पेते तत्र किं वा स्यात् प्रामाण्यं वैज्ञानिकत्वं वेति भवन्त एव ब्रुवन्तु ।

वातपित्तश्लेष्माणः स्थूलशरीरधारकत्वेन धातवः, दूषणाकर्तृत्वेन दोषाः, मलिनीकरणत्वेन च मला इति त्रयाणामेव वातपित्तश्लेष्मणां गर्भशरीरादारभ्यैव धातुत्वं, रोगोत्पादनकर्मकर्तृत्वेन शरीरस्य दूषणाकरत्वात्तेषां दोषत्वं, शरीरस्य प्रत्यहं मलिनीकरण कर्मकर्तृत्वाच्च मलत्वमेति—अस्मदीय आर्षसिद्धान्तो भवतामद्यावधि श्रुतिगोचरोऽप्यश्रुतिगोचरः स्यादिति तर्कयामहे ।

प्रत्यक्षानुमानाप्तवाक्यैः स एष त्रिदोषवादः यथामति यथाशक्ति संगृहीतो वैद्यशास्त्रिणा निर्भयरामात्मज भानुशङ्करशर्म्मणा । समालोचयन्तु तमिमं त्रिदोषवादं विद्वद्वरेण्या आर्यभिषज इति प्रार्थ्यते ।

राज्यवैद्यः—अम्बालाल माधवजी महेता.

मोटुं फलीउं—भावनगर. (काठिआवाड.)

॥ ॐ नमः श्री धन्वन्तरयेऽन्तर्य्यामिणे ॥

ग्रन्थकर्त्तु-र्निवेदनम् ।

गुणदोषौ बुधो गृह्णन् इन्दुक्ष्वेडाविवेश्वरः ।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ॥

अयि भारतवर्षीयप्रजास्वास्थ्यरक्षाधिकारवन्तः, आयुर्वेद गौरवभाजो भिषग्वराः, भवतां समीपे किंचदपि निवेदनीयमस्ति दीयतामत्रावधानमिति प्रार्थये ।

वैकदिधर्ममर्यादेव आर्युवेंदीयत्रिदोषमर्यादा यत्र तत्र सुखण्डि तैव वैज्ञानिकै रिति विभावयामि "सनातनमर्यादाया" रक्षणं सर्वैरप्यार्यभिषजै द्विजवर्यैश्चास्माभि रवश्यं विधेयमित्यस्माकं परमो धर्मः "यत्रायुर्वेदे, शारीरदोषा वातपित्तश्लेष्माख्याः त्रयः, द्वौ च मानसौ "रजस्तमसी" इत्याख्यौ दोषौ, मिलित्वा सर्वविधव्याध्युत्पत्तौ पञ्चदोषाणां विकृतिरेव निदानमिति यावच्चन्द्रदिवाकरौ मन्यामहे मंस्यन्ते च भाविनो ब्रह्मर्षिबालका इति अखण्डनीयोऽयं सिद्धान्तः ।

तथापि स्वसिद्धान्तप्रच्युतिकारकैः प्रमाणकल्पैरार्षेतरवाक्यैः प्रतार्यमाणा वयं निश्चयात्मिकाया बुद्धे रुत्कर्षाभावात् व्यामोहोत्पादकै र्वचनैः प्रत्यहं प्रतार्यामहे इत्यस्माकं भारतवर्षीयाणां विवाद विषादास्पदमापतितमिति विभावयामि ।

विविधयन्त्रनिष्पाद्यमानविविधफलोत्पत्तिषु दरीदृश्यमानाः कियन्त एव भाक्तः स्यु रिति निर्णयः सांप्रतमपि असांप्रत इव भासमानो दृष्टिगोचरो भवति, किन्तु श्रुतिगोचरोऽपि त्रिदोष-विषयकः सिद्धान्तोऽद्यावधि न तेषां श्रुतिपथमारूढ इति वक्तुं नैव जिह्रीमः। एवं बहवोऽपि एतादृशा व्याधयो वर्णिताः सन्ति, येषां श्रवणस्मरणे अपि अद्यावधि नैव जाते। "श्रुतिस्मृती" प्रमाण तया स्वीकुर्वतां भारतवर्षीयाणामार्यमनुजानां तु प्रमाणत्रय स्वीकारात् "कस्मिंश्चित समये अकल्प्यनिदानचिकित्साविशेषा व्याधयः प्रादुरभवन् ; यैः नैसर्गिकप्रलय इव मनुजानां प्रलयोऽभ वत्, कस्मिंश्चि च समये एतादृशा व्याधयः प्रादुर्भविष्यन्ति येन सर्वमपि पाञ्चभौतिकमिदं जगत् स्व-स्वहेतौ लीनं भविष्यति॥ अतो व्याधीनां किं निदानम्, किंवैतस्य पाञ्चभौतिकशरीरस्य-उत्पत्तौ" इति विचार्यमाणे श्रुतिस्मृती एव प्रमाणीभवतः। चन्द्रस्य इयन्मानं यथा नैव प्रत्यक्षेण नानुमानेन निर्णीयते, किन्तु श्रुति-शब्द एव भगवतश्चन्द्रमसः प्रमाणं स्वीक्रियते तथैव सृष्टिप्रलययोरपि श्रुतिस्मृतिवाक्यान्येव प्रामाणीक्रियन्तां नात्र विवादविषादास्पद-लेशोऽपि। तदुक्तम् "तर्काप्रतिष्ठाना दप्यन्यथानुमेयमिति चेद् अनिर्मोक्षप्रसङ्गः" ब्र-सू. अ. २ पा. २

पञ्चविधदोषस्वीकारे तु न काचन व्यापत्तिः तर्कपरिवर्तनं वा संभाव्यते, महर्षिभिः सिद्धान्तितत्वात् श्रुतिवचनाच्च। अतो ग्रथितमेनं त्रिदोषवादं आयुर्वेदगुणवादमिव कण्ठे धारयन्तु आयु-र्वेदपारप्रेप्सवश्छात्रजना भिषग्वर्याश्च विद्वांस इति

सांख्यन्यायव्याकरणादिशास्त्रवचनै रुपबृंहितोऽयमायुर्वेदीय-ग्रन्थः पठनपाठनार्हः स्यात्, त्रिदोषवादश्च सुरक्षितः स्यदिति मत्वानेन शास्त्रीयविषयाः मुद्रितपत्रसंशोधनाभ्यासाभावाच्च मुद्रया-जन्या बह्वय अशुद्धयः कृताः स्युः ; मानुषीशेमुषीसुलभत्वाच्च भ्रम-प्रमादादीनां, प्रतिपाद्यविषयेऽपि अनेकाः त्रुटयः स्युः, ताः सर्वाः विद्वद्भिः संशोधनीयाः क्षन्तव्यश्चाहं यत्र तत्रेति प्रार्थना—इति शम् शिवं भवतु,

विदुषां विनेयस्य.

त्रिवाडयुपाह्व निर्भयरामात्मज भानुशङ्करशर्म्मणाः

॥ ॐ नमः श्री धन्वन्तरयेऽनन्तरूपा [illegible] ॥

त्रिदोषवादस्य,

विषयानुक्रमणिका.

प्रत्यक्षखण्डे.

अनुमानखण्डः

उपमानखण्डे.

शब्दखण्डे.

॥ ॐ नमः श्रीधन्वन्तरयेऽन्तर्यामिणे ॥

त्रिदोषवादस्य

शुद्धिपत्रकम्.

पृष्ठे	पङ्क्तौ	अशुद्धपाठः	शुद्धपाठः
५	६	अहङ्काररस्थ	अहङ्कारस्य
७	४	सो कामयत	सोऽकामयत
८	१	अस्मिन गणे	अस्मिन् गणे
१०	१६	तमोगुणाक्तेभ्यः	तमोगुणायुक्तेभ्यः
११	५	सप्तदशावयवोवेत-	सप्तदशावयवोपेत-
१४	६	सामाम्यम्	सामान्यम
१५	१८	गृह्णाति	गृह्णाति
१५	१९	अग्राह्मं	अग्राह्यं
१९	६	संज्ञाथामच्	संज्ञायामच्
२२	३	रोगभिषगजितीये	रोगभिषग् जितीये
२७	९	याद्	यद्
२७	१७	तत्तस्योपादनम्	तत्तस्योपादानम्
२६	३	पार्थिवयोशपि	पार्थिवयोरपि
२९	७	बिन्दुभी	र्बिन्दुभी
२९	१९	सिद्धि	सिद्धिं
३०	८	समवाथि	समवायि

३०	१३	गर्भजनानात्मकं	गर्भजननात्मकं
३१	४	तन्तुरूपकार्यनाशः	पटरूपकार्यनाशः
३१	७	निमित्तकारणान्	निमित्तकारणाम् ।
३१	१६	कीदृशो	कीदृशो
३३	२०	आहारास्य	आहारस्य
३४	७	गर्भरूपविकत्युत्पादने	गर्भरूपविकृत्युत्पादने
३५	१८	समथिंतं	समर्थितं
४०	२२	सतु	सत्
४१	१५	करोतोति	करोतीति
४१	१९	तत् करोति	ते करोति
४५	१७	नाडी चैव	नाडी चैव
४६	१०	आरम्भका	आरम्भकं
४८	१८	कार्यकतृत्वात्	कार्यकर्तृत्वात्
५१	५	स्वप्रकृत्यरम्भकः	स्वप्रकृत्यारम्भकः
५८	३	दरीदृश्यमानस्य	दरीदृश्यमानस्य
६७	२	दोषविकृजन्य	दोषविकृतिजन्य
७६	१६	मेदाऽस्थि	मेदोऽस्थि—
८०	६	जोवितं	जीवितं
८७	४	वंह्नि धूमयोः	वह्निधूमयोः
८७	१४	त्रैधिष्यम्	त्रैविध्यम्
८९	९	लिङ्गायते	लिङ्गयते
९१	२	स्वंदावरोधादि	स्वेदावरोधादि
९४	५	वातपित्तश्लेष्मारब्धस्वं	वातपित्तश्लेष्मारब्धत्वं

९५	२४	सान्निपातिककेषु	सान्निपातिकेषु
९६	१२	जगदि	जगादि
१०९	४	वातपित्तश्लेष्मयाभि	वातपित्तश्लेष्मभि
११२	६	तस्मान्नेताः	तस्मान्नैताः
११४	९	पुडरीकशतपत्र	पुण्डरीकशतपत्र
१३५	१५	क्ररोऽपि	क्रूरोऽपि
१३६	२	क्रकोष्ठशब्देन	क्रूरकोष्ठशब्देन
१३९	१२	चिकित्सतव्यतया	चिकित्सितव्यतया
१४५	१२	शल्यतुन्त्रविधानौ	शल्यतन्त्रबिधानो
१४९	६	प्रतीतिजननयोगता	प्रतीतिजननयोग्यता
१५३	१५	संतापपति	संतापयति
१५७	१७	ऋतुविर्ययापेक्षया	ऋतुविपर्ययापेक्षया
१६१	३	शिल्पिसहस्त्ररपि	शिल्पिसहस्रैरपि
१८५	४	निमितं	निर्मितं
१९०	९	व्यानं	र्व्यानं
१९४	१७	क्षय रेव	क्षयैरेव
१९६	६	जङ्घात्ति	जङ्घार्ति
२०८	१८	वालोहपतानि	वालोपहतानि

भ्रमादिप्रमादवशादन्यास्त्रुटयः गुणैकपक्षपातिभिर्विद्वद्भिः संशोधनीयाः क्षन्तव्यश्चाहमिति प्रार्थयते ।

त्रिकाण्डयुपाह्वो—

निर्भयरामात्मज भानुशङ्कर शर्म्मा.

Review

The system of Ayurvedic medicine is based on three fundamental factors called Tridoshas Viz. Váta, Pitta and Kapha which govern the bodily functions in health as well as in disease. This Tridosha theory derives its origin from the five primary elements पंचमहाभूत–आकाश, वायु, अग्नि अप् & पृथ्वी; because the body–the microcosm is supposed to have been built out of these five primary elements like the world–the macrocosm.

The Tridoshas as long as in harmony maintain the body in health while if their harmony is disturbed either by dietetic and hygienic errors or by the entrance of germs into the body and accidents the condition called disease is produced.

In the Ayurvedic system more stress is laid on the maintenance and improvement of the resisting power of the body–the soil–by paying particular attention to diet and personal hygiene. The faulty commssion or omission in regard to them is likely to disturb the balance of Tridoshas and hence the disease.

The world is full of germs and there can be no escaping out of them. Every moment we are swallowing and breathing in millions of them,

which may be capable of producing various diseases but for the resisting power of our body. If the body is weakened by our faulty habits and thereby the balance of the Tridosha equilibrium is already rendered unstable the germs may get a suitable ground for multiplication resulting into disease.

The author substantiates this Tridosh theory by the three methods of proof प्रत्यक्षप्रमाण, अनुमान-प्रमाण and शब्दप्रमाण; and the book is accordingly devided into three parts Viz.- प्रत्यक्षखंड, अनुमोन खंड and शब्दखंड.

The matter has been clearly explained and expressed in lucid and simple sanskrit, making it easy of approach even for those who know a little of the language.

Bhavnagar.
15th December 1935. } Balkrishna N. Mehta
M. B. B. S.
Bhavnagar State Medical Service.

॥ ॐ नमः श्री धन्वन्तरयेऽन्तर्यामिणे ॥

अथ त्रिदोषवादः

मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च ।
दोषत्रयस्य वादोऽयं आयुर्वेदीय उच्यते ॥ १ ॥

शब्दशास्त्रप्रविष्टानां सांख्यसाहित्यवादिनाम् ।
आयुर्वेदे प्रवेशाय वादोऽयं सुगमः स्मृतः ॥ २ ॥

इह खलु मानवं जन्म प्राप्य पुरुषार्थत्वेन संमता धर्मार्थकाम-मोक्षाख्याश्चत्वारः पुरुषार्थाः साधनीया भवन्ति । तच्च मानवं जन्म "उभाभ्यां पुण्यपापाभ्यां मानुषं लभतेऽवशः" इति औपनिषदाद्वचनात् पुण्यपापमूलयोः सुखदुःखयोर्भोगायतनं नाम यत् पाञ्चभौतिकं शरीरम् तस्य प्राप्तिः । तच्च शरीरं "समधात्वाशयात्ममनः संयोगे सति श्वसनक्रियाधिष्ठानम् । तदेतत् पाञ्चभौतिकं शरीरं कैर्हेतुभिरङ्कुरं भवति कैर्वर्धते कैरपहीयते कैश्चाभावैर्विलयं यातीति विचार्यमाणे, आयुर्वेदोक्ता वातपित्तश्लेष्माण एव अङ्कुरीभाववर्धनापहानविलयेषु कारणम्, तथाच वातपित्तश्लेष्माण एव उपरि-

निर्दिष्टस्य शरीरस्य प्रतिपादकाः, प्रतिपाद्यं चैतत् दोषत्रयान्वयि पाञ्चभौतिकं शरीरम्, पुनश्च त एव त्रयोदोषा; यदा विकृतिं लभन्ते तदा व्याधिविशेषानुत्पादयन्ति, संशोधनशमनकर्षणलङ्घनादिभिर्दोषविकृतिर्यदा अपहीयते समस्वरूपा विकृतिरहिता यदा भवन्ति दोषाः—तदा तत्तद्व्याधितयोग्यबृंहणादिक्रियाभिः समा भवन्ति, तदा त एव त्रयो दोषाः अस्य स्थूलशरीरस्य पालकाः पोषका वा भवन्ति, इत्थं त्रय एव वातपित्तश्लेष्माणः पाञ्चभौतिकस्यास्य शरीरस्याङ्कुरीभाववर्धनापहानविलयेषु हेतुभूता इति सार्वजनीनोऽयं सिद्धान्तः, त्रयाणां वाय्वग्निजलाधिष्ठातॄणां वातसूर्यचन्द्रमसामिव जगतो हेतुता सिद्धैव तथा त्रयाणां वातपित्तश्लेष्मणां अस्य स्थूलस्य हेतुता सिद्धैव भवति । त एव जगदिवेदं स्थूलमङ्कुरीकुर्वन्ति, वर्धयन्ते, अपह्रापयन्ति, विलाययन्ति च । अतो दोषाणां साम्यतापालनभूते आरोग्ये सति तन्मूलशरीरस्य पुरुषार्थचतुष्टयसाधकत्वं नातिवर्तते, अतश्च आरोग्यापहन्तॄणां खलु रोगाणा माविर्भावे त्रयोदोषा एव मूलम् । अतः सर्वव्याध्युत्पादकेभ्य एभ्य स्त्रिभ्यो दोषेभ्यो यथा शरीरं विकृतिं न प्राप्नुयात् तथैव वर्तितव्यम् तथैव आरोग्यपालनं स्यात्, तदैव पुरुषार्थचतुष्टयी सद्यःसिद्धिफलदा स्यादिति दोषत्रयनिरूपणं सप्रमाणं सप्रपञ्चं प्रतिपाद्यते ।

आयुर्वेदे तावत् त्रीण्येव प्रमाणानि स्वीकृतानि इतरेषां तेष्वेवान्तर्भावात् । प्रमाणमन्तरा प्रमेयसिद्धिर्नभवतीति प्रमाणपरीक्षणं तु आवश्यकमेव । एवं चायं दोषत्रयवादोऽपि तैरेव प्रमाणैः स्थाप्यते, प्रमाणं नाम प्रमायाः करणम्, साच अबाधितविषयान्तःकरणवृत्तिः,

तेन यथार्थज्ञानं प्रमाइति फलितं भवति। एतादृश्या यथार्थज्ञान-रूपप्रमायाः करणानि प्रत्यक्षानुमानाप्तवचनानि, तैरेव प्रमाणै स्त्रिदोषवादः स्थापनीयः स्यात्, अस्य वादस्य उपपादनं तु स्वपक्ष-साधनपरपक्षनिराकरणाभ्यां भवति। ते च स्वपक्षसाधन—परपक्ष निराकरणे वादजल्पवितण्डानामन्यतमकथां संश्रित्य संपादनीये। अत्रतु प्रथमं त्रिदोषवादस्यैव स्थापनीयत्वात् आदौ त्रिदोष-विषयको वाद एव वक्तव्यः। अङ्कुरीभाववर्धनापहानविलयानां हेतु-भूताश्च ते त्रयो दोषाः किंलक्षणकाः केन केन भौतिकतत्त्वेन संयुक्ताः सन्तः पाञ्चभौतिकस्यास्य शरीरस्य केन विधिना स्वास्थ्यं पालयन्ति, मिथ्याहारविहारैश्च कथं व्याधिविशेषानुत्पादयन्ति, एनञ्च पाञ्चभौतिकं शरीरं कथं जहति, येन अयं पञ्चत्वंगतः इति व्यवह्रियते, इत्यपि उपपादनीयमेव।

आदौ तावत् जगत्स्रष्टुरीश्वरस्य त्रिगुणात्मिका प्रकृतिर्नाम-आद्या सृष्टिः यस्या विमुक्तो जीवो मुक्त इति यस्यां यस्याश्च मह-दादिविकृतिषु, आसज्यमानः दृढलोहमयपञ्जरबद्ध इव अहंकारा-दिभिर्विकारै र्बद्ध इव लक्ष्यते।

सा च प्रकृतिः सांख्यकारिकायामित्थंवर्णिता—

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्नविकृतिः पुरुषः॥ सां, कारिका।३।

मूलं चासौ प्रकृतिः मूलप्रकृतिः कार्यसङ्घातस्यास्य विश्वस्य मूलम् अस्याः मूलप्रकृते मूलान्तरं नास्ति अनवस्थाप्र-

सङ्गात् सा च सत्वरजस्तमःसमाख्यानां गुणानां साम्यावस्था।
एषा च चरकसंहितायाम्।

तदेव भावादग्राह्यं नित्यत्वं न कुतश्चन।
भावात्, ज्ञेयं तदव्यक्तमचिन्त्यं व्यक्तमन्यथा ॥
शा. स्था. १ अ. ९८ श्लोक.

"सदकारणवन्नित्यं दृष्टं हेतुजमन्यथा" इति चरकीयेन वचनेन यत् सत्तया सर्वदा प्रतीयते अकारणवच्चभवति तन्नित्यम् अन्यथा यत् कदाचिद् अभावेन प्रतीयते कारणवच्च भवति तद् हेतुजं सद् अनित्यमित्यर्थः। इदमत्राकूतं प्रतिभाति यत् भावात उत्पत्तिधर्मरूपाद् भावात् प्रतीयते—अर्थात् यस्याः अन्यानि महदादीनि उत्पत्तिमन्ति स्युः, स्वयं च अनुत्पत्तिमद् अनादिसिद्धं स्यात् तस्य नित्यत्वं न कुतश्चन भावात् सिद्धयति, अतः स्वयं अग्राह्यं सत् नित्यधर्मोपेतमनादि एव, एतादृशस्य अव्यक्तस्य नित्यतासिद्धौ काश्चनान्या युक्तयो न सन्त्येव, अनेन मूलप्रकृत्याख्यस्याव्यक्तस्य उत्पतिधर्मविरहित्वं सिध्यति। यस्या मूलप्रकृते रुत्पादकं तत्त्वान्तरं नास्ति यस्याश्च महादादिकार्यसंघातस्यास्य जगत उत्पत्तिः प्रतीयते सैव मूलप्रकृति स्तदेवाव्यक्तमिति "अचिन्त्यविशेषण विशिष्ट मुदाहृतं महर्षिभिः। अतएव कारिकायां "मूलप्रकृतिरविकृतिः" इत्यनेन मूलप्रकृतिर्नकस्यापि विकृतिर्भवति, स्वयं च अनादिसिद्धा नित्यैवेति फलितं भवति।

प्रकृतिविकृतयश्चकतमाः कियत्संख्याकाश्च इत्यपेक्षायाम्

तस्यामेव कारिकायामाह–" महदाद्याः प्रकृतिविकृतयः सप्त "

प्रकृतयश्चताः विकृतयः, प्रकृतिविकृतयः–कर्मधारयसमासः, अनेन महदादयो मूलप्रकृतेर्विकृतय स्तत्त्वान्तराणां तु प्रकृतयो भवन्ति उत्पत्तिधर्मरूपभाववत्त्वात् । यतः मूलप्रकृतेर्महत्तत्त्वं जायते महतः अहङ्कारः अहङ्कारात्पञ्चतन्मात्राणि, तत्र यत् महत्तत्त्वं तत् मूलप्रकृते-र्विकृतिर्भवति तथैव अहङ्कारस्य प्रकृतिरपिस्यात्, एवमहङ्कारस्य शब्द तन्मात्रा विकृतिः प्रकृतिश्चस्पर्शतन्मात्रायाः शब्दतन्मात्राया अहङ्कारः प्रकृतिः । एवं शब्दतन्मात्रायाः स्पर्शतन्मात्रा विकृतिः, प्रकृतिश्च शब्दतन्मात्रायाः अहंकार एव, एवं स्पर्शतन्मात्रा शब्दतन्मात्राया विकृतिः, प्रकृतिश्च रूपतन्मात्रायाः । एवं रसतन्मात्रा रूपतन्मात्राया विकृतिः प्रकृतिश्च गन्धतन्मात्रायाः । एवं गन्धतन्मात्रापि विकृती रसतन्मात्रायाः प्रकृतिश्चास्य पार्थिव जातस्य, प्रतिपादितं चैतच्छ्रुतावपि " तस्माद्वा एतस्मादात्मन आकाशःसंभूतः, आकाशाद्वायुर्वायो रग्निरग्नेरापोऽद्भ्यः पृथ्वी " तितानीमानि पञ्चमहाभूतानि पञ्चीकृतेभ्य एव, पञ्चमहाभूततन्मात्राभ्य एव भवन्ति । स चैष पञ्चीकरणप्रकारोऽग्रेऽभिधास्यते ।

गुणसाम्यावस्थायाः प्रकृतेर्विकारो महत्तत्त्वं नाम, तच्च महत् किमात्मकमित्यपेक्षायाम्—

खादीनि बुद्धिरव्यक्त महङ्कारस्तथाऽष्टमः ।
भूतप्रकृतिरुद्दिष्टा विकाराश्चैव षोडश ॥

बुद्धीन्द्रियाणि पञ्चैव पञ्च कर्मेन्द्रियाणि च ।
समनस्काश्च पञ्चार्था विकारा इति संज्ञिताः ॥

च. शा. अ. १ । ६१ । ६२ ॥

खादीनीत्यनेन सूक्ष्मभूतानि तन्मात्रशब्दवाच्यानि ज्ञेयानि बुद्धिर्नाम महच्छब्दाभिधेया सुखदुःखमोहबहुला । अव्यक्तं नाम मूलप्रकृतिः । अहङ्कारो नाम सुखदुःखमोहबहुलाया बुद्धेर्विकारः । त एते अष्टौ भूतानां स्थावरजङ्गमानां प्रकृतिः मूल कारणं कथितम् । तेन प्रकृते महज्जायते महतश्च त्रिविधोऽहंकारो जायते । तस्मादेतस्मात्त्रिविधाद्विकारात् खवाय्वग्न्यप्पृथ्वीनां, समुद्भवः प्रकृतिं विहाय सप्ततत्त्वानि प्रकृतयश्च विकृतयश्च भवन्ति मूलप्रकृतिस्तु न कस्यचन तत्त्वस्य विकृतिः किन्तु प्रकृतिरेव तस्या उत्पत्तिधर्मायोगादिति निर्दिष्टमुपरिष्टादेव। एवं अविशिष्टानि तत्त्वानि षोडश एव विकाराः । त एते विकाराः न कस्यचित्तत्त्वस्य प्रकृतिर्भवितुमर्हन्ति, तेभ्यस्तत्त्वान्तरोत्पत्यसंभवात् । तेषु पञ्चज्ञानेन्द्रियाणि श्रोत्रेन्द्रिय स्पर्शेन्द्रियचक्षुरिन्द्रियरसनेन्द्रियघ्राणेन्द्रियसमाख्यानि । वाक् पाणिपादपायूपस्थाभिधेयानि च पञ्च कर्मेन्द्रियाणि । समनस्काश्च पञ्च अर्थाः विषयाः शब्दस्पर्शरूपरसगन्धाः । एवं षोडश विकारा निरूपिता भवन्ति ।

एवं सूक्ष्मरूपां जीवसृष्टिमभिधाय दोषत्रयान्वयिन्याः पाञ्चभौतिकीसृष्टेरभिधानाय पञ्चीकरणप्रकारः प्रारभ्यते । तत्र सर्गाद्यकाले परमेश्वरः सृज्यमानप्रपञ्चवैचित्र्यहेतुप्राणि-

कर्मसहकृतः, अपरिमिताचिन्त्यशक्तिविशेषविशिष्टमायासहितः सन्, नामरूपात्मकनिखिलप्रपञ्चं प्रथमं बुद्धावाकलय्य इदं करिष्यामीति संकल्पयति परमेश्वरस्य बुद्धौ सृष्टेराकलनं श्रुतिरेवाह, " तदैक्षत बहुस्यां प्रजायेय ' ' सोकामयत बहुस्यां प्रजायेय " इति " तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादि श्रुति पदैश्च आकाशादीनि पञ्चभूतानि अपञ्चीकृतानि, तन्मात्रपदप्रतिपाद्यानि उच्यन्ते । तत्राकाशस्य शब्दोगुणः, वायोस्तु शब्दस्पर्शौ, तेजसस्तु शब्दस्पर्शरूपाणि, अपांतु शब्दस्पर्शरूपरसाः, पृथिव्यास्तु शब्दस्पर्शरूपरसगंधाः । तदेतत् समर्थितं महर्षिणा चरकाचार्येण ।

जायते बुद्धिरव्यक्ताद् बुद्ध्याहमितिमन्यते ।
परं खादीन्यहङ्कारादुत्पद्यन्ते यथाक्रमम् ॥
ततः सम्पूर्णसर्वाङ्गो जातोऽभ्युदित उच्यते ।
पुरुषः प्रलये चेष्टैः पुनर्भावैर्वियुज्यते

च. सं. शा. स्था. १ अ. । ६४ । ६९ ॥

प्रपञ्चितप्रायमेतत् । विशेषस्तु वैकृतात् सात्विकादहङ्कारात् तैजससहायाद् एकादशेन्द्रियाणि भवन्ति । भूतादेस्तामसादहंकरात् तैजससहायात् पंचतन्मात्राणि

तदुक्तम् सांख्यकारिकायाम्

सात्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात्
भूतादेस्तन्मात्रः; सतामसस्तैजसा दुभयम्

सां. का. २९ ॥

तन्मात्राणि सन्ति अस्मिन्गणे इति 'तन्मात्रोगणः' सत्वतमसी स्वयमक्रिये अतः, यतोऽहंकारादेस्तन्मात्रात्मिकांसृष्टिं रचयितुं समर्थे अपि स्वस्वकार्यं न कुरुतः, रजस्तु चलात्मकत्वात् तद्रजो यदा सत्वतमसी चालयति तदा स्वानुरूपां भूतादिसृष्टिं कुर्वाते इत्यन्यत्र विस्तरः ।

प्रकृतं पञ्चीकरणप्रकरणमनुसराम:—

शब्दस्य न केवलं आकाशस्यैव गुणत्वं, वाय्वादावपि तदुपलंभात् । न चासौ भ्रमः, प्रधानालोकनाम्ना मुनिना कृतायां लौकिकोपनिषदि तथैवस्वीकारात् बाधकाभावाच्च । एवं जलादावपि गन्धोपलब्धिस्तु तस्य गन्धस्य पञ्चीकृतपृथिव्यंशसंबंधकृतैव, जलादेश्च पृथिव्यकार्यत्वेन बाधकसद्भावेन च भ्रमत्वात्, यतः 'अद्भ्यः पृथ्वी' ति प्रतिपादितं न तु पृथिव्या आप इति अतोजले यो गन्धः समुपलभ्यते स पार्थिवांश एवेति न काचन हानिः ।

इमानि भूतानि त्रिगुणमायाकार्याणि गुणाश्च सत्वरजस्तमांसि, एतैश्च सत्वगुणोपेतैः पञ्चभूतैर्व्यस्तैः पृथक् पृथक् क्रमेण श्रोत्रत्वक्चक्षूरसनघ्राणाख्यानि पञ्चज्ञानेन्द्रियाणि जायन्ते । एतेभ्यः पुनराकाशादिगतसात्त्विकांशेभ्यो मिलितेभ्यो मनोबुद्ध्यहंकारचित्तानि जायन्ते । श्रोत्रादीनां पञ्चानां क्रमेण दिक्वातार्कवरुणाश्विनोऽधिष्ठातृदेवताः । मनोबुद्ध्यहंकारचित्तानां क्रमेण चन्द्रचतुर्मुखशङ्कराच्युताभिधानाः अधिष्ठातृदेवताः ।

एतैरेवरजोगुणोपेतैः पंचभूतैर्व्यस्तैर्यथाक्रमं वाक्पाणिपादपा-

यूपस्थाख्यानि कर्म्मेन्द्रियाणि जायन्ते । तेषां च क्रमेण वह्नीन्द्री-पेन्द्रमृत्युप्रजापतयोऽधिष्ठातृदेवताः, रजोगुणोपेतपञ्चभूतैरेवमिलितैः पञ्चवायवः प्राणापानव्यानोदानसमानाख्या जायन्ते । तत्र प्रागगमनवान्वायुः प्राणः नाभ्यादि नासास्थानवर्ती " वायुःप्राणो भूत्वा नासिके प्राविशत् " इतिश्रुतेः । अर्वाग्गमनवान्—वायुः अपानः नाभ्यादिपायुपर्यन्तस्थानेषु वर्तमानः " मृत्युरपानो भूत्वा नाभिं प्राविशत् " इति श्रुतेः । विष्वग्गतिमान् व्यानः अखिलशरीरवर्ती । ऊर्ध्वगमनवान् उत्क्रमणवायु रुदानः कण्ठस्थानवर्ती । अशितपीताऽन्नादिसमीकरणः समानः नाभिस्थानवर्ती ।

मैत्रेयोपनिषदि च प्राणादीनां लक्षणान्युक्तानि तानियथा—" अथऽयोमूर्ध्वमुत्क्रामति एष वावसप्राणः । योऽयमर्वाचं संक्रामति येनैताः शिरा अनुव्याप्ताः, योऽयं पीतमशितमुद्गिरति, योऽयं स्थविष्ठमन्नं धातुमपाने स्थापयति अणिष्ठं चांगे समानयति " इति । तैरेव तमोगुणोपेतैरपञ्चीकृतभूतैः पञ्चीकृतानि जायन्ते " तासां त्रिवृतं त्रिवृतमेकैकां करवाणि " इति श्रुतेः त्रिवृतकरणं च पञ्चीकृतोपलक्षणार्थमेव ।

पञ्चीकरणप्रकारश्चेत्थम् । आकाशमादौ द्विधा विभज्य तयोरेकभागं पुनश्चतुर्धा विभज्य तेषां चतुर्णामंशानां वाय्वादिषु चतुर्षु भूतेषु संयोजनम् । एवं वायुं द्विधा विभज्य तयोरेकं भागं चतुर्धा विभज्य तेषां चतुर्णामंशानामाकाशादिषु चतुर्षु भूतेषु योजनम्, एवं तेजोद्विधा विभज्य तयोरेकं भागं चतुर्धा विभज्य तेषां चतुर्णा-

मंशानामाकाशादिषु चतुर्षुभूतेषु संयोजनम् । एवमपो विभज्य तयोरेकंभागं चतुर्द्धा विभज्य तेषां चतुर्णामंशानामाकाशादिषु चतुर्षु भूतेषु संयोजनम् ।

एवमेकैकभूतस्यार्द्धं स्वांशात्मकमर्द्धांतरं चतुर्विधभूतमयमिति पृथिव्यादिषु स्वांशाधिक्यात् पृथिवीत्वादिव्यवहारः । तदुक्तम्— “ वैशेष्यात्तुतद्वादस्तद्वादः ” इति पूर्वोक्तैरपञ्चीकृतैःसूक्ष्मशरीरं परलोकयात्रानिर्वाहकं मोक्षपर्यन्तं स्थायि मनोबुद्धिभ्यामुपेतं ज्ञानेन्द्रियपञ्चककर्मेन्द्रियपञ्चकं प्राणादिपञ्चकसंयुक्तं जायते । तदुक्तम् ।

पञ्चप्राणमनोबुद्धि दशेन्द्रिय समन्वितम् ।
अपञ्चीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनम् ॥

इति । तच्च लिङ्गशरीरं द्विविधं परमपरं च ।

तत्र परं हिरण्यगर्भलिङ्गशरीरं, अपरमस्मदादिलिङ्गशरीरं तत्र हिरण्यगर्भलिङ्गशरीरं महत्तत्त्वं नाम । अस्मदादिलिङ्गशरीरञ्च अहङ्कार इत्याख्यायते ।

एवं तमोगुणात्केभ्यःपञ्चभूतेभ्यो भूभ्यन्तरिक्षस्वंमहर्जनस्तपः सत्यात्मकस्योर्ध्वलोकसप्तकस्य, अतल वितल सुतल तलातल रसातल महातल पातालाख्यस्याधोलोकसप्तकस्य ब्रह्माण्डस्य जरायुजाण्डजस्वेदजोद्भिज्जाख्यचतुर्विधस्थूलशरीराणामुत्पत्तिः । तत्र जरायुभ्यो जातानि जरायुजानि मनुष्यपश्वादिशरीराणि । अण्डजानि

अण्डेभ्यो जातानि पक्षिपन्नगादिशरीराणि । स्वेदजानि स्वेदाज्जातानि यूकामशकादीनि । उद्भिज्जानि भूमिमुद्भिद्य जातानि वृक्षादीनि " शरीरजैः कर्मदोषैर्याति स्थावरतां नरः " इत्युक्तेः वृक्षादीनामपि पापफलभोगायतनत्वेन शरीरत्वम् ।

तत्र परमेश्वरस्य पञ्चतन्मात्रव्युत्पत्तौ सप्तदशावयवोपेतलिङ्गशरीरोत्पत्तौ च, हिरण्यगर्भस्थूलशरीरोत्पत्तौ च साक्षात्कर्तृत्वं, इतर निखिलप्रपञ्चोत्पत्तौ हिरण्यगर्भादिद्वारा. " हन्ताहमिमास्तिस्रोदेवताः, अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि " इति श्रुतेः हिरण्यगर्भो नाम मूर्तित्रयादन्यः प्रथमो जीवः

" स वै शरीरी प्रथमः स वै पुरुष उच्यते ।
आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत ॥

" हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् " इत्यादि श्रुतेः । एवं भूतभौतिकसृष्टिर्निरूपिता

एवं भूतभौतिकसृष्टिं निरूप्य आयुर्वेदसंमताः पदार्थाः निरूपणीयाः स्युः । आयुर्वेदे तावत्—

" द्रव्य गुण-कर्म सामान्य विशेष समवायाः षट् पदार्थाः । तत्र पृथिव्यप् तेजो वाय्वाकाश कालदिगात्ममनांसि द्रव्याणि नवैव ।

गुरुलघु शीतोष्णस्निग्धरूक्षमन्दतीक्ष्णस्थिरसर मृदुकठिनविशदपिच्छिलश्लक्ष्णखरस्थूलसूक्ष्मसान्द्रद्रवाः विंशतिर्गुणाः ॥

उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्चकर्माणि एकत्वबुद्धिप्रतिपादकं तुल्यार्थतानाम सामान्यं, तद्द्विविधम् परमपरं च

व्यावृत्तबुद्धिकरो विशेषः पृथक्त्वबुद्धेरुत्पादयिता। समवायस्तु अवयवावयविनोः, गुणगुणिनोः क्रियाक्रियावतोर्यो नित्येषु नित्योऽनित्येष्वनित्यः संबंधः स समवायः।

तत्र द्रव्येषु गन्धवती पृथिवी। शीतस्पर्शवत्य आपः। उष्णस्पर्शवत्तेजः। रूपरहितः स्पर्शवान् वायुः। शब्दगुणकं आकाशम्। जन्यानां जनकः कालः सद्विविधः, नित्यश्च आवस्थिकश्च। प्राच्यादिव्यवहारहेतुः दिक्। दृष्टादृष्टपुण्यपापफलरूपसुख दुःखभोक्ता, प्रकृतिविकृतिगुणावच्छिन्नचैतन्ययुक्त आत्मा। कामः संकल्पो विचिकित्सा श्रद्धा अश्रद्धाधृतिरधृतिर्ह्री र्धी र्भीरितिवृत्तिरूपज्ञानधर्मकं परिच्छिन्नं मनः। एवं द्रव्याणि

गुरुलघ्वादयो विंशति गुणास्तु, पृथिव्यप्तेजोवाय्वाकाशानां पञ्चमहाभूतानामेव स्वस्थातुरशरीराणां चिकित्साविशेषैः संपाद्यमानाः तारतम्येन शरीरे वर्तमानाः।

उत्क्षेपणापक्षेपणादि पञ्चकर्माणि वायुविशेषाधिष्ठितपंचकर्मेन्द्रिय साध्यानि।

भिन्नदेशकालेषु अनेकगवादिव्यक्तिषु सकृत् परिचितत्वेन अयं गौरयं गौः इत्यादि प्रकारा एकाकारा या गोत्वबुद्धिस्तत् सामान्यम्

एवं कर्मणो गुणस्य च सामान्यम् 'अयं पाचकोऽयं पाचकइति कर्म सामान्यम् अयं शुक्लोऽयं शुक्ल इति गुणसामान्यम् । स्थलवर्णादिभेदेन भिन्नास्वपिगोव्यक्तिषु सास्नादिमत्त्वरूपधर्मस्य एकार्थबोधकत्वात् तुल्यार्थतायाश्चाव्यभिचरितत्वाद् एकत्वबुद्धिप्रतिपादकं तुल्यार्थता नामैतत् सामान्यं जातिः इति फलितं ।

तथा च—

सर्वदा सर्वभावानां सामान्यं वृद्धिकारणम् ।
ह्रासहेतुर्विशेषश्च प्रवृत्तिरुभयस्य तु ॥ ४३ ॥

च. सू. स्थां. अ. १

इति सूत्रे सामान्यस्य आधिक्यरूपायावृद्धेः कारणत्वस्वीकाराद् शोणिताख्यं धातुं प्रति मांसभक्षणरूपेणामाशये पतितं मांसं मांसरसो वा न सामान्यं किन्तु व्यावृत्तबुद्धिजनकत्वात् तन्मांसभक्षणं विशेष एव, यद्यपि मांसभक्षणे मांसीयतत्त्ववर्धनगुणाधिक्यात मांसस्य च प्रायः पार्थिवगुणवर्धनवैशेष्यकरत्वाच्च मांसं प्रतिमांस भक्षणं स्यान्नाम सामान्यम् , किन्तु दोषप्रकृतिविशेषेण यदा रसरक्ते एव वर्धयेत तर्हि मांसभक्षणस्य वर्धनार्ह रक्ताख्यधातुं प्रति तस्य विशेष एव सिद्ध्यति न सामान्यं । एवञ्च संबन्धरहितौ सामान्य-विशेषौ वृद्धिह्रासकारणं न भवतः किन्तु उभयस्य सामान्यस्य विशेषस्य च प्रवृत्तिः कारणं भवति । प्रवृत्तिर्नाम समानधातूनां शरीरेणाभिसंबन्धः । अथवा प्रवृत्तिर्नाम धातुसाम्यं, सा च प्रवृत्तिः सामान्यस्य विशेषस्य च कार्या स्यात् । तेन केवलतत्तद्धातुवर्धकस-

मन्दद्रव्योपयोगाद् धातुक्षयाद्वा रसादीनामेकतमस्य यद्वैषम्यरूपो विशेषः तयोः सामान्यविशेषयोः युगपत् समानविशिष्टद्रव्योपयोगात् धातुसामान्यरूपा या भवति प्रवृत्ति स्तत् सामान्यमिति फलितं। अतएव सामान्यविशेषयोः भिन्नजातीयकार्यकर्त्रोः इमे लक्षणे सूत्रिते—ते यथा।

सामान्यमेकत्वकरं विशेषस्तु पृथक्त्वकृत्।
तुल्यार्थता हि सामान्यं विशेषस्तु विपर्ययः॥ ४४॥

तेनानेकव्यक्तिषु एकार्थपरिचायकत्वं सामान्यम्। अयमस्मात् पृथक् ज्ञायते इदमस्मात् पृथग् भवितुमर्हतीति पृथक्त्वबुद्धिप्रतिपादकः सामान्याद्विपरीतार्थबोधको भेदकधर्मो विशेष इति फलितम्॥

आधाराणामाधेययोऽपृथग्भावः स समवायः॥

भूम्यादीनामाधाराणां गुर्वादिगुणैः यः अपृथक्भावः यो नित्यः संबन्धः स समवाय इति लक्षणं भवति, आदिशब्देन अप्तेजसी गृह्येते तेन भूम्यप्तेजसां आधारभूतानां ये आधेयाः गुरुलघुशीतोष्णस्निग्धादयः तेषामाधाराधेयानां यः संबन्धः स समवायः, तथाच समवायत्वंनाम नित्यसंबन्धत्वमिति फलितं भवति, एवं समवायस्याप्रत्यक्षत्वे इदमनुमानम् " गुणक्रियादिविशिष्टबुद्धिः विशेषणविशेष्यसंबन्धविषया विशिष्टबुद्धित्वाद् दण्डी पुरुष इति विशिष्टबुद्धिवत् "। एषा च विशिष्टबुद्धिः द्रव्यान्तरयोः संयोगादिव न भवति किन्तु यथा पृथिव्यां गुरुता, अप्सु शैत्यं, औष्ण्यं च तेजसि,

अनुभूयते तथैव गुणक्रियादिमतो द्रव्यस्य यो गुरुता शैत्यौष्ण्यादि-रूपो धर्मः स्पर्शजन्येन प्रत्यक्षेण अनुभूयते, तेन यत्किंचिद्द्रव्यं गुणकर्मणी विहाय न तिष्ठति तथैव गुणकर्मणोर्यो द्रव्येण सह सबन्धः स नित्यसबन्धो नाम समवायः, तथाच चरकीयं वचनं

समवायोऽपृथग्भावो भूम्यादीनां गुणैर्मतः।
सनित्यो यत्र हि द्रव्यं न तत्रानियतो गुणः॥ ४९॥

च. सू. अ० १।

स समवायसंबन्धो नित्यः अविनाशीत्यर्थः, समवायिनां द्रव्याणां नाशे सत्यपि समवायो न विनश्यतीतिभावः। यत्रहि आकाशरूपद्रव्यस्य नित्यता सिद्ध्यति तत्र तद्गुणस्य न अनियतत्वं न विनाशित्वम्, किन्तु नित्ये द्रव्ये तद्गुणस्य नित्यतेव समवायस्य नित्यता सिद्धैव। एतेन नित्यद्रव्यतद्गुणयोर्यः समवायः संबन्धः स नित्यएवेति फलितम्।

एवं पदार्थान्निरूप्य दोषत्रयवादसिध्यर्थं प्रत्यक्षानुमानागमानि प्रमाणानि निरूपणीयानि।

तत्रात्ममनः संयोगः सर्वज्ञानस्य कारणमिति सार्वजनीनोऽनुभवः तयोः संयोगं विना न कस्यचन काचन प्रवृत्तिर्भवति यदा आत्मा मनसा समेत्य हेयोपादेयरूपतया विषयान् गृह्णाति तदा हानोपादानादिव्यवहारकर्ता सर्वोऽपि जनः पूर्वं समालोचयति इदं ग्राह्यमग्राह्यमिति। एवं मनसा ग्राह्याग्राह्ययोर्गुणदोषौ विचार्यैव ग्राह्यत्वेन तद्विषये

प्रवर्तते, एवमुपादेयवस्तुन आलोचनमननाभिमानावधारणपूर्वकमेव यया चितिसंनिकृष्टया अन्तःकरणवृत्त्या पुरुषः प्रवृत्तो भवति सा नाम बुद्धिः, इत्थमध्यवसायापरपर्यायो यो निश्चयस्तदात्मिका बुद्धि रितिफलितम् । प्रतिपादितं चैतन्महर्षिणा चरकाचार्येण ।

इन्द्रियेणेन्द्रियार्थोहि समनस्केन गृह्यते ।
कल्प्यते मनसाप्यूर्ध्वं गुणतो दोषतो यथा ॥ २० ॥

जायते विषये तत्र या बुद्धि निश्चयात्मिका
व्यवस्यति तथा वक्तुं कर्त्तुं वा बुद्धिपूर्वकम् ॥ २९ ॥

च. शा. स्था. अ. १

तत्रविषये—मनसा कल्पिते विषये स्थिरस्वरूपाऽध्यवसाय रूपा सा निश्चयात्मिकाऽन्तःकरणवृत्तिरुदेति सा नाम बुद्धिः सा च बुद्धिर्द्विविधा अनुभूतिरूपा स्मृतिरूपा च । तत्र संस्कारजन्यं-ज्ञानं स्मृतिः । अनुभूतिस्तु त्रिविधा प्रत्यक्षानुमितिशब्दजाः । तत्र प्रत्यक्षजन्यं ज्ञानं प्रत्यक्षजं प्रत्यक्षप्रमायाः करणमिति फलि-तोऽर्थः । प्रमाच अबाधितविषयान्तःकरणवृत्तिरिति प्रागभिहितम् । इत्थं च "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यव-वसायात्मकं प्रत्यक्षम्" पञ्चज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षूरसन घ्राणाख्यानि, पञ्चच विषयाः शब्दस्पर्शरूपरसगन्धाख्याः अर्थापर-पर्यायाः, तेषां पञ्चज्ञानेन्द्रियाणां क्रमेण शब्दादिभिर्विषयैर्यः स-न्निकर्षः यः संबन्धः तेन तस्माद्वा उत्पन्नं यज्ज्ञानम् अव्यपदेश्यम विशेषणविशेष्यभावरहितं भवति पुनश्च इदं वस्तु एनदहं पञ्चज्ञाने-

न्द्रियाणामन्यतमेनानुभवामीति व्यवसायात्मकं तत् प्रत्यक्षम्, तच्च प्रत्यक्षं षड्विधम् आत्ममानसप्रत्यक्षमहमस्मीति प्रतीतिकारकमेकम् श्रोत्रेन्द्रियत्वगिन्द्रियचक्षुरिन्द्रिय-रसनेन्द्रिय–घ्राणेन्द्रिय भेदैः अपरं पञ्चविधम् एवं प्रत्यक्षस्य षड्विधत्वे हि को नाम नानुमन्येत। यतः सर्वेषामेव प्राणिनां अहमस्मीत्येव प्रतीतिः, न नाहमस्मि इति कश्चन ब्रूयात। एवं श्रोत्रेन्द्रियेण शब्दं शृणोमि, त्वगिन्द्रियेण इदं स्पृशामि, चक्षुरिन्द्रियेण इदं पश्यामि, रसनेन्द्रियेण इदं मधुराम्लादि स्वादे, घ्राणेन्द्रियेण च इदं जिघ्रामीति पञ्चज्ञानेन्द्रियोपपन्नाः सर्वेऽपि जनाः लोकायतिकाश्च प्रत्यक्षस्य षड्विधत्वे अविप्रतिपन्नाः दृश्यन्ते। प्रतिपादितं चैतद्भगवता चरकाचार्येण।

आत्मेन्द्रियमनोऽर्थानां सन्निकर्षात् प्रवर्तते।
व्यक्ता तदात्वे या बुद्धिः प्रत्यक्षं सा निरुच्यते ॥२०॥

इदं च प्रत्यक्षं आत्मेन्द्रियमनोऽर्थानां सन्निकर्षात् प्रवर्तते इति सर्वतन्त्रसंमतः सिद्धान्तः, सन्निकर्षो नाम आत्मेन्द्रियमनोऽर्थानां संयोगरूपः संबन्धः, स च सन्निकर्षःषड्विधः—संयोगः समवायः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवेतसमवायः विशेषणविशेष्यभावश्चेति एतेषां षण्णां सन्निकर्षात् व्यक्ता संशयरहिता तदात्वे तत्क्षणं या भवति बुद्धिः—अन्तःकरणवृत्तिव्यापारविशेषः सा नाम प्रत्यक्षमिति फलितम्। एतेन यतो भवति इन्द्रियादेः ईदृशी बुद्धिः तत्प्रत्यक्षमिति तात्पर्यम्॥

एवं प्रत्यक्षप्रमाणनिरूपणानन्तरं प्रमेयत्वेन निरूपणीयानां वातपित्तकफानां प्रत्यक्षप्रमाणैः निरूपणं कर्तव्यम्। वातपित्तकफाश्च शारीरदोषाः, शरीरस्य इमे शारीराः, यद्वा-शरीरं निवासो येषां ते शारीराः, शारीराश्चते दोषाः शारीरदोषाः—तदुक्तम्—

वायुः पित्तं कफश्चोक्तः शारीरो दोषसंग्रहः
मानसः पुनरुद्दिष्टो रजश्च तम एव च

दूषयन्ति इति दोषाः वातपित्तकफाः तेषां संग्रहः। दोषसंग्रहश्चायं शरीरस्यैव भवितुमर्हति। यतस्ते शरीरमेव विकृताः सन्तो व्याधिभिः दूषयन्ति। ते च दोषाः वातपित्तकफसंज्ञकाः मनसश्च दोषौ रजस्तमसी एव, तेच रजस्तमसी क्रोधशोकभयहर्षविषादेर्ष्याभ्यसूयादैन्यमात्सर्यकामलोभप्रभृतिभिः इच्छाद्वेषोद्भवैः मनो दुःखाकरोति दुःखकरत्वाच्च तयो रजस्तमसोः मानसदोषसंज्ञा। शरीरंच दोषधातुमलारब्धं—दोषधातुमलमूलमित्यर्थः, ते च दोषाः धातूपधातवो मलाश्चेदं पाञ्चभौतिकशरीरं कथमारभन्ते, दोषधातुमलाश्च किंलक्षणका इत्येव तावदस्मिन् वादे प्रतिपादनीयं, तच्च प्रतिपादनमेतस्मिन् प्रत्यक्षखण्डे प्रत्यक्षप्रमाणैरेव वक्तव्यं स्यात्।

आदौ तावद् वातपित्तकफाख्यानां शब्दनिरुक्तिः कथनीया, 'वा'—गतिगन्धनयोः इति अदादिगणीयोऽयंधातुः, वाति—गतिं करोति-गन्धयति—सूचयति वा इममर्थमिति वातः वायुरिति शाब्दिकीं संज्ञा सिद्ध्यति, तेन यत् सर्वदा गमनशीलं। सूचकं वा तत्त्वं तद् वातसंज्ञां लभते। वा धातोः असृग्दरादिभ्य इति त

प्रत्यये वातशब्दः सिद्धयति । एवं तपति तत् पित्तम्-संतापार्थस्य तप धातोः इचि प्रत्यये तकारस्य इत्वे वर्णविपर्यये तस्य च त्वे कृते पित्तमिति रूपं, यद्वा तप संतापे इति कर्तरि क्तप्रत्ययः संज्ञायां वर्णागमविपर्ययाभ्यां पृषोदरादित्वात् पित्तमिति रूपसिद्धिः । एतेन पित्तस्य स्वाभाविकं सन्तापलक्षणं दर्शितम् । "कफ-ऋम्फ" हिंसायाम् इति तौदादिकात् ऋफधातोः संज्ञाथामच् कश्च आदेः इति 'कफ' शब्दः सिद्धयति यद्वा कफापरपर्यायस्य श्लेष्मशब्दस्य निरुक्तिस्तावत् 'श्लिष्' आलिङ्गने इति दिवादिकात् श्लिषधातोः मनिन् प्रत्यये कृते उपधायाश्च गुणे च कृते 'श्लेष्मन्' इति शब्दः सिद्धयति, एतेन यः श्लिष्यति–सन्ध्यादिषु आलिङ्गतेऽसौ श्लेष्मा, तेन श्लेष्मणः सन्ध्यादियोजनरूपमपि कर्म दर्शितं भवति इति वातपित्त-कफाख्य दोषनिरुक्तिः ।

पाञ्चभौतिकस्यास्य शरीरस्य उत्पत्तौ वातपित्तश्लेष्माण एव हेतवः । तैरेवाव्यापन्नैः अधोमध्योर्ध्वसन्निविष्टैः इदं शरीरं धार्यते आगारमिव तिसृभिः स्थूणाभिः । अतश्च त्रिस्थूणमिदं शरीरम्–इत्याहुरेके । त एव च व्यापन्नाः विकारातिशयविशिष्टाः शरीरस्यास्य प्रलयहेतवो भवन्ति । तदेभिरेव शोणितचतुर्थैः संभवस्थितिप्रलयेष्वप्यविरहितं शरीरं भवति ॥ सु–सू–स्था–२१ अ–सू–३

शुक्रशोणितयोः शरीरारम्भकत्वे सिद्धेऽपि वातपित्तश्लेष्मणां सहकारिकारणतया शरीरारम्भकत्वं सिद्धयति, मिथुनीभावेन अपत्यपथे पतितमपि शुक्रं शरीरम्भकार्ह रजसा न चेत् संसर्गमीयात्

तदा बीजधर्मयुक्तमपि तच्छुक्रं कथं शरीरारम्भकं भवेत् अतः शुक्ररजसोः मिश्रीभावे वातपित्तश्लेष्माणा एव हेतवो भवितु मर्हन्ति, तत्र वातः शुद्धरजःक्षेत्रे शुक्ररूपं बीजं प्रसारयति, एवं पित्तं च पुनरौष्ण्याद् यदा तद्बीजं द्रवीकर्तुं अणुशोऽणुशश्च मिश्रीभावं कर्तुं आरभते तदैव अदृष्टयोगात् श्लेष्मा तस्मिन् क्षेत्रे मिश्रीभावं गते शुक्ररजसी स्त्यानीकरोति, तदैव मानवस्य मानव-समा आकृतिः प्रकृतितद्विकारैश्च प्रारभ्यते ।

एषा तावत् प्रक्रिया लोकप्रसिद्धा दरीदृश्यते, कश्चन पुरुषो यदा आकृतिं रचयितुं प्रयतते तदा प्रथमतः एव कतिपयैः बिन्दुभिरादौ रेखां प्रथयति बिन्दूनां क्षेत्रपतितानां निसर्गत एव उच्चावचस्थल पतितस्य जलौघस्येव अनेका रेखा भवन्ति, भूम्यामुप्तं बीजं यथा वातजलानिलानां साहाय्यं लब्ध्वा अङ्कुरी भवति—प्ररोहति तथैव स्त्रीक्षेत्रे पतितं शुक्ररूपं बीजं स्वप्रमाणाकृत्यनुरूपं अङ्कुरीभवति इत्थं अङ्कुरीकरणे वातस्यैव प्रधानकर्म, वात एव जलीयं क्लेदं अग्नेश्च शोषणरूपं आकृत्यन्तरप्रणयनरूपं धर्मं च गृहीत्वा विविधाः क्षेत्रबीजधर्मरूपीयाः आकृती रचयति । प्रसिद्धं चैतद् ईश्वरसंकेत-रूपाणां शब्दशक्तीनां परिचायकेषु स्वरव्यंजनरूपेष्वक्षरेषु । अक्षरा अपि रेखाः बिना रेखाश्च बिन्दुभिर्विना नैव शब्दशक्तीः परिचाय-यितुं शक्यन्ते, अतः कतिपयबिन्दुभूतं शुक्ररूपं बीजं शुद्धक्षेत्राणा अपत्यपथे पतितं सत् अदृष्टसहकारि कारणतया वातपितश्लेष्म-णां निमित्तहेतुतां प्राप्य शरीरमारभते, अतः पाञ्चभौतिकस्यास्य स्थूलशरीरस्य मृत्तिका घटस्येव रजःशुक्रे उपादानभूते, रजः—

शुक्रयोश्च मिश्रीकरणेन च वातपित्तश्लेष्माणो निमित्तहेतुतां प्राप्नुवन्ति। यथा कुलालो स्निग्धतरां मृदं बिना घटमुत्पादयितुं नैव समर्थो भवति चक्रचीवरादिसहायेन दण्डं च निमित्तीकृत्य घटं प्रणयति, तथैव अपत्योत्पत्तिस्थानभूतगर्भाशयमन्तरा शुक्ररजसो मिश्रीभाव एव न भवति अतस्तयो मिश्रीभावे सत्येव वातपित्तश्लेष्माणः शरीरारम्भका भवन्ति, गर्भाशये संजातो शुक्ररजसोर्मिश्रीभावस्तावदेतस्य शरीरस्योपादानम् शरीरारम्भरूपे च कार्ये वातपित्त श्लेष्माण आरम्भकनिमित्तहेतुतां भजन्ते इति सिद्धं भवति।

ते च वातपित्तश्लेष्माणः किंस्वरूपाः, कथंकारमिदं सप्तधात्वाशयात्ममनःसंयोगे श्वसनक्रियाधिष्ठानात्मकं शरीरं आरभन्ते आत्ममनःसंयोगश्च कदा भवति येन समये प्राप्ते गर्भो जातः इति संज्ञां लभते तदप्युपपादनीयम्।

तत्रादौ शरीरारम्भकाणां वातपित्तश्लेष्मणां लक्षणं व्याख्यास्यामः—लक्षणं नाम परिचायको धर्मः अस्मात्पदार्थादयमर्थोबोद्धव्यः इतीश्वरसंकेतरूपया शब्दशक्त्या विशिष्टः। लक्षणं च तदेव भवति यस्याः व्यक्तेः लक्षणे क्रियमाणे अव्याप्त्यतिव्याप्त्यसंभवरूपाणां लक्षणदोषाणां लेशोऽपि न संभवेत्। तत्र अव्याप्तिर्नाम लक्ष्यैकदेशावृत्तित्वम्। अतिव्याप्तिर्नाम अलक्ष्ये लक्षणसत्त्वम्। असंभवो नाम लक्ष्यमात्रे कुत्रापि लक्षणस्य असत्त्वम्। एवंभूतानां त्रयाणां लक्षण—दोषाणामभावे सति स्वपरिचायकधर्मवत्त्वम् नाम लक्षणं, लक्ष्ये सर्वधर्माणां यदा समन्वयः स्यात् तदैव लक्ष्ये यथार्थबुद्धि-

जायते तस्मान्न नार्थव्यभिचारः । एवञ्च वातपित्तश्लेष्माणः लक्ष्याः तेषां स्वरूपपरिचायका इमे धर्माः

चरके तावत् रोगभिषग्जितीये विमाने प्रकृत्यादिभावानु व्याख्याने ।

"वातस्तु रूक्षलघुचलबहुशीघ्रशीतपरुषविशदः"
"पित्तम्—उष्णं तीक्ष्णं द्रवं विस्रमम्लं कटुकञ्च"
"श्लेष्मा—स्निग्धश्लक्ष्णमृदुमधुर सारसान्द्रमन्द—
स्तिमितगुरुशीतविज्जलाच्छः" इति

चरकसंहितायाः सूत्रस्थानीये प्रथमेऽध्याये—

"रूक्षःशीतोलघुः सूक्ष्मश्चलोऽथविशदः खरः"
इमानि वातलक्षणानि
"सस्नेहमुष्णं तीक्ष्णं च द्रवमम्लं सरं कटु"
एतानि पित्तलक्षणानि
"गुरुशीतमृदुस्निग्ध मधुरस्थिरपिच्छलाः"
इमानि श्लेष्मलक्षणानि

सुश्रुते निदानस्थाने वातव्याधिनिदाने तावत् पाञ्चभौतिकस्यास्य सर्गस्य सूत्रात्मकतां पाञ्चभौतिकस्यास्य शरीरस्य च देहधारणरूपेण धातुतां शरीरारम्भकरूपेण आरम्भकतां च दर्शयति ।

" स्वयंभूरेष भगवान् वायुरित्यभिशब्दितः
स्वातन्त्र्यान्नित्यभावाच्च सर्वगत्वात्तथैव च "

सर्वेषामेव सर्वात्मा सर्वलोकनमस्कृतः ।
स्थित्युत्पत्तिविनाशेषु भूतानामेष कारणम् ॥

अव्यक्तो व्यक्तकर्मा च रूक्षः शितो लघुः खरः ।
तिर्यग्गो द्विगुणश्चैव रजोबहुल एव च ॥

अचिन्त्यवीर्यो दोषाणां नेता रोगसमूहराट् ।
आशुकारी मुहुश्चारी पक्वाधानगुदालयः ॥

सु. नि. स्था: १ अ० ॥

इति वातलक्षणम् । तथा पित्तलक्षणमपि सुश्रुतस्य सूत्र स्थाने व्रणप्रश्नाध्याये—तद्यथा

पित्तं तीक्ष्णं द्रवं पूति नीलं पीतं तथैव च ।
उष्णं कटुरसं चैव विदग्धं चाम्लमेव ॥ ११ ॥

श्लेष्मलक्षणमपि तस्मिन्नेवाध्याये—

श्लेष्मा श्वेतो गुरुः स्निग्धः पिच्छिलः शीत एव च ।
मधुरस्त्वविदग्धः स्याद्विदग्धो लवणः स्मृतः ॥ १५ ॥

समर्थितं चैतन्मुनिवरेण वाग्भटाचार्येण—

१ शब्दस्पर्शौ द्वौ गुणौ यस्य सः ।

"वायुः पित्तं कफश्चेति त्रयो दोषाः समासतः",

तत्र रूक्षो लघुः शीतः खरः सूक्ष्मश्चलोऽनिलः । ११

पित्तं सस्नेहतीक्ष्णोष्णं लघु विस्रं सरं द्रवम् ।

स्निग्धः शीतो गुरुर्मन्दः श्लक्ष्णो मृत्स्नः स्थिरः कफः ११

वा. सू. अ० १

इत्थं दोषाणां परिचायकानि लिङ्गान्युक्त्वा श्रीमता वाग्भटाचार्येणापि पाञ्चभौतिकस्य शरीरस्य आरम्भकत्वं शरीरधारणत्वं चोक्तम् ।

दोषधातुमला मूलं सदा देहस्य तं चलः ।
उत्साहोच्छ्वासनिश्वासचेष्टावेगप्रवर्तनैः ॥ १ ॥

सम्यग्गत्याच धातूनामक्षाणां पाटवेन च ।
अनुगृह्णात्यविकृतः, पित्तं पक्त्यूष्मदर्शनैः ॥ १ ॥

क्षुतड्रुचि प्रभामेधाधीशौर्यतनुमार्दवैः, ।
" श्लेष्मा स्थिरत्वस्निग्धत्वसंधिबन्धक्षमादिभिः ॥३॥

एवं मुनित्रयस्य वातादीनां लक्षणेषु तेषाञ्च शरीरारम्भकत्व स्वीकारे ऐकमत्यम् । वातादीनां लक्षणानि प्रतिपादितानि, ते च वातपित्तश्लेष्मणः गर्भाशये मिश्रीभूतयोः शुक्ररजसोः सतोः अस्य पाञ्चभौतिकशरीरस्य आरम्भकाः कथं भवन्ति तदेतत प्रतिपादयामहे ।

पाञ्चभौतिकशरीरारम्भकाः वातपित्तश्लेष्माण एव संभवन्तीत्युक्तं, ते च स्वरूपस्थाः सन्तो गर्भमुत्पादयन्ति "तद्यथा–अनुपहतरेतसः पुरुषस्य, स्त्रियाश्चाप्रदुष्टयोनिशोणितगर्भाशयाया यदा भवति संसर्ग ऋतुकाले, यदा चानयोस्तथैव युक्ते च संसर्गे शुक्रशोणितसंसर्गमन्तर्गर्भाशयगतं जीवोऽवक्रामति, सत्वसंयोगात्तदा गर्भोऽभिनिर्वर्तते स सात्म्यरसोपयोगादरोगोऽभिवर्द्धते सम्यगुपचारैश्चोपचर्यमाणः। ततः प्राप्तकालः सर्वेन्द्रियोपपन्नः बलवर्णसत्वसंहननसम्पदुपेतः सुखेन जायते समुदयादेषां भावानाम् । च. सू. अ ३ ॥

रेतस उपघातकराणां भावानामभावे सति गर्भोत्पादकता शुक्रस्य सिद्ध्यति, एवञ्च अपत्यपथशोणितगर्भाशयानां भावानाम् अदोषवत्त्वं स्याद्यदा यौवनवत्याः स्त्रियाः, तदैव गर्भोत्पत्त्यवसरः नान्यथा, अनेन शुद्धशुक्रशोणिते एव गर्भोत्पादकत्वे हेतू उच्येते तयोरन्तरा 'कस्य गर्भो कस्याश्च कस्मिन् आशये गर्भो वा' इत्युपपत्तिरेव न स्यात्, सम्यक्कृष्टाया देववृष्टिक्लिन्नायाश्च भूमेः शस्यप्ररोहयोग्यता, एतादृशं विधिं विहाय प्ररोहभावार्हं बीजमपि नैव प्ररोहाय संभवति " गर्भश्च उप्तबीजस्य प्रक्लिन्नीभावे प्ररोहणरूपः " बीजं च यावत् वृष्टिक्लिन्नाया भूमेः क्लेदनभावमादाय बीजस्य सर्वावयवानणुशः क्लेदयति तदैव क्षेत्रबीजगतं वायुतत्त्वम् तदङ्कुरयति, एवञ्च गर्भाशयगतमनुपहतबीजं गर्भाशयस्था भावा एव क्लेदयन्ति प्ररोहणसमर्थं च कुर्वन्ति गर्भाशये तावत् के के भावाः, शुक्रबीजस्य कीदृक् स्वरूपमित्यधुना समर्थ्यते । सुश्रुते तावत

स्फटिकाभं द्रवं स्निग्धं मधुरं मधुगन्धि च ।
शुक्रमिच्छन्ति केचित्तु तैलक्षौद्रनिभं तथा ॥

सु. शा. अ० २ ॥

एतादृशलक्षणोपेतस्य शुक्रस्य गर्भजननयोग्यता। आर्तवस्यापि गर्भधारणयोग्यता दर्शिता तत्रैव सुश्रुते

शशासृक् प्रतिमं यत्तु यद्वा लाक्षारसोपमम् ।
तदार्तवं प्रशंसन्ति यद्वासो न विरञ्जयेत् ॥

सु. शा. अ० २ । १७ ॥

एतादृशशुद्धशुक्ररजसी गर्भजननगर्भधारणयोग्ये भवतः । एतादृशयोः शुद्धशुक्ररजसोः संसर्गः यदा ऋतुकाले ऋतुदर्शनाचतुर्थेऽहनि भवति तदैव रजोबहुले गर्भाशये गर्भोत्पादकं शुक्रबीजमाकृष्टक्लिन्नायां भूमौ धान्यबीजमिवोप्तं भवति । अनेन विधिना गर्भाशये यदा अदुष्टशुक्ररजसी संसृष्टे भवत स्तदैव संसर्गानन्तरं बीजं क्लिन्नं कुर्वतद्रजो रजोगताश्च धर्माः प्ररोहयन्ति–अङ्कुरयन्ति, संसृष्टयोरेतयोर्यदा कललाकारा विकृतिः प्रारभ्यते तदैव रजसा संसृष्टं बीजं रजोधर्मैः क्लिन्नं सत् अङ्कुरायते एषा चावस्था "धृतोगर्भः" इति शब्देन व्यवह्रियते । तमेतमन्तर्गर्भाशयगतं संसर्गं सत्वसंप्रयोगान्मनसस्तत्र अदृष्टाकृष्टेन जीवेन सह गमनं तदा गर्भोऽभिवर्तते । इत्थं न केवले शुक्ररजसी एव गर्भजनने हेतू किन्तु अन्येषामपि अधिष्ठानसहकारिकारणत्वस्वीकारात् तदुक्तम्–

ध्रुवं चतुर्णां सान्निध्याद् गर्भः स्याद्विधिपूर्वकः ;
ऋतुक्षेत्राम्बुबीजानां सामग्र्यादङ्कुरो यथा ॥

सु–शा–अ–२।३३॥

ध्रुवमितिनिश्चयेन ऋतुः–प्राप्तयौवनायाः स्त्रियो रजोधर्म समयः तत्रापि रजोदर्शन समये 'त्र्यहवर्ज' मित्युक्तेः तुरीया निशा इति कालविशेषोऽपेक्षितः, तस्य ऋतोः गर्भजननयोग्यो यो गर्भाशयः क्षेत्रम्–तस्य, आहारपाकजं सकलशरीरप्रीणानात्मकं व्यापि रससंज्ञकं यद्–अम्बु तस्य, प्ररोहयोग्ये स्त्रीपुंसयोः ये आर्तवशुक्रे तदात्मकं यद् बीजं–एवमेतेषां चतुर्णां सान्निध्यात्–विधिपूर्वकः गर्भः अङ्कुरवद् अभिवर्तते, एवं गर्भाशयरूपं क्षेत्रं अधिष्ठानभूतं ऋत्वम्बुनी सहकारिकारणत्वेन स्वीक्रियेते शुक्रार्तव संयोगरूपं बीजं तु पाञ्चभौतिकस्यास्य शरीरस्योत्पादने उपादानकारणत्वेन स्वीक्रियते। इदं शरीरं प्रति शुक्ररजसोरेवोपादानत्व स्वीकारात्.

कारणं द्विविधम् उपादानं निमित्तञ्च। यद् विना यन्नोपपद्यते तत्तस्योपादानम् अथवा यद्धि यस्मात्प्रभवति, यस्मिंश्च प्रलीयते तत्तस्योपादनम्, यथा घटस्य मृत्तिका, मृदं विहाय घटरूपद्रव्यस्योत्पत्तिरेव न संभवति किन्तु मृदं गृहीत्वैव कुलालः घटं प्रारभते अतः घटं प्रति मृदुपादानम्, एवं येन साधनेन विना यत्कार्यं न भवति तत्तस्य निमित्तम् यथा घटं प्रति दण्डः निमित्तकारणं, प्रेक्षते च पाञ्चभौतिकशरीरे शुक्ररजसोः संसर्ग इदं शरीरं प्रति उपा-

दानमेव । दोषसंज्ञका वातपित्तश्लेष्माणश्च परस्परानुग्राहकतया आरम्भकनिमित्तहेतवः भवन्ति, शरीरस्य पाञ्चभौतिकत्वं तु शुक्ररजसोः संसर्गादेव सिद्धयति तद्यथा—

सौम्यं शुक्रम् आर्तवमाग्नेयम् इतरेषामप्यत्र भूतानां सान्निध्य मस्त्यणुना विशेषेण परस्परोपकारात्, परस्परानुग्रहात्, परस्परानुप्रवेशाच्च ॥ सु. शा. अ० ३ । तेन गर्भस्य शुक्रार्तवे मूले नाम उपदानहेतू इति समायातं । यतश्च शुक्रार्तवयोः संसर्गं विना तस्य बीजरूपस्य शुक्रार्तवसंसर्गस्य अङ्कुरीभाव एव न सिद्धयति तच्च शुक्रं सोमगुणभूयिष्ठं, सोमो नाम धारणगुणभूयिष्ठः विसर्गकरः आप्योऽस्थ्यारम्भको धातुविशेषः, भौतिकविशेषोवा । इत्थमार्तवमपि आग्नेयं अग्निगुणभूयिष्ठं अग्नेश्च गुणाः परिणम्यमाणानां शुक्रार्तवसंसर्गजन्यानां धातूनां आरम्भकधातूनां परिपचनाकृतिविशेषोत्पादकत्वरूपपरिणामकराः । 'इतरेषाम् अपि भूतानां सान्निध्यमस्ति' इत्यनेन पृथ्वीवाय्वाकाशानां अणुना विशेषेण—सूक्ष्मप्रकारेण सान्निध्यमस्त्येव परस्परोपकारात्, यथा पार्थिवतत्त्वं धारणत्वेन, आप्यं संहननेन, तैजसं परिणामकरत्वेन, वायवीयं विक्षेपविभागकरत्वेन, आकाशीयं देहधारणार्थं अङ्गविभागार्थं शरीरस्य अङ्गानां च पोषणार्थं सप्तधातुवहस्रोतसां अवकाशदानेन परस्परमुपकुर्वन्ति । परस्परानुग्रहाच्च इतराणि भूतानि पृथिवीवाय्वाकाशानि, सोमगुणभूयिष्ठं शुक्रम् अग्निगुणभूयिष्ठं चार्तवमनुगृह्णन्ति, अतस्तेषां त्रयाणां गर्भाङ्कुरीभावपोषणाङ्गविभागेषु अनुग्रहोऽस्त्येव। एवं परस्परानुप्रवेशाच्च बीजस्याङ्कुरीभावे गर्भजननकर्मणि सान्निध्यं पृथिवीवायुवियतांतु

सान्निध्यमस्त्येव यथा अस्मदीयानि शरीराणि पार्थिवान्यपि पञ्च भूतारब्धत्वात् पाञ्चभौतिकानि, पृथिव्यंशस्याधिक्यात् पार्थिवत्वेन व्यवहारः, किन्तु शुक्रार्तवयोः बीजभूतयोः पार्थिवयोरपि यदा आत्ममनः संयोगाऽनन्तरं जलानलानिलवियतां परस्परमनुप्रवेशो न स्यात् कथं नाम आकृतिरेव रच्येत, कस्यांचन आकृतौ पञ्चभूतान्येव अपेक्ष्यन्ते, या तु आकृतिः प्रथमं सर्गमारभते बिन्द्वात्मिका साऽपि पञ्चभूतान्येव अपेक्षन्ते, यैः कतिपयै बिन्दुभी रेखा विरच्यन्ते स पृथ्वीजलधर्मः, आकृतीस्तु पृथ्वीं जलतेजांसि एव धारयन्ति वाय्वाकाशे तु स्वरूपाभावाद् धारयितुं न शक्नुवाते इति प्रत्यक्षसिद्धं । अतो जलाग्निभ्यां परिपक्वा पार्थिवतत्त्वविशेषा इयं लेखनमषी (स्याही) यथा आकृत्युत्पादने प्रधानं कारणं ताश्च रेखाविशेषा आकृतयोऽस्मिन् सौकर्यार्थम् श्लक्ष्णपत्रे एव रच्यन्ते ताश्च आकृतयः अक्षरविशेषान् संकेतयन्त्यः अमुमर्थं बोधयन्ति, अक्षरविन्यासरूपोऽवकाशः तदाकाशं नाम आकृतीनाम् । अग्नितत्त्वसहचरो यः शोषयति स्थिरयति च तद्वायुतत्त्वम् । एवमाकृतिविशेषैः परिचीयमानं सर्वमपीदं जगत पाञ्चभौतिकमेवेति सिद्धं भवति एवं सोमाग्निगुणभूयिष्ठयोरपि गर्भारम्भकशुक्रार्तवयोः पाञ्चभौतिकता नातिवर्तते इति सिद्धं भवति ।

तदेवं शरीरस्य पाञ्चभौतिकीं सिद्धिं निरूप्य धातुसंज्ञाऽपर पर्यायाः वातपित्तश्लेष्माणोऽस्य शरीरस्योत्पत्तौ केन प्रकारेण निमितहेतुतां व्रजन्तीति निरूप्यते । आदौ कारणं उपादान निमित्त भेदाभ्यां द्विविधमभिहितं । तत्र " यद्धि यस्मात् प्रभवति यस्मिंश्च

प्रलीयते तत्तस्योपादानम् । " इति लक्षणकेहुपादाने कार्यान्वयितया संबन्धविशेषसत्त्वात् समवायिकारणम् 'असमवायिकारणम् इति द्विविधभेदोपपन्नं कार्योत्पत्तौ पुनः कारणमवगम्यते, एतेन प्रपञ्चरूपसर्वकार्योत्पत्तौ त्रिविधं कारणं भवति, समवायि, असमवायि, निमित्तकारणभेदात्, तत्र कारणत्वं नाम " अन्यथासिद्धिशून्यत्वे सति कार्यस्य नियतपूर्ववर्तित्वम् " कार्यस्य नियतपूर्ववर्तिता तु त्रिविधेष्वपि कारणेष्वावश्यकी, यतः पाञ्च भौतिकशरीरकार्यं प्रति गर्भधारणावसरे शुक्रार्तवे समवायिकारणे भवतः, शुक्रार्तवयोः परस्परानुग्रहरूपःसंयोगः गर्भं प्रति असमवायि कारणम् गर्भस्य अङ्गीभाववर्धनापहानरूपान् भावान् प्रति गर्भारम्भकाः धातुसंज्ञापरपर्यायाः वातपित्तश्लेष्माण एव निमित्तकारणम् तद्यथा--यत्समवेतं कार्यमुत्पद्यते तत्समवायि कारणम् यथा यस्यां गर्भोत्पत्तौ समवेते शुक्ररजसी समवायेन संबद्धे सती गर्भजननात्मकं कार्यमुत्पादयेते अतस्ते शुक्ररजसी गर्भोत्पत्तिरूपकार्यं प्रति समवायि कारणे मन्येते, गर्भोत्पत्तौ शुक्ररजसोः परस्परानुग्रहाच्च ते एव बीज रूपतया गृह्येते कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणम् असमवायिकारणम् तेन कार्येण सह एकस्मिन्नर्थे समवेतं सत् यत् कारणं भवति तत् असमवायिकारणम् इत्यन्वयः; कारणेन सह एकस्मिन्नर्थे समवेतं सत् यत् कारणं भवति तदपि असम वायिकारणमित्यन्वयः तद्यथा गर्भावयवारम्भकरूपो यः शुक्ररजसोः संबन्धः संयोगरूपः स गर्भरूपोत्पत्तिं प्रति असमवायिकारणं भवतीति फलितम् । अत एव असमवायिकारणनाशे कार्यनाश

इति सिद्धान्तः प्रतिफलितो भवति, शुक्ररजसोः संयोगनाशे गर्भस्रावः गर्भपतनं वा भवतीति प्रत्यक्षमनुभवामः, स च गर्भस्रावः बीजरूपयोः शुक्ररजसोः संयोगो विनाशं याति तदैव भवतीति व्याधिलक्षणेषु उपद्रवविशेषैः प्रतीयते, यथा तन्तुपटसंयोगनाशे तन्तुरूपकार्यनाशः यथावा कपालद्वयसंयोगनाशे घटरूपकार्यनाशः, तद्वत् शुक्ररजसोः संयोगनाशे गर्भरूपकार्यनाशः, अतः शुक्ररजसोः संयोगः गर्भप्रति असमवायि कारणमिति सिद्ध्यति। तदुभयभिन्नं कारणं निमित्तकारणम् एतेन समवायिकारणभिन्नत्वे सति—असमवायिकारणभिन्नत्वे सति यत् साधनरूपं यदारम्भकं कारणं तन्निमित्तकारणमिति फलितोऽर्थः एतेन समवायिकारणभूते शुक्ररजसी, असमवायिकारणभूतश्च शुक्ररजसोः संयोगः तदुभयभिन्नाः गर्भोत्पत्तौ गर्भारम्भका वातपित्तश्लेष्माणः गर्भप्रति निमित्तहेतवो भवन्ति तदधीनत्वात् गर्भोत्पादनस्य गर्भाङ्कुरीभावस्य वा। त एते निमित्तहेतुभूता गर्भारम्भका वातपित्तश्लेष्माणः स्वं स्वं कर्म कथङ्कारं कुर्वन्ति केन प्रकारेण आशये उत्पादकधर्मविशिष्टं शुक्रमाकृष्यते केन वा विधिना रजसा तत्संसृष्टं भवति शुक्ररजसोः संयोगे कीदृशो गर्भोत्पादने परिपाक आरभ्यते केन हेतुना अङ्गप्रत्यंगविभागा भवन्ति आरम्भकाश्च धातुसंज्ञाऽपरपर्याया वातपित्तश्लेष्माणः केषुकेष्वाशयेषु तिष्ठन्तः धारणपोषणाङ्गपरिपचनात्मकं स्वं स्वं कर्म कुर्वते—ते च अङ्गप्रत्यङ्गेषु विकृत्युत्पादकाः सन्तः दोषसंज्ञां कथं लभन्ते शरीरस्यास्य मलिनीकरणाच्च मलसंज्ञामपि कथं प्राप्नुवन्तीति सर्वं विचारणीयमेव।

गर्भजननयोग्यमपि शुक्रं पाञ्चभौतिकमेव आहारपरिणामादिना अग्निबलेन पित्ततेजसा च परिपच्यमानानामवस्थान्तरं प्राप्नुवता मुत्तरोत्तरधातुगततेजसा च रसरक्तमांसमेदोऽस्थिमज्जाशुक्रसंज्ञां च- लभमानानां शरीरधारकाणां सप्तधातूनां षड्रसभोजनाद्याहारवि- शेषैः सम्पद्यमानं शुक्रं नाम चरमो धातुः, तदेव स्वशरीरसमशरी- रोत्पादकधर्मवत्त्वाद्बीजसंज्ञां लभते, उपयुज्यमानाः षड्रसा अपि पाञ्चभौतिकाः स्तैरारभ्यमाणाः सप्तधातवोऽपि पाञ्चभौतिका एव इत्थं गर्भारम्भकं बीजं समवायि कारणम्, एवमार्तवमपि स्त्रीणां षड्रसोपयोगजातादाहाररसात् अभिषवलक्षणम् चरमं धातुसंज्ञकं रक्तो- पधात्वाख्यं वा भवति, रजसैव संसृष्टं शुक्ररूपं बीजं गर्भमभिषवति । तेन इदं फलितं—वातादिदोषैः अव्यापन्नं शुक्रं वातादिदोषैः अव्यापन्नेन रजसा गर्भाशये गर्भमेवाभिनिर्वर्तयति सर्वथा—" तद्यथा—निर्मले वाससि सुपरिकल्पिते रञ्जनं समुदितगुणं उपनिपातादेव—रञ्जनं द्रव्यनिर्मलवाससोः संसर्गादेव रागमभिनिर्वर्तयति तद्वत्—यथा वा क्षीरं दध्ना अभिषुतं सद् दधिभावमापद्यते, तत्र क्षीरस्य दध्य- भिषवे क्षीरे संयोजितमल्पं दधि त्वरयैव दधित्वमापादयते यदि दध्ना न संयोजितं स्यात् क्षीरं तदातु तादृशस्य क्षीरस्य दधिभावता नियतैव स्वभाव एष खलु भावानाम् अन्यथाप्रतिपत्तिर्नाम एवं शुक्रमपि विशुद्धेन रजसा संसृष्टं गर्भरूपतामेव भजते ।

" एवमाहारपरिणामकराः बीजधर्मशुक्रोत्पादकास्तु इमे भावा भवन्ति—तद्यथा—ऊष्मा, वायुः क्लेदः स्नेहः कालः समयोग- श्चेति " चरक सं. शा—स्था—६—अ—सू—१४ ॥

उपयुज्यमाने षड्रसे आहारे ऊष्मा-अग्न्याशयगतं पित्ततेजः तमाहारं रसरूपेण परिणामयति, वायुः सकलशरीरपोषणार्थं रसवाहिनीषु विवेचयन् सन् संजातेनाहाररसेन प्रीणयति जीवयति च, क्लेदः क्लेदनात्मककर्मवान् श्लेष्मा तमेवाहारजातं क्लेदयन् तांस्तान् धातून् सन्ध्यङ्गविभागांश्च तेनैवाहाररसेन तर्पयति, आहारे उपयुज्यमानः स्नेहः सजातीयेन श्लेष्मगुणेन संसृज्यमानः तदेव क्लेदनकर्म वितनुते, एवमाहारस्य परिणामकरत्वे निशावसानादिरूपः कालः, आहारादिद्रव्याणाञ्च प्रकृतिकरणसंयोगराशिदेशकालोपयोगसंस्थोपयोक्त्रष्टमानि आहारविधिविशेषायतनान्यपि आहारपरिणामे जन्यमाने सम्यग्योगत्वेन संमतानि गृह्यन्ते, एवं खलु आहारस्य परिणामरूपः प्रथमो रसो नाम धातुः तस्य एको भागः सकलशरीर प्रीणनाय कल्पते, अपरस्तु रञ्जकपित्तेन समेत्य तत्रत्योष्मणा रञ्जितः पक्वः सन् रक्तसंज्ञां लभते, एवमुत्तरोत्तरपित्ततेजसा पाचितः सन् रक्तान्मांसं तस्मान्मेदस्तस्माच्चास्थीनि तेभ्यो मज्जा मज्ज्ञश्च शुक्रं भवति, तदेव शुक्रं सहस्रधाध्मातसुवर्णमिव निर्दोषं मिथुनीभावेनापत्यपथे पतितं शुद्धरजसा संसृष्टं गर्भजननरूपबीजधर्माय कल्पते एवमाहारस्यैव परिणामभूताः रसादिसप्तधातवः ऊष्मवायुक्लेदैः आहारपरिणामकरसाधनैः स्नेहकालसम्यग्योगान् परस्परोपकारकत्वेन सहायान् लब्ध्वा षड्रसाहारजन्यप्रथमपरिणतरसधातोरारभ्य गर्भजननशुक्रोत्पत्तावपि अनुस्यूताः दृश्यन्ते, पुनश्च गर्भजनके शुक्रे त एव सूक्ष्मरूपतया परिणता ऊष्मवायुक्लेदाः रजसा

संसृज्य मानवशरीरसमाकृती रचयितुमारभन्ते । एतेन आहार परिणामाद् रसादारभ्य धात्वन्तरारम्भका ऊष्मवायुक्लेदा एव संभवन्ति, त एव च धातुसंज्ञापरपर्याया अपि दूषकधर्मवत्त्वाद् दोषसंज्ञां लभन्ते, अनेन गर्भोत्पादनं प्रति समवायिकारणतया शुक्ररजसी असमवायिकारणतया च शुक्ररजसोः संयोगः । एवं कारण द्वैविध्ये उपपन्नेऽपि वातपित्तश्लेष्माणः प्राणयात्रार्थमुपयुज्यमान षड्रसाहारपरिणामजन्यचरमधात्वोः शुक्ररजसोः गर्भरूपविकृत्युत्पादने आरम्भकाः सन्तो निमित्तहेतव एवं भवन्ति इति सिद्धम् । एष एव प्रकारः प्रकृतिस्थानां धातूनां प्राकृतकर्मनिर्देशे वर्णितो भगवता धन्वन्तरिणा स यथा-

रस स्तुष्टिं प्रीणनं रक्तपुष्टिं च करोति, रक्तं वर्णप्रसादं मांस पुष्टिं जीवयति च, मांसं शरीरपुष्टिं मेदसश्च, मेदः स्नेहस्वेदौ दृढत्वं पुष्टिमस्थ्नां च, अस्थीनि देहधारणं मज्ज्ञः पुष्टिं च, मज्जा प्रीतिं स्नेहं बलं शुक्रपुष्टिं पूरणमस्थ्नां च करोति, शुक्रं धैर्यं च्यवनं प्रीतिं देहबलं हर्षं बीजार्थंच ॥ सु. सू. स्था. अ. १५ सू. ९ ॥

समर्थितश्चैतन्मुनिवरै वाग्भटाचार्यैः—

प्रीणनं जीवनं लेपः स्नेहो धारणपूरणे ।
गर्भोत्पादश्च धातूनां श्रेष्ठं कर्म क्रमात् स्मृतम् ॥

सू. स्था. ११ अ० श्लोक० ४ ॥

विस्तरं चानुमानखण्डे व्याख्यास्यामः ।—

एवं "दोषधातुमलमूलं हि शरीरम्" इत्येतत् सूत्रस्थानीयं सौश्रुतं सूत्रं समस्तत: व्याख्यातं भवति, शारीरास्त्रयो दोषाः वातपित्तश्लेष्माणः—मनसश्च द्वौ दोषौ रजस्तमसी एते संभूय मनः शरीरयोर्दूषकत्वात् पञ्चदोषा भवन्ति, सर्वेषामपि व्याधीनां मनः—शरीराधिष्ठानत्वात्, स्थूलशरीरस्य धातवः पुनः सप्त एव, उपरिनिर्दिष्टैः सप्तधातुभिरेव स्वं स्वं प्राकृतं कर्म कुर्वद्भिः शरीरधारणोपलम्भात्। सप्त च मलाः तेषु केचन त्याज्याः केचन व्यवस्थया रक्ष्याः स्युः, तदेन्मलप्रकरणमप्यग्रेऽभिधास्यामः, एवं दोषा वातादयः, धातवो रसादयः मलाश्च पुरीषमूत्रसिङ्घाणकस्वेदादयः त एते दोषधातुमलाः मूलं शरीरप्रकृत्यारम्भककारणं यस्य तत्, एतादृशं 'दोषधातुमलमूलम्' इति शरीरविशेषणस्य संक्षेपतो व्याख्यानम्, पुनश्च यथा वृक्षादीनां संभवस्थितिप्रलयेषु मूलं प्रधानं तथा शरीरस्यापि वातादयः मूलं। संभवो नामाङ्कुरीभावः, स्थितिर्नामाङ्कुरीभावादारभ्य आकृतिपरिणामावस्थापर्यन्तम् पालनपोषणधारणरूपो धर्मः, प्रलयो नाम पूर्वमसमवायिकारणनाशे सति समवायिकारणस्य आरम्भकनिमित्तकारणेन सह सर्वथा विनाशः, एवमेते त्रयो विकारा अपि त्रिभिरेव वातपित्तश्लेष्माख्यैरेव दोषैः संपद्यन्ते, समर्थितं च प्राय एतत् षड्रसाहारपरिणत सप्तधातुव्याख्याने। ते च—त्रयोदोषाः वातपित्तश्लेष्माणः पूर्वं धातुसंज्ञामेव लभन्ते षड्धातुसमुदितस्यास्य पुरुषशरीरस्य धारणकर्तृत्वात्, पुनश्च असम्यङ्नियोजितैः मिथ्याहारविहारैर्यदा विकृताः—क्षीणा वा वृद्धा वा भवन्ति, तदैवास्य शरीरस्य दूषणकर्तृत्वाद्

दोषाः इति संज्ञया व्यवह्रियन्ते एवञ्चैतच्छरीरं यदा मलिनयन्ति तदाऽस्य शरीरस्य मलिनीकरणकर्तृत्वात् पुनस्तेषामेव त्रयाणां 'मलाः' इति संज्ञाः भवन्ति, इत्थञ्च येऽस्य शरीरस्य आरम्भक निमित्तहेतुत्वेन स्वीकृता वातपित्तश्लेष्माणः तेषां त्रिविधकर्म कर्तृत्वेन त्रिविधाः संज्ञा भवन्ति । तदुक्तम्—

> शरीरदूषणाद् दोषा धातवो देहधारणात् ।
> वातपित्तकफा ज्ञेया मलिनीकरणान्मलाः ॥ इति

वातपित्तश्लेष्मणामादौ पाञ्चभौतिकदेहारम्भकशुक्ररजः संयोगरूपबीजस्य धारणकर्मकर्तृत्वात् उत्पन्नस्यापि तस्य स्वास्थ्यपालकत्वेन प्राणयात्रार्थं च देहस्य धारणकर्मकर्तृत्वात्त एते आदौ धातुसंज्ञां लभन्ते पुनश्च त एव धातुसंज्ञापर्याया वातपित्तश्लेष्माणः स्वापचयोपचयकरै मिथ्याहारविहारै यदा इदं शरीरं स्वजन्यविकृतिभि दूषयन्ति तदा दोषाः इति संज्ञाः प्राप्नुवन्ति, एवञ्च त एव वातपित्तश्लेष्माणः सप्तधातून् रसादीन् पुष्यन्तः रसादिसप्तधात्वंशान् विवेचयन्तः मलान् खेभ्यो बहिरानयन्तः शरीरमिदं मलिनयन्ति इत्थं शरीरस्य मलिनीकरणात्पुनस्तेषामेव वातपित्तश्लेष्मणां "मलाः" इति संज्ञा जायते अनेन प्रकारेण "वातपित्तश्लेष्मणां", "धातवः, दोषाः, मलाः' इति संज्ञा त्रयम् भवति । ननु एकस्यैव व्यक्तेः संज्ञात्रयेण व्यवहारः कथं सिद्ध्येदिति न वाच्यम्, उदाहरणोपलम्भादेकस्यापि व्यक्तेः भिन्नजातीयकर्मकर्तृत्वेन तदुपपत्तेः, तद्यथा स्वभावकर्मक्रियाभेदैर्वात-

पित्तश्लेष्मणामपि संज्ञात्रयं सिद्ध्यत्येव, स्वस्थशरीरस्य स्वास्थ्यपालनेन षड्रसाद्याहारपरिणामरसादिधातुद्वारा षड्धातुसमुदितपुरुषस्य यद् वातपित्तश्लेष्मभिरविकृतैः पोषणं तद् स्वस्थशरीरधारणकर्मकर्तृत्वाद् धातुसंज्ञामेव प्रापयन्ति, यच्च मिथ्याहारविहारादिभि विकृतिमुत्पादयद्भिः व्याधिविशेषैः शरीरं दूष्यते तद्दूषणरूपकर्मारम्भकत्वं वातादीन् दोषसंज्ञां नयन्ति, पुनश्च तत्तद्धातुमलैर्यदा तत्तन्मलवहखेभ्यः मलान् स्रावयित्वा यदा इदं शरीरं मलिनयन्ति तदा तेषां 'मलाः' इति संज्ञा सिद्ध्यति, यथैकामेव कामिनीं प्रति तस्याः पत्यु धर्मपत्नीसाहचर्य्यत्वेन पत्नीबुद्धिः, सपत्न्याः दुःखकरत्वाच्च विषमा बुद्धिः श्वसिंहानां भक्ष्यत्वाच्च भोज्यबुद्धि रुत्पद्यते, तथैव वातपित्तश्लेष्मणः प्रति संज्ञात्रयव्यवहारः सिद्ध्यतीति न काचन क्षतिः। तदुक्तम् पूज्यपादैः—मधुसूदनयतिभिः स्वीयभक्तिरसायनाख्ये ग्रन्थे—

त्रिगुणात्मकमेकैकं वस्तु त्र्याकारमीक्ष्यते।
निजमानससङ्कल्पभेदेन पुरुषै स्त्रिभिः ॥ १६ ॥
कामिन्याः सुखता भर्त्रा सपत्न्या दुःखरूपता।
तदलाभात्तथान्येन मोहत्वमनुभूयते ॥

इति भावनाभेदैः व्यक्तेः व्यक्तिं प्रति यथा पृथग्व्यवहारस्तथा वातपित्तश्लेष्मणां शरीरं प्रति पृथक् पृथक् कर्मकर्तृत्वेन पृथक् पृथक् संज्ञया व्यवहारः, एतेन वातपित्तश्लेष्मणां धातुत्वं दोषत्वं, मलत्वञ्च सिद्धम्।

एवं वातपित्तश्लेष्मणां संज्ञात्रयमुत्पाद्य तेषामारम्भकनिमित्त-हेतुत्वस्वीकारे पुनरार्षवचनानि प्रमाणत्वेन संपादनीयानि, आहार परिणामकरास्तु भावाः "ऊष्मा, वायुः, क्लेदः, स्नेहः, कालः, समयोगश्च" इति प्राक् प्रतिपादितमेव। गर्भश्च पुनः "मातृतः पितृत, आत्मतः, सात्म्यतः, रसतः, सत्वत, इत्येतेभ्यो भावेभ्यः समुदितो गर्भः संभवति। शुक्रशोणितजीवसंयोगे तु खलु कुक्षिगते गर्भसंज्ञा भवति। च-शा-४ अ-सू-४-५॥ कुक्षिर्नाम कुक्ष्येकदेशगतः गर्भाशयः, तत्र शुद्धशुक्रशोणितयो र्जीवस्य च संयोगे सति अभिषूयमाणं यत्तद् गर्भसंज्ञकं भवतीति फलितोऽर्थः॥ स च पुनः, "गर्भस्तु खल्वन्तरिक्षवाय्वग्नितोयभूमिविकार-श्चेतनाधिष्ठानभूतः। एवमनया युक्त्या पञ्चमहाभूतविकारसमुदायात्मको गर्भ श्चेतनाधात्वधिष्ठानभूतः। स ह्यस्य षष्ठो धातु रुक्तः॥६॥ च-शा-अ-४॥ हर्षादुदीरितं गर्भजननयोग्यं शुक्रं गर्भाशये रजसा संसृष्टं सत यदा सम्यग् मूर्च्छितं भवति तदा अन्तरिक्षस्य--आकाशतन्मात्रस्य गुणं पूर्वमादाय सत्वसाधनश्चेतनाधातुः संसृष्टं बीजं गर्भाकारेण परिणामयितुमारभते। तदुक्तम्-

तत्र पूर्वं चेतनाधातुः सत्वकरणो गुणग्रहणाय प्रवर्तते, स हि हेतुः, कारणं निमित्त मक्षरं कर्त्ता मन्ता वेदिता, बोद्धा द्रष्टा धाता ब्रह्मा विश्वकर्मा विश्वरूपः पुरुषः प्रभवोऽव्ययो नित्यः गुणी ग्रहणं प्रधान मव्यक्तं जीवोज्ञः पुद्गल श्चेतनावान् विभुर्भूतात्मा चेन्द्रियात्मा चान्तरात्मा चेति। स गुणोपादानकालेऽन्तरिक्षं पूर्वतरमन्येभ्यो गुणेभ्य उपादत्ते, प्रलयात्यये सिसृक्षु भूतानि अक्षरभूतः सत्वो-

पादानः पूर्वतरमाकाशं सृजति, ततः क्रमेण व्यक्ततरगुणान् धातून् वाय्वादिकांश्चतुरः, तथा देहग्रहणेऽपि प्रवर्त्तमानः पूर्वतरमाकाशमेवोपादत्ते, ततः क्रमेण व्यक्ततरगुणान् धातून् वाय्वादिकांश्चतुरः, सर्वमपि तु खल्वेतद् गुणोपादानमणुना कालेन भवति ॥ च–शा–अ–४ ॥

प्रलयादनन्तरं सर्गकाले यथा हिरण्यगर्भः अन्येषां चतुर्णां गुणग्रहणात्प्रागन्तरिक्षतत्त्वमेवोपादत्ते, तद्विना चतुर्णामन्येषां स्थितेरप्यसंभवात् भूतचतुष्टयस्य चाकाश एव प्रलयः आकाशादेवोत्पत्तिरिति श्रवणात् अवकाशभूतमन्तरिक्षं च विना गर्भजननयोग्यरजःसंसृष्टशुक्रस्य अभिषवणासंभवात् गर्भाशयरूपावकाशाधिष्ठानात् पूर्वमाकाशगुणोपादानमेव संपद्यते। ततश्च गर्भाशयगते आकाशे धारणगुणेन वायुना धृतं तद्बीजं रजःशुक्रसंयोगात् सजातीय गर्भमारभते, स एव वायुः अङ्गप्रत्यङ्गविभागेन सजातीयानेव स्वायतनविशेषानारभते, अङ्गप्रत्यङ्गविभागकरणेन गर्भस्य आमगर्भरूपेण धारणकर्मकर्तृत्वाद् तस्यैव वायोः धातुसंज्ञा भवति, स च पुनः अङ्गप्रत्यङ्गपोषणरूपान्नरसवहनकर्मणे सदागतित्वात् निरन्तरं उद्युक्तः सन् हृदयगुदनाभिस्वरयन्त्रसकलशरीरव्यापि त्वगिन्द्रियाधिष्ठानेषु पञ्चधा विभक्तः सन् प्रस्पन्दनोद्वहनपूरणविवेकधारणलक्षणः शरीरं धारयति, तत्र शरीरस्य चलनात्मकं यत् प्रस्पन्दनाख्यं कर्म तद् व्यानाख्यात् वायोर्भवति, इन्द्रियार्थानां धारणात्मकं यद् उद्वहनाख्यं कर्म तद् उदानाख्याद् वायोर्भवति, आहारादिना यत् पूरणाख्यं कर्म तत् प्राणाख्याद् वायोर्भवति,

रसमूत्रपुरीषादीनां पृथक्करणात्मकं विवेकाख्यं नाम यत् कर्म तत् समानाख्यवायो र्भवति, एवं शुक्रमूत्रादीनां वेगकाले कर्षणम् अवेगकाले च धारणं तद् अपानाख्यवायोर्भवति, एवं पञ्चधा विभक्तः वायुः शरीरयात्रानिर्वाहार्थं पृथक् पृथक् कर्माण्यातनुते, अथवा श्वासप्रश्वासादिभावेन चलनाख्यं, दोषधातुमलानामितस्ततोनयनरूपमुद्वहनाख्यं, आहाररसादीनां स्वेषुस्वेष्वाशयेषु नयनरूपं पूरणाख्यं रसमूत्रपुरीषाणां पृथक्करणरूपं विवेकाख्यं, शरीरयन्त्रस्य च धारणात्मकं धारणाख्यं कर्म, स एव पञ्चधा विभक्तः वायुः करोति शरीरनिर्वाहार्थं च एतानि कर्माणि कुर्वन् स वायुः दोषसंज्ञयोच्यमानोऽपि धातुसंज्ञामेव लभते इति ॥

एवं पित्तमपि "रागपक्त्योजस्तेजोमेधोष्मकृत् पित्तं पञ्चधा प्रविभक्तं अग्निकर्मणाऽनुग्रहं करोति सु-सू अ० १९ ॥ आहारपरिणामकरेषु तु भावेषु ऊष्माऽपि परिगणितः, ऊष्माणं विना रसादिधात्वन्तरपरिणाम एव न भवति, स चैष ऊष्मा चरमधातौ शुक्रे सौम्येऽप्यनुवर्तमानः स्वीयोष्मणोऽंशेन च वर्तमानः आग्नेयगुणेन आर्तवेन संसृज्यमानः मातुरंशमयानि हृदयादीन्यारब्धुं यतते, तद्वत् वायुनानुगतमपि पित्तं आहारस्य रसरूपतार्थं योग्येन्धनोपलब्ध्यर्थं च स्वाधिष्ठानं अग्न्याशयमेवावतिष्ठते, तत्स्थं च सत् रागपक्त्योजस्तेजोमेधोष्मकृद् भवति ! रसस्य रञ्जकत्वेन रक्तस्वरूपप्रापणत्वेन यकृत्स्थं पित्तं रागं करोति, आहारस्य पाककर्तृत्वात् पक्तिरूपं कर्म करोति, तत्तु पित्ताशये तिष्ठत् स्वतन्त्रमेव पित्तं तत्कर्म करोति, पुनश्च तदेव पित्तं स्वांशेन हृदिस्थं सत् ओजः-

साधकं भवति, पुनश्चतदेव पित्तं स्वांशेन लोचनस्थं सत् तेजःकृत् दृष्टिकृद् भवति, पुनश्चतदेवपित्तं स्वांशेन त्वचिस्थितं सत् ऊष्मकृद् भवति शरीरे स्पृष्टे सति या ऊष्णता त्वचि प्रतीयते सोष्णता स्वांशेन त्वचिस्थितभ्राजकाख्यपित्तकृतैव, एवं शरीरे रागपक्त्योजस्तेजो-मेधोष्मकृत् पञ्चधा विभक्तं पित्तं स्वानुरूपकर्मणा क्रमेण रञ्जक-पाचक, आलोचक, साधक, भ्राजक–संज्ञाः लभते चेतनाधिष्ठिते शरीरे रागपक्त्यादिकर्मणां सदैव दृश्यमानत्वात्, तानि च कर्माणि पित्तादन्येन भावेन कर्तुमशक्यत्वात् तदारब्धधकर्मभि स्तदेव पित्तं दोषसंज्ञयोच्यमानमपिधातुसंज्ञामेव लभते।

एवं श्लेष्माऽपि शरीरारम्भककर्मणि प्रकृतिस्थः सन् सन्धिसंश्लेषण स्नेहनरोपणपूरणबलस्थैर्यकृत् पञ्चधा विभक्तः उदककर्मणाऽनुग्रहं करोति, सन्धिसंश्लेषणं नाम सन्धिबन्धनं तत् करोत्यसौ सन्धि संश्लेषणकृत्, स्नेहनं नाम शरीरे उत्पद्यमाना या स्निग्धता तदात्मकं यत् स्नेहनं तत् करोत्यसौ इति स्नेहकृत्। श्लेष्मणश्च सौम्यत्वाद् व्रणादीनां रोपणमपि करोतीति रोपणकृदपि श्लेष्मैव, शरीरस्य व्याधिभी रिक्तीकृतान् अवयवान् श्लेष्मा धात्वनुगतः पूरयति तेनासौ पूरणकृद् उच्यते, मूर्तिमच्च शरीरं मूर्तिमतैव श्लेष्मणा पूर्यते तत् कार्यं च धात्वादीन् सहायानुपलभ्यैव करोति अतः श्लेष्मणः पूरणकर्तृत्वं सिद्ध्यति। बलं च स्थैर्यं च बलस्थैर्ये तत् करोति इति बलस्थैर्यकृत्, तेषु तेषु धातुषु तत्तत्सारस्य स्थिरीकरणेन यद् बलमुत्पद्यते तादृशं बल-कर्तृत्वं श्लेष्मण एव सिद्ध्यति, एवञ्च त्रिकसन्ध्यादीनां स्थैर्यरूपमपि-दार्ढ्यं स एव श्लेष्मा करोति धातुवहेषु स्रोतःसु तांस्तान् धातून्

स्वकीयश्लक्ष्णतागुणेन स एव स्थिरयति, अतः सन्ध्यादिविभागा दृढीभवन्ति यथा शरीरारम्भके श्लेष्मणि पञ्चधा विभक्ते एवं-विधानि पञ्चकर्माणि दृश्यन्ते, तथैव शरीरस्य धारणापोषणात्मकेऽपि कर्मणि वायुनानुगृहीतः सन् श्लेष्मा पाञ्चभौतिकमिदं शरीरमभिनिवर्त-यति पञ्चधा विभक्तस्य च तस्य श्लेष्मणः इमानि स्थानि ।

आमाशयोरःशिरःकण्ठसन्धयः, स चाशयभेदेन भिन्नः सन् श्लेष्मक क्लेदक बोधक तर्पक अवलम्बक इति संज्ञाः प्राप्नोति पञ्चविधैरपि एतैः श्लेष्मभेदैः स एव श्लेष्मा शरीरं स्निह्यति क्लेदयति, बोधयति, तर्पयति, अवलम्बयते च, एतैः पुनः पञ्च विधैः कर्मभिः शरीरमिदं धारयति इत्यतः दोषसंज्ञया व्यवह्रियमा-णोऽपि धातुसंज्ञामेव लभते, एवञ्च आहारस्य परिणामकरेषु भावेषु, क्लेदस्य सहकारिकारणत्वेनोक्तत्वात् तत् क्लेदनाख्यं कर्म श्लेष्मण एव भवति नान्यस्य इति, अनेन दोषसंज्ञया व्यह्रि-यमाणा अपि एते त्रयो वातपित्तश्लेष्माणो धातुसंज्ञां लभन्ते इति सिद्धम्.

शुक्रमेव गर्भसमुद्भवाय धीयते—आरोप्यते, तस्माच्च चिकित्सा धिकृतः षड्धातुसमुदितः पुरुषः प्रभवति, ते च षड्धातवः पृथिव्य-प्तेजोवाय्वाकाशचेतनाधातुसंज्ञकाः तेषां षण्णां के गर्भशरीरारम्भकाः स्युरिति विचार्यमाणे प्रथमं वायुतेजोजलक्षितीनां गर्भारम्भकशुक्रे गुणवत्तया स्वीकारात् तच्छुक्रं गर्भारम्भकभौतिकगुणवद् भवति, तदुक्तम् चरके—

शुक्रं तदस्य प्रवदन्ति धीरा
यद्धीयते गर्भसमुद्भवाय ।
वाय्वग्निभूम्यब्गुणपादवत्तत्
षड्भ्यो रसेभ्यः प्रभवश्च तस्य ॥

शा. स्था. अ० २ ।

तस्य शुक्रस्य षड्भ्यो रसेभ्यः प्रभवः, आहाररूपेण भुक्तानां खलु षण्णां रसानां आहारपरिणामकरैः "ऊष्मवायुक्लेदस्नेह कालसमयोगाख्यैश्च भावैः रसधातुमारभ्य आहारस्य परिणाम रूपो गर्भसमुद्भवकरश्चरमो यः शुक्राख्यो धातुर्भवति तच्च शुक्रं वाय्वग्निभूम्यब्गुणपादवत् भवति, आरभ्यमाणे पार्थिवे शरीरे पञ्चीकृत न्यायेन वाय्वग्निभूम्यपां गुणाः पादांशेन शुक्रे स्थिता रजसासंसृष्टस्य शुक्रस्य गर्भभावतामापादयन्ति, एतेन स्वांशेन संसृष्टयोः शुक्ररजसो र्वर्तमाना ये वाय्वग्निभूम्यपां भौतिका गुणाः, गर्भशरीरं प्रारभन्ते । न च पाञ्चभौतिके शुक्रे आकाशस्य विद्यमानत्वात् आकाशमपि गुणवत्तया कथमिदं शरीरं नारभते इतिवाच्यम् आकाशस्य व्यापकत्वाद् यथा शुक्रे आकाशांशस्तथैव गर्भाशये, गर्भाशये च प्रवर्तमाने आर्तवेऽपि विद्यते आकाशस्य निष्क्रियत्वाच्च अवकाशदान रूपाकाशगुणस्य सर्वत्रोपलब्धेश्च पाञ्चभौतिकस्यापि गर्भशरीरस्य "वाय्वग्निभूम्यापः इति भूतचतुष्टयी क्रियावती सत्येव गर्भ शरीरमारभते—

आरभ्यमाणे च पार्थिवे गर्भशरीरे भूमिगुणः प्रधानः पञ्ची-

कृतानां भौमानामेव भावानामाकृती रचयितुं शक्नुवन्ति, वायुतेजोजलानि गर्भशरीररचनां प्रति भूमिगुणप्रधानेन शुक्रेण अग्निगुणप्रधान स्यरजसः संसृष्टत्वात् शुक्रगतानां च गर्भशरीरारम्भकवायुतेजो-जलानां परस्परोपकारात् परस्परानुग्रहात् परस्परानुप्रवेशाच्चेदं गर्भशरीरमारभ्यते.

तत्रादौ गर्भाशये वायुना आकृष्टस्य गर्भजननयोग्यशुक्रस्य रजसासंसृष्टस्य उत्पत्तिधर्मबीजरूपतां प्राप्तस्य जलीयतत्त्वेन मातुराहाररसस्य क्लेदरूपेण जलीयभागेन शुक्रस्य आर्द्रीकरणेन, आग्नेयगुणेन रजसा संसृष्टस्य तस्यैव बीजरूपस्य गर्भारम्भकशुक्रावयवपरिपाककर्मणा अग्न्यंशभूतेनोष्मणा च दृढीकृतस्य एतस्य बीजरूपशुक्रस्य वायुरेवादौ गर्भस्वरूपम् अङ्कुरमुत्पादयति, येन रसवहनाडया प्रतिबद्धः स गर्भाङ्कुरः गर्भपोषणादिना अङ्गप्रत्यङ्गविभाग कर्मणा च मातुराहाररसदाने साधनरूपो भवति, एवं रजसा संसृष्टं गर्भाशयगतं बीजरूपशुक्रम् अङ्कुरीभावादनन्तरं गर्भसंज्ञां प्राप्नुवत् सत् प्रथमे मासि कललाकारं जायते तस्यामवस्थायां गर्भः अव्यक्त विग्रहः सदसद्भूताङ्गावयवः संमूर्च्छित एव तिष्ठति तदुक्तम्—

तत्र प्रथमे मासि कललं जायते, द्वितीये शीतोष्मानिलैरभिप्रपच्यमानानां महाभूतानां संघातो घनः संजायते यदि पिण्डः पुमान् स्त्री चेत् पेशी, नपुंसकं चेदर्बुदमिति, तृतीये हस्तपादशिरसां पञ्च पिण्डका निर्वर्तन्ते अङ्गप्रत्यङ्गविभागश्च सूक्ष्मो भवति, चतुर्थे सर्वाङ्गप्रत्यङ्गविभागः प्रव्यक्तो भवति, गर्भहृदयप्रव्यक्तीभावा-

चेतनाधातुरभिव्यक्तो भवति कस्मात् ? तत्स्थानत्वात् ॥ पञ्चमे मनः प्रतिबुद्धतरं भवति, षष्ठे बुद्धिः, सप्तमे सर्वाङ्गप्रत्यङ्गविभागः प्रव्यक्ततरः, अष्टमे अस्थिरीभवति ओजः, तत्र जातश्चेन्न जीवेन्निरोजस्त्वात्, नैर्ऋतभागीत्वाच्च ॥ नवमदशमैकादशद्वादशानामन्यतमस्मिन् जायते, अतोऽन्यथा विकारी भवति ॥ सु. शा. स्था. अ. ४ ॥

पुनश्च “ मातुस्तु खलु रसवहायां नाड्यां गर्भनाभिनाडी प्रतिबद्धा, साऽस्य मातुराहाररसवीर्यमभिवहति तेनोपस्नेहेन अस्य (गर्भस्य) अभिवृद्धिर्भवति, असंजाताङ्गप्रत्यङ्गविभागम् आनिषेकात् प्रभृति सर्वशरीरावयवानुसारिणीनां रसवहानां, तिर्यग्गतानां धमनीनां उपस्नेहो जीवयति ॥ सु. शा. स्था. अ. ४ ॥

उपस्नेहो जीवयतीत्युक्तत्वाद् यथा पूर्णसरःसलिलोपस्नेहः तीरजाततरुकदम्बकं जीवयति, तद्वत् प्राणधारणां-प्राणिनामभिव्यक्त्यर्थं धमनीनामङ्गप्रत्यङ्गविभागस्य सिद्धये यत् पोषणाख्यं कर्म तत् करोति ॥ तथा च भोजः ।

गर्भो रुणद्धि स्रोतांसि रसरक्तवहानि वै ।
रक्ताज्जरायुर्भवति नाडी चैव रसात्मिका ॥
सा नाडी गर्भमाप्नोति तया गर्भस्य वर्धनम् ।
यद्यदश्नाति माताऽस्य भोजनं हि चतुर्विधम् ।
तस्मादन्नाद्रसीभूतं वीर्यं त्रेधा प्रवर्तते ।
भागः शरीरं पुष्णाति स्तन्यं भागेन वर्धते ॥

गर्भः पुष्यति भागेन वर्धते च यथाक्रमम् ।
गर्भं कुल्येव केदारं नाडी प्रीणाति तर्पिता ॥

मातू रसरक्तवहानि स्रोतांसि गर्भो रुणद्धि प्रतिरुद्धाच रक्तवहात् स्रोतसो यद्रक्तं गर्भाभिमुखं प्रवर्तते तस्माज्जरायुर्भवति, मातू रसात्मिकां च नाडीं गर्भो रुणद्धि सैव रसात्मिका नाडी गर्भमाप्नुवती गर्भस्य वर्धनं करोति, तत्र रसस्य ये त्रयोऽशाः संभवन्ति तेषामेकतमेन अंशेन मातुः शरीरं पुष्यति, अन्येन च रसांशेन स्तन्यप्रवृत्ति र्भवति, स्तन्यप्रवृत्तिर्नाम अत्र गर्भावस्थायां स्तन्यारम्भकग्रन्थीनां स्तन्योत्पादनरूपं जन्मोत्तरकालं स्तन्यप्रवर्तकारम्भकरं कर्म, अपरेण च तृतीयेन रसवीर्यांशेन गर्भः पुष्यति ॥ अयं प्रकारः शिष्यबुद्धिवैशद्यार्थमेव प्रपञ्चितः ।

चरकेऽपि—द्वितीये मासि घनः संपद्यते, पिण्डः पेशी—अर्बुदं वा इति उक्तम् ॥ तत्र पाञ्चभौतिकबीजस्य घनतां के के भावाः संपादयन्ति इति विचार्यमाणे, सुश्रुतोक्तरीत्या द्वितीये मासि शीतोष्मानिलैरभिप्रपच्यमानानां महाभूतानां संघातो घनः संपद्यते इत्युक्तत्वात् , चरकेच आहारपरिणामकराणां भावानां ऊष्मवायुक्लेदानां प्राधान्यात् चरकोक्तः क्लेदधर्मः सुश्रुतोक्तश्च शीतधर्मः गर्भशरीरे जलीयमहाभूतारम्भकः श्लेष्मा एव सिद्ध्यति, एवं भौतिकानां तत्त्वानां संघातरूपकार्यकरणात् वायुरपि प्रधानतया मूर्त्यारम्भकात्मकं कर्म कुर्वन् गर्भबीजस्य परिणामने ऊष्मसहकृत एव गर्भाङ्कुररूपं गर्भजननरूपकार्यं कुरुते, ऊष्माऽपि गर्भस्य रागपक्त्यादिकं कर्म कुर्वन्

गर्भे मातुराहाररसपरिणामं कुर्वन् वायुसंपृक्तः गर्भावयवान् ... तनुते, पाञ्चभौतिकयोः गर्भशरीरारम्भकयोः कफानिलयोः अपि ऊष्माऽधिगम्यते, अनेन ऊष्मसहकृतयोः कफानिलयोरपि पाञ्चभौतिकतत्त्वानां परिणामहेतुत्वं निर्दिष्टं भवति तदुक्तं चरके—भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः " इति।

अनेन गर्भशरीरारम्भकाः वातपित्तश्लेष्माणः गर्भपोषणाः सर्वाङ्गसंपत्तिकराश्च भवन्ति, अत एव दोषसंज्ञाऽपरपर्याया अपि एते त्रयः गर्भारम्भकत्वात् गर्भशरीरधारणकर्तृत्वात् प्रसवाददनन्तरं च बालसंज्ञां लभमानस्य च शरीरस्य पोषणाख्यकर्मसंपादनाच्च धातुसंज्ञामपि लभन्ते इतिसिद्धम्, दोषसंज्ञाश्च ते यथा प्राप्नुवन्ति तदग्रे प्रतिपादयिष्यामः। सांप्रतम् ते वातपित्तश्लेष्माणः आशयभेदैः भिन्नसंज्ञाः प्राप्नुवन्तः कथमेनच्छरीरमभिनिर्वर्तयन्ति तदेतत् प्रतिपादयामः-गर्भधारणाद् द्वितीये मासि मातुः रसांशादानादङ्कुरितः पिण्डाकृतिः स गर्भोऽवतिष्ठते इत्युक्तं, तत्र ऊष्मानुग... वायुः बीजगतावयवभेद कल्पनासिद्ध्यर्थं आशयसिद्ध्यर्थं . पिण्डगतमेदोंशमादाय स्रोतांसि कल्पयति तदुक्तम्—

अनुप्रविश्य पिशितं पेशीर्विभजते तथा।
मेदसः स्नेहमादाय सिरास्नायुत्वमाप्नुयात्। २९
सिराणां तु मृदुः पाकः स्नायूनां च ततः खरः।
आशयाभ्यासयोगेन करोत्याशयसंभवम् ॥ ३० ॥

सु. शा. स्था. अ.

ऊष्मणानुगतोवायुः तत् पिण्डाकृतिस्वरूपं पिशितमनुप्रविश्य शरीराशयारम्भकाः पेशीरादौ विभजते, पुनश्चाशयनिर्म्माणाय तास्वेव मांसपेशीषु मेदोंऽशस्नेहभूता मृदुपाकाः सिरा निर्मिमीते मेदोऽंशस्नेहस्य खरपाकभूतांश्च स्नायून् निर्मिमीते रसरक्तवहाणां सिराणाम् रसरक्तयोरिव तद्वाहिनीनां मृदुपाकापेक्षितत्वात् स्नायूनां च पुनः बन्धनभूतानां शरीरावयवव्यवस्थितिकराणां खरपाकापेक्षितत्वात् मेदोऽंशस्नेहस्य यः खरपाकः तेनैव स्नाय्वो निर्मीयन्ते इति प्रतीतिः। एवं शिरास्नायूभेदै विभक्तासु गर्भपिण्डजन्यपेशीषु ऊष्मसहकृतो वायुः आशेते-आशय्य च आशयविभागप्रणयनरूपेण स्वकीयस्वभावयोगेन आशायानां संभवमुत्पत्तिं करोति, एव मूष्मानुगत एव वायुः मातुरंशभूतं शोणितकफप्रसादजं हृदयं निर्मिमीते यस्मिन् महदहंकारमनःसमेतस्य प्राणाख्यां लभमानस्य चिच्छक्त्युपबृंहितस्य वायोराजीवनमधिष्ठानं रजोगुणोपेतपंचभूतैः संसृष्टो वायुः अदृष्टकर्मवशात् महदहंकारमनोगुणानुपलभ्य यदा हृदयावच्छेदेन प्रकृष्टं अनिति-गतिं करोति तदाऽसौ वायुः 'प्राणसंज्ञां' बिभर्ति ते च भिन्नभिन्नकार्यकर्तारो भूत्वा प्राणापानसमानोदानव्यानसंज्ञां लभते त एते निर्विकाराः सन्तः शरीरस्यास्य जीवन रूपधारणकार्यकर्तृत्वाद् धातुसंज्ञां लभन्ते, प्रक्रिया चैषा सांख्य कारिकायामित्थं वर्णिता—

स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या।
सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च॥

सां—का—२९॥

अन्तःकरणानि नाम अन्तःसाधनानि महदहङ्कारमनःसमाख्यानि तेषां वृत्तिः व्यापारः द्विधा भवति। यदा एतेषां महदहङ्कारमनसां—असामान्यो व्यपारस्तदा महतः अध्यवसाये निश्चयात्मिकायां बुद्धौ एव असामान्यम् असाधारणं नाम, एवं अहङ्कारस्यापि यदा असाधारणो व्यापारोऽधिगन्तव्यश्चेत्तदाऽ अभिमानोदर्कं परिणमति, मनसश्च यदा असाधारणो व्यापारः वृत्याख्योऽधिगन्तव्यश्चेत्—तदा संकल्पाख्यवृत्त्यात्मकमेव मनः, इति स्वेषां महदहङ्कारमनसां लक्षणानाम् इदं असामान्यं लक्षणम् भवति। यदा च तेषामेवान्तःकरणानां महदहङ्कारमनसां क्रियोत्पत्तौ सामान्येन साधकतमत्वेनाभिमतानां सामान्यकरणवृत्तिरुत्पद्यते तदैव पञ्च वायवः प्राणादिसंज्ञा बिभ्रति। एतेन वायुतुल्यसंचारित्वेन वायुवदाभासमानाः प्राणादयः पञ्च, त्रयाणामपि महदहङ्कारमनसां करणानां सामान्या वृत्तिः; सा चैषा अन्तःकरणत्रयवृत्तिः महदहङ्कारमनसां व्यापारो नाम जीवनम् प्राणानां शक्तिरिति फलितम्, तद्भावे अन्तःकरणत्रयवृत्तौ सत्यां भावाद् जीवनरूपकार्यस्य निष्पन्नत्वात्, तदभावेच अन्तःकरणत्रयस्य व्यापाराभावे च जीवनरूपव्यापारस्य अभावात् [इति सांख्य तत्त्वकौमुद्यां वाचस्पतिमिश्र बालारामोदासीनौ] तदुक्तम् चरकसंहितायाः सूत्रस्थानीये वातकलाकलीये—

यानि तु खलु वायोः कुपिताकुपितस्य शरीराशरीरचरस्य च शरीरेषु चरतः कर्माणि बहिः शरीरेभ्यो वा भवन्ति तेषामवयवान् प्रत्यक्षानुमानोपदेशैः साधयित्वा नमस्कृत्य वायवे यथाशक्ति प्रव-

व्याम:—वायुस्तन्त्रयन्त्रधरः, प्राणोदानसमानव्यानापानात्मा, प्रवर्तकश्चेष्टानामुच्चावचानां, नियन्ता प्रणेता च मनसः सर्वेन्द्रियाणामुद्योजकः सर्वेन्द्रियार्थानामभिवोढा, सर्वशरीरधातुव्यूहकरः, सन्धानकरः शरीरस्य, प्रवर्तको वाचः, प्रकृतिः स्पर्शशब्दयोः, श्रोत्रस्पर्शनयोर्मूलं, हर्षोत्साहयोर्योनिः, समीरणोऽग्नेः, दोषसंशोषणः, क्षेप्ता बहिर्मलानां, स्थूलाणुस्रोतसां भेत्ता, कर्त्ता गर्भाकृतीनां, आयुषोऽनुवृत्तिप्रत्ययभूतो भवति अकुपितः।

कुपितस्तु खलु शरीरे शरीरं नानाविधैर्विकारैरुपतपति, बलवर्णसुखायुषामुपघाताय मनो व्याहर्षयति, सर्वेन्द्रियाण्युपहन्ति विनिहन्ति गर्भान्, विकृतिमापादयति, अतिकालं धारयति, भय शोकमोहदैन्यातिप्रलापाञ्जनयति प्राणांश्चोपरुणद्धि।

प्रकृतिभूतस्य खल्वस्य लोके चरतः कर्माणीमानि भवन्ति तद्यथा धरणीधारणं, ज्वलनोज्वालनम्, आदित्यचन्द्रनक्षत्रग्रह गणानां सन्तानगतिविधानम्, सृष्टिश्च मेघानाम्, अपां विसर्गः, प्रवर्तनं स्रोतसां, पुष्पफलानां चाभिनिर्वर्तनम्, उद्भेदनं चौद्भिदानाम ऋतुनां प्रविभागः प्रविभागो धातूनाम, धातुमानसंस्थानव्यक्तिः बीजा भसंस्कारः, शस्याभिवर्धनम्, अविक्लेदोपशोषणे, अवैकारिक विकाराश्चेति ॥ च–सं–सू–स्था–अ० १२ ॥

एवं लोकशरीरनियामकस्य वायोः कर्माण्यभिधाय शरीर नियामकस्य शरीरे च संचरत एतस्य लक्षणस्थानानि प्रतिपादयामः सुश्रुते वातव्याधिनिदाने तावत्

देहे विचरतस्तस्य लक्षणानि निबोध मे ।
दोषधात्वग्निसमतां संप्राप्तिं विषयेषु च ॥
क्रियाणामानुलोम्यं च करोत्यकुपितोऽनिलः ॥ १ ॥

देहे पाञ्चभौतिके शरीरे विचरतस्तस्यवायोरिमानि लक्षणानि, अकुपितः—स्वप्रकृत्यारम्भकः एष वायुः वात्तपित्तकफसंज्ञा लभमानानां त्रयाणां दोषाणां रसादीनां सप्तधातूनां, उपधातूनां, मलानां जाठराग्नेश्च समतां—व्यवस्थितिकरणात् शरीरस्य पोषणधारणादि-स्थापनरूपां समीकरणक्रियां करोति, विषयेषु शब्दस्पर्शरूपरसगन्धाख्येषु संप्राप्तिं तदुपलम्भरूपं ग्रहणं च करोति, कायवाङ्मानसीनां च क्रियाणामानुलोम्यं स्वास्थ्यपालनरूपं कर्म करोति ॥

तत्र निदर्शनमाह—तत्रैव वातव्याधिनिदाने—

यथाग्निः पञ्चधा भिन्नो नामस्थानात्मकर्मभिः ।
भिन्नोऽनिलस्तथा ह्येको नामस्थानक्रियामयैः ॥ ११ ॥

पित्ताशयगतो जाठरानलः यथा नाम्नां स्थानानाम्, आत्मकर्मणां च भेदैः भिद्यते, तथा शरीरारम्भकधारणगुणलक्षण-मुख्यस्थानभूते हृदये तिष्ठन् स्थानान्तरेषु तत्कर्मसंपादनाय स्थितिं लभमानः, नाम्नां, स्थानानां क्रियाणां तत्तद्विकृतिजन्यानां चामयानां भेदैः भिन्नो भवति, तस्य च भेदभिन्नस्य नामानि, स्थानानि, क्रियाविशेषा स्तज्जन्या व्याधिविशेषाश्च सुश्रुतोक्तरीत्या अभिधास्यामः । सुश्रुते वातव्याधिनिदाने तावत्.

अपानः पक्वाधानालयः समीरणः, स चायं काले वेगप्राप्त्यवसरे, शकृत् मूत्रं–शुक्रं गर्भं आर्तवञ्च अधस्तात् कर्षति, अयं चापानः क्रुद्धः सन् घोरान् अश्मर्यादीन् बस्त्याश्रयान् तादृशांश्च भगन्दरार्शःप्रभृतीन् रोगान् कुरुते ॥ एतेन शकृन्मूत्रशुक्रगर्भार्तवाकर्षकत्वे सति पक्वाधानालयो यः स अपान इति लक्षणं भवति ॥

क्रमप्राप्तं पित्तं तद्धर्मश्च सांप्रतं विचार्यन्ते । चरके वातकलाकलीये वायुतत्त्वावधारणानन्तरं भगवान् मरीचि रुवाच— "अग्निरेव शरीरे पित्तान्तर्गतः कुपिताकुपितः शुभाशुभानि करोति, तद्यथा–पक्तिमपक्तिं दर्शनमदर्शनं, मात्रामात्रत्वमूष्मणः, प्रकृतिविकृतिवर्णौ शौर्यं भयं क्रोधं हर्षं मोहं प्रसादमित्येवमादीनि चापराणि द्वन्द्वानीति ॥ ११ ॥

एवमग्न्याशयः पित्तं, जाठरानलात् पित्तस्य भेदधर्मस्वीकारेऽपि समानगुणधर्मवत्त्वात् पित्तस्य अग्नेश्च प्रायः समानजातीय कार्यकर्तृत्वात् अग्निपित्तयोरभेदेऽपि आश्रयाश्रयिवत् भेदस्तु सिद्ध एव । यथा लौकिकोऽप्यग्निः स्वाश्रयभूतानि इन्धनानि विहाय स्थातुं न शक्नोति तथैव भगवान् जाठरानलोऽपि स्वाश्रयं पित्तं विहाय स्थातुं न शक्नोति, अतः अग्निपित्तयोः तादात्म्यसम्बन्धेऽपि सत्तैक्याद् ब्रह्मतद्विवर्तयोरिव भेदः सिद्ध्यत्येव ; "तच्च पित्तं अदृष्टहेतुकेन विशेषेण पक्वामाशयमध्यस्थं सत् चतुर्विधमन्नपानं पचति, विवेचयति च दोषरसमूत्रपुरीषाणि, तत्रस्थमेव चात्मशक्त्या शेषाणां पित्तस्थानानां शरीरस्य चाग्निकर्मणाऽनुग्रहं करोति,

तस्मिन् पित्ते पाचकोऽग्निरितिसंज्ञा, यत्तु यकृत्प्लीह्नोः पित्तं तस्मिन् रञ्जकोऽग्निरिति संज्ञा, स रसस्य रागकृदुक्तः, यत् पित्तं हृदयस्थं तस्मिन् साधकोऽग्निरितिसंज्ञा, सोऽभिप्रार्थितमनोरथसाधनकृदुक्तः, यद्दृष्टयां पित्तं तस्मिन्नालोचकोऽग्निरितिसंज्ञा, स रूपग्रहणाधिकृतः, यत्तु त्वचि पित्तं तस्मिन् भ्राजकोऽग्निरितिसंज्ञा, सोऽभ्यङ्गपरिषेकावगाहावलेपनादीनां क्रियाद्रव्याणां पक्ता छायानां च प्रकाशकः ॥ सु-सू-अ-२१ ॥ एवं पित्तस्य स्थानभेदे नामक्रिये प्रदर्श्य चिकित्सोपयोगि लक्षणं दर्शनीयं। सुश्रुते सूत्रस्थानीये प्रश्नाध्याये-तावत्

पित्तं तीक्ष्णं द्रवं पूति नीलं पीतं तथैव च।
उष्णं कटुरसं चैव विदग्धं चाम्लमेव च ॥ ११ ॥

तत् पित्तं राजिकामरीचवत् तीक्ष्णं तीक्ष्णस्वभावम् अतएव-पैत्तिके ज्वरे तीक्ष्णो वेग उपलभ्यते। पयोवद् द्रवं द्रवधर्मकं, पूति विस्रगन्धि, सामावस्थायां नीलं, निरामावस्थायांपीतं, स्वभावत एव उष्णं कटुरसमपि प्रकृतिस्थं स्वगुणं द्योतयति, विरुद्धपाकोपपन्नं च तद् विदग्धसंज्ञया विकृतत्वा लक्ष्यमाणं अम्लमेव भवति, विदग्धाजीर्णेऽपि उद्गारादय स्तादृशा एव अनुभूयन्ते ॥

अन्नपचन, रसरञ्जन, मेधाप्रज्ञासाधन, द्रव्यगतरूपालोचन, त्वग्गतवर्णभ्राजनाख्यैः पञ्चविधैः कर्मभिरेनच्छरीरमनुगृह्णाति, इत्थं पाचक रञ्जक साधकालोचक भ्राजक भेदैः पञ्चधा विभक्तं पित्तम्—

क्रमप्राप्तः श्लेष्मा तद्गुणाश्च विचार्यन्ते—चरकसंहितायां सूत्रस्थानीये वातकलाकलीये तावत्—

तच्छ्रुत्वा मारिचिवचः काप्य उवाच—सोम एव शरीरे श्लेष्मान्तर्गतः कुपिताकुपितः शुभाशुभानि करोति, तद्यथा दार्ढ्यं शैथिल्यं मुपचयं कार्श्यमुत्साहमालस्यं वृषतां क्लीबतां ज्ञानमज्ञानं बुद्धिं मोहमेवमादीनि चापराणि द्वन्द्वानीति ॥ ११ ॥

तस्य च पुनः श्लेष्मणः स्थानानि—सुश्रुते सूत्रस्थानीय व्रणप्रश्नाध्याये तावत्——

अत ऊर्ध्वं श्लेष्मस्थानान्यनुव्याख्यास्यामः । तत्र, आमाशयः पित्ताशयस्योपरिष्टात्तत्प्रत्यनीकत्वादूर्ध्वगतित्वात् तेजस श्चन्द्र इव आदित्यस्य, स चतुर्विधस्याहारस्याधारः, स च तत्रौदकै र्गुणैः प्रक्लिन्नो भिन्नसंघातः सुखजरश्च भवति ॥ १२ ॥

माधुर्यात् पिच्छिलत्वाच्च प्रक्लेदित्वा त्तथैव च ।
आमाशये संभवति श्लेष्मा मधुरशीतलः ॥ १३ ॥

स तत्रस्थ एव स्वशक्त्या शेषाणां श्लेष्मस्थानानां शरीरस्य च उदककर्मणानुग्रहं करोति, उरःस्थस्त्रिकसन्धारणमात्मवीर्येणान्नरससहितेन हृदयावलम्बनं करोति, जिह्वामूलकण्ठस्थो जिह्वेन्द्रियस्य सौम्यत्वात् सम्यग् रसज्ञाने वर्तते, शिरस्थः स्नेहसंतर्पणाधिकृतत्वात् इन्द्रियाणां आत्मवीर्येणानुग्रहं करोति, सन्धिस्थस्तु श्लेष्मा सर्वसन्धिसंश्लेषात् सर्वसन्ध्यनुग्रहं करोति ॥ १४ ॥

इत्थं उरःस्थः श्लेष्मा—स्वीयेन प्राकृतगुणेन हृदयस्य अवलम्बनं करोतीत्यतः अवलम्बकसंज्ञया व्यवह्रियते, जिह्वामूलकण्ठस्थः सन् विविधान् रसान् बोधयतीत्यतः बोधकसंज्ञया व्यवह्रियते, शिरःस्थः सन् अक्षाणि इन्द्रियाणि तर्पयतीत्यतः तर्पकसंज्ञया व्यवह्रियते, सन्धिषु च वर्तमानः सर्वान् सन्धीन् स्वीयेन प्राकृतगुणेन अनुगृह्णातीत्यतः श्लेष्मक इति संज्ञया व्यवह्रियते, आमाशयस्तु श्लेष्मणः प्रधानं स्थानं, तत्रस्थश्च सन् स्वीयैः प्राकृतगुणैः क्लेदनादिकर्मभिः शेषाणि श्लेष्मस्थानानि अनुगृह्णन् चतुर्विधमाहारजातं क्लेदयतीत्यसौ क्लेदकसंज्ञया व्यवह्रियते, एवं क्लेदन अवलम्बन बोधन तर्पण श्लेषणाख्यैः पञ्चविधैः कर्मभिः श्लेष्मा एवमेतच्छरीरमनुगृह्णाति धारयति च । प्रतिपादितं चैतद् "आहारपरिणामकरभाववर्णन रूपे शरीरारम्भक—वातपित्तश्लेष्मणां व्याख्याने ॥ एवं क्लेदक अवलम्बक बोधक तर्पक श्लेष्मकाख्यैः पञ्चविधैर्भेदैः श्लेष्मा व्याख्यातो भवति ।

लिङ्गज्ञानार्थं चिकित्सार्थं च श्लेष्मण इमानि लक्षणानि

श्लेष्मा श्वेतो गुरुः स्निग्धः पिच्छिलः शीत एव च ।
मधुरस्त्वविदग्धः स्याद् विदग्धो लवणः स्मृतः ॥
सु. सू. स्था. १५ अ. ॥

श्लेष्मा वर्णे श्वेतः, माने गुरुः, अन्यस्य पिण्डीकरणे स्निग्धः स्पृष्टे सति पिच्छिलः अङ्गुलिग्राही, तस्य च जलीयद्रव्यारब्धत्वाज्जलस्य च शीतस्पर्शवत्वादसौ श्लेष्मा शीत एव, चकारात् मृदुस्थि-

रादिगुणवानपि भवति, प्रकृतिस्थः अविकृतः मधुरगुणकः, विकारं प्राप्तश्च लवणरसक एव स्यात्.

त एते वातपित्तश्लेष्माणः गर्भस्य दरीदृश्यमानस्यास्य स्थूल शरीरस्य च आरम्भकत्वाद् तयोश्च परस्परानुग्रहरूपेण च धारणाद् धातुसंज्ञयोः विवर्द्धियमाणा अपि गर्भं शरीरं च दूषयन्तीत्यतः दोषसञ्ज्ञां प्राप्नुवन्तीति संक्षेपत उक्तम् । प्रतिपादितं चैतद्भगवता पुनर्वसुना आत्रेयमहर्षिणा—" वातकलाकलीये । "

सर्व एव खलु वातपित्तश्लेष्माणः प्रकृतिभूताः पुरुषमव्यापन्नेन्द्रियं बलवर्णसुखोपपन्नमायुषा महता उपपादयन्ति, सम्यगेवाचरिता धर्मार्थकामा इव निःश्रेयसेन महता पुरुषमिह चामुष्मिंश्च लोके, विकृतास्त्वेनं महता विपर्ययेण उपपादयन्ति ऋतवस्त्रय इव विकृतिमापन्ना लोकमशुभेनोपघातकाले इति " ॥ १३ ॥

तथाचेदं जगद्यथा सोमसूर्यानिलाः धारयन्ति तथैवेदं शरीरमपि तत्स्थानीयाः श्लेष्मपित्तवायवः धारयन्ति, तदुक्तम् ।

विसर्गादानविक्षेपैः सोमसूर्यानिला यथा ।
धारयन्ति जगद्देहं कफपित्तानिलास्तथा ॥

सु. सू. स्था. २१ अ. ॥

समष्टिशरीरेऽपि सोमः सूर्यस्य दक्षिणायने बलवान् सन् वृष्ट्यादिना विविधान् रसान् विसृजति—ददाति तथैव व्यष्टिशरीरे तत्स्थानीय तद्गुणश्च कफोऽपि स्वास्थ्यापेक्षया भगवन्तं जठरानलं

परिरक्षन् व्यष्टिशरीरे बलं विसृजति, बलस्य च विसर्जनं नाम यद् बलदानं तत्कफकृतमेवेति निर्णीतं, तथैव सूर्यस्य उत्तरायणे सोमो हीनगुणो भवति भगवानुष्णरश्मिश्च मकरराशिगतिवशाद् बलवान् भवति, तथैव तत्स्थानीयं तद्गुणं च पित्तमपि बलवत् संजायते अस्य च बलवत्ता हेमन्ते उपयुक्तान्नपानादिसंप्रक्लिन्नलस्य आदाने अल्पीकरणे संपद्यते, अतः आदानं नाम यद् बलस्य संकोचकरं ग्रहणं तत्तु व्यवस्थितपित्तकृतमेवेति निर्णीयते, अत एव ग्रीष्मकाले मधुररसादीनां विशिष्टतया उपयोगः, बलसंरक्षणाय स्वास्थ्यपालनाय चोपदिष्ट आयुर्वेदशास्त्रे। एवं वायोरपि योगवाहित्वाद् विक्षेपकरत्वाच्च, शीतकाले शीतेन संसृष्टः शीतं विक्षिपति, ग्रीष्मकाले च औष्ण्येन संसृष्टः औष्ण्यं विक्षिपति, आदौ वर्णित स्वरूप एष भगवान् वायु यदा शीतोष्ण्ये न विक्षिपेत्तदा शीतार्ताः शीतेनैव म्रियेरन् उष्णार्ताश्च औष्ण्येनैव दह्येरन् अतः शीतकाले शीतधर्मिणं श्लेष्माणं यदा वायुर्धूनयति तदैव व्यष्टिशरीराणि शीत विरुद्ध उष्णतिक्तकटुकादीन् भक्ष्यान् वाञ्छन्ति। यदा च ग्रीष्मकाले रविः स्वभाभि र्जगतः स्नेहमुपादत्ते वायवश्च तीव्ररूक्षाः सन्तः उपशोषयन्ति शिशिरवसन्तग्रीष्मेषूत्तरायणऋतुषु यथा क्रमं च रौक्ष्यमुत्पादयन्ति च रूक्षान् रसान् तिक्तकटुकषायांश्च अभिवर्धयन्तो नृणां दौर्बल्यमापादयन्ति, एवं सूर्यधर्मकमपि पित्तं उत्तरायणप्रारम्भे तीव्ररूक्षधर्मेण वायुना योगं प्राप्नुवत् तीव्रं शरीरशोषणाय प्रवृत्तमपि हेमन्तनिचितश्लेष्मणा प्रतिरुद्धत्वात् रसवाहिस्रोतसां कफस्थानेषु कफं व्याकुलीकरोति पश्चाच्च तीव्रतरे

वायुसंयोगे सति तदैव पित्तमुत्क्लेशयत्येव श्लेष्माणं, ग्रीष्मे च निम्नगानां जलानीव रसकफवाहीनि स्रोतांसि पित्तस्य तीव्रतम घर्मेण रसादिकान् धातून् उपशोषयन्ति, अतएव ग्रीष्मे जगद्विवेदं शरीरमपि शुष्कं कृशं च लक्ष्यते—वायोश्च संचितत्वान्नैतादृशं शरीरं पुष्यति यथा वर्षाकाले हेमन्ते च पुष्यते अत एवोक्तम्

आदावन्ते च दौर्बल्यं विसर्गादानयोर्नृणाम् ।
मध्ये मध्यबलं प्रोक्तं श्रेष्ठमग्रे विनिर्दिशेत् ॥

च. सू. अ. ६ ॥

विसर्गकालस्य आदौ वर्षाकाले आदानकालस्य अन्ते ग्रीष्मकाले नृणां दौर्बल्यमेव भवति, विसर्गस्य मध्ये वसन्तकाले मध्यबलं नातिक्षीणं नातिवृद्धं प्रोक्तम्, तथैव विसर्गकालस्य अन्ते हेमन्ते श्रेष्ठं बलं आदानकालस्य च अग्रे प्रथमे ऋतौ शिशिर प्रारम्भे श्रेष्ठबलं नृणां पथ्याहारविहारैर्भवतीति स्पष्टोऽर्थः—

सांप्रतं शरीरारम्भकालाद् धातुसंज्ञा बिभ्राणो वातपित्तश्लेष्माणः क्रमेण हृदि—अग्न्याशये—आमाशयेच प्रधानतया तिष्ठन्तः शरीरस्य स्वास्थ्यानुकूलां व्यवस्थां संपादयन्तः अपि व्याख्यातलक्षणगुणास्त एव वातपित्तश्लेष्माणः संचयकरत्वाद् हेतुं लभमानाश्च प्रकोपणकरत्वात् चिकित्साविशेषैश्च प्रशमनात्मकत्वाच्च आरम्भका अपि ते दूषणधर्मवत्त्वाद् दोषा एव । एतान् वातपित्तश्लेष्मणः ग्रीष्मादयः ऋतवः संचिन्वन्ति मिथ्याहारविहाराश्च । तद्यथा—

ग्रीष्मरूक्षादयो भावाश्च वातं संचिन्वन्ति, वर्षा एनं प्रकोपयति, शरच्चैनं प्रशामयति । एवं पित्तमपि वर्षा अम्लादयो रसाश्च-भुक्तैः कटुकाम्लैराहारैश्च संचिन्वन्ति, शरदृतौ च एतत् पित्तं प्रकुप्यति-हेमन्तश्चैनच्छामयति । एवं श्लेष्माणमपि हेमन्तः संचिनोति आहारे प्रमाणाधिक्येनोपयुज्यमानाः स्निग्धादयो भावा अपि श्लेष्माणं संचिन्वन्ति, वसन्तः प्रकोपयति, ग्रीष्मश्चैनं शमयति-ते च ऋतवः कथङ्कारं शरीरे विकृतिमापादयन्ति विकृतेरुत्पादका-आरम्भका वा दोषाः के ? के के च रसाः कं कं दोषं शमयन्ति, प्राकृता ऋतवोऽपि निसर्गबलादेतान् त्रीन् दोषान् केन वा प्रकारेण उपशमयन्तो विकृतिग्रस्तमेनच्छरीरं स्वास्थ्येनापदयन्तीति संक्षेपतः वर्ण्यते—

चरके रसविमाने—रसा स्तावत् षट् मधुराम्ललवणकटुतिक्तकषायाः । ते सम्यगुपयुज्यमानाः शरीरं यापयन्ति; मिथ्योपयुज्यमानास्तु खलु दोषप्रकोपणायोपकल्पयन्ति ॥ ४ ॥ तत्र के दोषाः इत्यपेक्षायां तत्रैवाह—" दोषाः पुनस्त्रयो वातपित्तश्लेष्माणः । ते प्रकृतिभूताः शरीरोपकारका भवन्ति, विकृतिमापन्नास्तु खलु नानाविधै विकारैः शरीरमुपतापयन्ति ॥ ५ ॥

तत्र दोषाणां प्रकृतिभूतानां समता का ? का वा दोषाणां कतिविधा वा विकृतिः, कः स्वस्थः कश्च शरीरव्याधिग्रस्तः ? केषु-केषु वा विकारेषु वातपित्तश्लेष्मणां कीदृगन्वयः, कथं वा त एते त्रयः शरीरमेनदुपतापयन्ति, संप्राप्तिमुखेन च कथं व्याध्युत्पादका भवन्तीत्येतत् सर्वमुपपादनीयमेव—

गर्भाशये शरीरावयवानामङ्गप्रत्यङ्गरचनासु येन दोषेण याभ्यां यैर्वा प्रकृतिरारभ्यते तेषां प्रकृत्यारम्भकाणां दोषाणां स्वास्थ्य-पालने अग्निबलापेक्षया यथर्तु उपदिष्टस्थवृत्तानुसार मात्रावत्त्वेन ये आहारविहारादयः स्वदोषारब्धप्रकृतावुपशेरते सा नाम दोषाणां समता, तादृश्यैव दोषसमतया सात्म्याहारविहारैः प्राणिनः सुखं प्राप्नुवन्ति। दोषाणां विकृतिः पुनः संचयप्रकोपपूर्विका भवति, दोषाणां संचयः स्वस्वस्थानेष्वेव भवति, दोषस्थानानि तु व्याख्यात प्रायाणि-प्रकरणवशात् संस्कारोद्बोधनाय पुनरपि निर्दिश्यन्ते, प्राणापानसमानोदानव्यानाख्यस्थानभेदैः पञ्चधाक्रमेण हृदयगुद-नाभिकण्ठसर्वशरीरेषु स्थितिं प्राप्तस्य वातस्य तैस्तैर्भावैः ऋतुवशाद्वा संचितस्य "व्यायामादपतर्पणात् प्रपतनाद् भङ्गात् क्षयात् जागराद् वेगानां च विधारणादतिशुचः शैत्यादतित्रासतः। रूक्षक्षोभ-कषायतिक्तकटुकैरेभिः प्रकोपं व्रजेद्, वायु र्वारिधरागमे परिणते चान्नेऽपराह्णेऽपि च" ॥ इत्येवमादिभिर्हेतुभिर्यदा पञ्चविधाना मेक-तमस्य द्वयोः, त्रीणां, चतुर्णां पञ्चानामपि प्रकोपः संभाव्यते, दोषस्थानेष्वेव दोषाः सचीयन्ते, तत्र संचितानां दोषाणामिमानि लक्षणानि "स्तब्धपूर्णकोष्ठता, पीतावभासता, मन्दोष्मता, चाङ्गानां गौरवमालस्यं चय कारणविद्वेषश्चेति ॥ सु-सू-अ० २१॥

चिकित्सार्हवातस्य, वातव्याधिविकाराणां च श्रोणिगुदे आश्रयः, श्रोणि गुदयोरुपरि अधो नाभेः पक्वाशयः, पक्वामाशय मध्यं पित्तस्य, आमाशयश्च श्लेष्मणः विशेषेण चिकित्साधिष्ठानं, सु. सू. २१ अ.

अव्यापन्नानां खलुवातपित्तश्लेष्माख्यानां दोषाणां स्थानानि पूर्वं निर्दिष्टानि, तेषु दोषस्थानेषु दोषाः संचीयन्ते, दोषाणां संचय प्रकोपोपशमाः ऋतुविभागेन प्रकृत्यैव भवन्ति, तदेतत्प्रतिपादितं सुश्रुते सूत्रस्थानीय ऋतुचर्याध्याये—

तत्र, वर्षास्वोषधयस्तरुण्योऽल्पवीर्या आपश्चाप्रसन्नाः क्षितिमलप्रायाः ता उपयुज्यमाना नभसि मेघावतते जलप्रक्लिन्नायां भूमौ क्लिन्नदेहानां प्राणिनां शीतवातविष्टम्भिताग्नीनां विदह्यन्ते, विदाहात् पित्तसंचयमापादयन्ति, स च संचयः शरदि प्रविरलमेघे वियति, उपशुष्यति पङ्केऽर्ककिरणप्रविलायितः, पैत्तिकान् व्याधीन जनयति। ता एवौषधयः कालपरिणामेन परिणतवीर्या बलवत्यो हेमन्ते भवन्ति, आपश्च प्रसन्नाः स्निग्धा अत्यर्थं गुर्व्यश्च, ता उपयुज्यमाना मन्दकिरणत्वाद् भानोः सतुषारपवनोपस्तम्भितदेहानां देहनामविदग्धाःस्नेहाच्छैत्याद् गौरवादुपलेपाच्च श्लेष्मसंचयमापादयन्ति। स संचयो वसन्तेऽर्करश्मिप्रविलायित, ईषत्स्तब्धदेहानां देहिनां श्लैष्मिकान् व्याधीन् जनयति । ता एवौषधयो निदाघे निःसारा रूक्षा अतिमात्रं लघ्व्यो भवन्त्यापश्च, ता उपयुज्यमानाः सूर्यप्रतापोपशोषितदेहानां रौक्ष्याल्लघुत्वा द्वैशद्याच्च वायोः संचयमापादयन्ति, स संचयः प्रावृषि चात्यर्थं जलोपक्लिन्नायां भूमौ क्लिन्न देहानां प्राणिनां शीतवातवर्षैरितो वातिकान् व्याधीन् जनयति। एवमेष दोषाणां संचयप्रकोपहेतुरुक्तः ॥ सु. सू. अ. ६ ॥

वातप्रकोपणहेतवस्तूक्ताः, पित्तप्रकोपणहेतवोऽपि यथा—

कट्वम्लोष्णविदाहितीक्ष्णलवणक्रोधोपवासातप-
स्त्रीसंपर्कतिलातसीदधिसुराशुक्तारनालादिभिः
भुक्ते जीर्यति भोजने च शरदि ग्रीष्मे सति प्राणिनां
मध्याह्ने च तथाऽर्धरात्रिसमये पित्तं प्रकोपं व्रजेत् ॥

तथाच—

तदुष्णैरुष्णकालेच मेघान्ते च विशेषतः ।
मध्याह्ने चार्धरात्रे च जीर्यत्यन्ने च कुप्यति ॥ सु. सू: २१ अ. ।

श्लेष्मणस्तु संचयो विशेषेण हेमन्ते स्निग्धमधुरादिभावैश्च भवतीति प्राक् प्रतिपादितं, श्लेष्मणः प्रकोपकरास्त्विमे भावाः, ते यथा—

गुरुमधुररसातिस्निग्धदुग्धेक्षुभक्ष्य-
द्रवदधिदिननिद्रापूपसर्पिष्प्रपूरैः ।
तुहिनपतनकाले श्लेष्मणः संप्रकोपः
प्रभवति दिवसादौ भुक्तमात्रे वसन्ते ॥

तथा च—

स शीतैः शीतकाले च वसन्ते च विशेषतः ।
पूर्वाह्णे च प्रदोषे च भुक्तमात्रे प्रकुप्यति ॥

एवं संचयप्रकोपौ उक्त्वा प्रकोपविशेषः दोषप्रसरोऽपि-प्राप्तावसरो-व्याख्येयः स यथा—“ तेषामेभिरातङ्कविशेषैः प्रकुपितानां किण्वोदकपिष्टसमवाय इवोद्रिक्तानां प्रसरो भवति । तेषां वायुर्गतिम-

त्वात् प्रसरणहेतुः सत्यप्यचैतन्ये। स हि रजोगुणभूयिष्ठः, रजश्च प्रवर्तकं सर्वभावानाम्। यथा-महान् उदकसंचयः अतिवृद्धः सेतुमवदार्य अपरेणोदकेन व्यामिश्रः सर्वतः प्रधावति, एवं दोषाः कदाचिदेकशो द्विशः समस्ताः शोणितसहिता वाऽनेकधा प्रसरन्ति। तद्यथा-वातः, पित्तं, श्लेष्मा, शोणितं, वातपित्ते, वातश्लेष्माणौ, पित्तश्लेष्माणौ, वातशोणिते, पित्तशोणिते, श्लेष्मशोणिते, वातपित्तशोणितानि, वातश्लेष्मशोणितानि, पित्तश्लेष्मशोणितानि, वातपित्तकफाः वातपित्तकफशोणितानि, इत्येवं पञ्चदशधा दोषाणां प्रसरः॥ सु. सू. अ. २१॥

न च नियमः स दोषप्रसरः सर्वाण्येवाङ्गानि विकृतिं प्रापयन्ति इति, किन्तु यत्र गात्रप्रदेशे स दोषप्रकोपः प्रसरति तत्रैव विकृतिं जनयति तथा चोक्तम्—

कृत्स्नेऽर्धेऽवयवे वापि यत्राङ्गे कुपितो भृशम्।
दोषो विकारं नभसि मेघवत्तत्र वर्षति॥
नात्यर्थं कुपितश्चापि लीनो मार्गेषु तिष्ठति।
निष्प्रत्यनीकः कालेन हेतुमासाद्य कुप्यति॥
॥ सु. सू. २१ अ० ॥

नभसि आकाशे मेघ इव स दोषः कृत्स्नार्धावयवानामन्यतमे अङ्गे भृशं कुपितः सन् तत्र कृत्स्ने वा अर्धे वा अवयवे वा अङ्गे विकारं वर्षति विकृतिं जनयति, स च दोषः अत्यर्थं कुपितो यदा

न स्यात्तदा मार्गेषु दोषवहेषु दूष्यवहेषु वा खेषु लीनः गूढः सन् तिष्ठति, स च लीनो दोषः, तद्धरणादिरूपां संशोधनरूपां क्रियां नाप्नुयात् तदा हेतुं प्रकोपहेतुं आसाद्य प्राप्य कुप्यति, एवं लीन दोषस्य प्रकोपहेतुबलात् प्रसरो भवत्येव ॥

प्रवृद्धो दोषः यद्यद्दोषस्थानं प्राप्नोति तस्य तस्य दोषस्य स्थानिवत् प्रतीकारश्चोक्तः—यथा पित्तस्थानगतस्य वायोः प्रतीकारः पित्तवद् भवति, पित्तं च यदा कफस्थानं गतं स्यात् तदा तस्यापि कफवत् प्रतीकारः, श्लेष्मा च यदा वातस्थानगतः स्यात्, तदा वातवदेव प्रतीकारः साधनीयः स्यात्, एवं दोषस्य प्रसरवशाद् यत्र यत्र दोषप्रदेशे गमनं तत्र तत्स्थानीयदोषोपक्रम एव स्वास्थ्यकर इति फलितं। अयं प्रकारश्च अवश्यमेव भिषग्भि र्ज्ञातव्यः।

तदुक्तम्—

संचयं च प्रकोपं च प्रसरं स्थानसंश्रयम्।
व्यक्ति भेदं च यो वेत्ति दोषाणां स भवेद्भिषक् ॥

एवं वातपित्तश्लेष्माख्यानां त्रयाणां दोषाणां संचयप्रकोप प्रसरस्थानसंश्रयादीन् संक्षेपतो व्याख्याय, तेषां विकृतिः कतिविधा भवतीति वर्णनीयं, विकृतिश्च दोषाणां दुःखरूपैव भवति तस्याश्च दुःखरूपविकृतेः शरीरमनोभ्यां संयुज्यमाना दुःखविशेषाः व्याधिसंज्ञां लभन्ते तदुक्तम् "तद् दुःखसंयोगा व्याधय" इति—

तच्च दुःखं आध्यात्मिकाधिभौतिकाधिदैविकभेदै स्त्रिविधं, व्याध-

यश्च पुनः सप्तविधाः, त्रिविधमपि दुःखं सप्तविधे व्याधौ उपनिपतति दोषविकृजन्यसप्तविधव्याधिषु प्रतिकूलवेदनीयत्वात्, दोषविकृति-जन्यव्याधयो मनःशरीरे दुःखयन्ति, शरीरस्य दोषारम्भकत्वात् दोषाणां च सकलशरीरव्यापकत्वाच्च मनोऽहंकारयोश्चास्मिन् स्थूले—पाञ्चभौतिके शरीरे अध्यस्तत्वाच्च, इमे व्याधयो मे दुःखकराः संजाता इति प्रतीतेरनिवार्यत्वात्, तयोः मनःशरीरयो र्ये प्रतिकूलवेदनीया दुःखसंयोगास्त एते व्याधिसंज्ञका भवन्तीति फलितोऽर्थः ॥

एवं सप्तविधेष्वपि व्याधिषु दोषाव्यभिचरितत्वं सिद्ध्यत्येव, दोषाव्यभिचरित्त्वं नाम दोषानन्तरा अनुत्पत्तिमत्त्वं, सप्तविधा अपि व्याधयः दोषसंसर्गादेव भवन्ति, दोषाश्च आहारपरिणाम करभाववैर्षीने रसादारभ्य गर्भजननयोग्यशुक्रस्य, शुक्राभिषवणा-त्मकस्य रजसश्च अपत्यपथे संयोगे परस्परानुग्राहकरूपेण आर-म्भकत्वेन व्याख्याताः । त एते सप्तविधा व्याधयः तद्यथा—" आदि-बलप्रवृत्ताः, जन्मबलप्रवृत्ताः, दोषबलप्रवृत्ताः, संघातबलप्रवृत्ताः, कालबलप्रवृत्ताः, दैवबलप्रवृत्ताः स्वभावबलप्रवृत्ताः, इति । सु. सू. २४ अ० ।

तत्रादिबलप्रवृत्ता ये शुक्रशोणितदोषान्वयाः कुष्ठार्शःप्रभृ-तयः । तेऽपि (आदिबलप्रवृत्ता अपि) द्विविधाः मातृजाः पितृ-जाश्च । जन्मबलप्रवृत्ता ये मातुरपचारात् पङ्गुजात्यन्धबधिरमूक

मिन्मिनवामनप्रभृतयो जायन्ते, तेऽपि द्विविधाः रसकृता दौहृदापचारकृताश्च। दोषबलप्रवृत्ता श्च ये आतङ्कसमुत्पन्ना मिथ्याहाराचारकृताश्च । तेऽपि द्विविधाः—आमाशयसमुत्थाः, पक्वाशयससमुत्थाश्च। पुनश्च द्विविधाः—शारीरा मानसाश्च। त एते आध्यात्मिकाः। सु. सू. २४ अ. ।

आदिबलप्रवृत्ता नाम दुष्टशुक्रशोणितबलजाताः शुक्रशोणिते मिश्रीकृत्य यानि शरीरावयवाङ्गानि यै यैं दोषैरारभ्यते तत्तदवयवारम्भकदोषैः बीजभूतस्य शुक्रशोणितसंसर्गस्य दुष्टत्वात् कुष्ठार्शः प्रभृतयो मेहक्षयादयश्च आरब्धाः स्युः। आदि च यद्बलं तस्मात् प्रवृत्ता एते व्याधयः शरीरारम्भकवातपित्तश्लेष्मणां मुख्यं शरीरारम्भकत्वं साधयन्ति, आदिबलप्रवृत्तानामपि द्वैविध्यं प्रतिपादयति, मातृजन्यत्वेन पितृजन्यत्वेन च। तत्र येऽङ्गावयवा मातुः शोणिताख्यरजसा प्रारभ्यन्ते तेषु प्रारभ्यमाणेषु स्याच्चेद्विकृतिः तर्हि सा विकृति मातृजन्या इति उच्यते। मातृजानि तु अवयवाङ्गानि—यथा, " यानि खल्वस्य गर्भस्य मातृजानि यानि चास्य मातृतः संभवतः संभवन्ति, तान्यनुव्याख्यास्यामः—तद्यथा त्वक् च लोहितं च, मांसं च मेदश्च नाभिश्च हृदयंच क्लोमच यकृच्च प्लीहा च वृक्कौ च बस्तिश्च पुरीषाधानं चामाशयश्च पक्वाशयश्चोत्तरगुदश्चाधरगुदश्च क्षुद्रान्त्रं च स्थूलान्त्रं च वपा च वपावहनं चेति मातृजानि " च—सं—शा—स्था—अ—३ ॥ एष्वङ्गावयवेषु चेद्यदा आरम्भकाणामादिदोषाणां बलात् विकृतिप्रवृत्तिः सा नाम मातृजन्या । एवं

पितृजन्याङ्गावयवेष्वपि विकृति श्चेत्तर्हि सा नाम विकृतिः पितुरंशभूतगर्भारम्भकशुक्रदोषजन्या । पितृजाश्चेमे भावाः “यानि खल्वस्य गर्भस्य पितृजानि, यानि चास्य पितृतः संभवतः संभवन्ति, तान्यनुव्याख्यास्यामः—तद्यथा केशश्मश्रुनखलोमदन्तास्थिसिरास्नायुधमन्यः शुक्रमिति पितृजानि च—सं—शा—स्था—अ—३ एषु चेदङ्गावयवेषु आरम्भकदोषै विकृतिरारब्धा सा नाम गर्भारम्भकदोषदुष्टशुक्रजन्यैवेतिसिद्धं भवति ॥ एवं जन्मबलप्रवृत्ता व्याधयोऽपि गृहीतगर्भाया मातुः दुष्टाहाराचाररूपेण अपचारेण भवन्ति । एतेनापचारेणादौ गर्भिण्या मातु दोषा विकृतिं भजन्ते विकृतदोषाणां च दुष्टी रसानुगा, सती मातुरंशभूतेन शोणिताख्येनधातुना ये येऽङ्गावयवाः प्रारभ्यन्ते तांस्तान् मातुराहारजन्यरसपुष्टि दूषयति । एवं मातुरपचारादपि पङ्गुजात्यन्धादिप्रतिपादकै दोषै गर्भोऽनुबध्यते । एवं दोषबलप्रवृत्ता व्याधयो जायन्ते, व्याधयश्च मनःशरीराधिष्ठानाः, मनसो द्वौ दोषौ रजस्तमसी, शरीरस्य त्रयो दोषाः वातपित्तश्लेष्माणः, एवं सर्वव्याध्युत्पादकाः पञ्च दोषा भवन्ति, तेषां पञ्चानां दोषाणां यद् बलं तस्माज्जाताः प्रवृत्ताः दोषबलप्रवृत्ता उच्यन्ते, केचिद् व्याधयः हेतुभूताद्व्याध्यन्तराद् भवन्ति, ते यथा—

तद्यथा ज्वरसन्तापाद् रक्तपित्तमुदीर्यते ।
रक्तपित्ताज्ज्वर स्ताभ्यां शोषश्चाप्युपजायते ॥
प्लीहाभिवृद्ध्या जठरं जठरा च्छोथ एव च ।
अर्शोभ्यो जाठरं दुःखं गुल्म श्चाप्युपजायते ॥

दिवास्वप्नादिदोषैश्च प्रतिश्यायश्च जायते ।
प्रतिश्यायादथो कासः कासात् संजायते क्षयः ॥
क्षयो रोगस्य हेतुत्वे शोषस्याप्युपजायते ।
ते पूर्वं केवला रोगाः पश्चाद्धेत्वर्थकारिणः ॥ इति

एवं ज्वरसन्तापाद्रक्तपित्तं रक्तपित्ताज्ज्वर स्ताभ्यां च शोषाख्यो व्याधि र्जायते—शेषं सुगमम् । इत्थं आतङ्कसमुत्पन्ना ये व्याधयस्ते आदिबलप्रवृत्ता उच्यन्ते, एवं आदिबलप्रवृत्ताः जन्मबल प्रवृत्ताः, दोषबलप्रवृत्ताश्च त्रिविधा अपि व्याधयः शरीरस्थवातादि रजःप्रभृतिदोषजनितत्वात् आध्यात्मिकशब्देन भण्यन्ते ।

तथाच "संघातबलप्रवृत्ता य आगन्तवो दुर्बलस्य बलवद्विग्रहात्, तेऽपि द्विविधाः शस्त्रकृता, व्यालकृताश्च । एते आधिभौतिकाः । सु—सू—स्था—अ. २४ ॥ संघातः संहननं लगुडादिभिः प्रहारः, तस्य यद् बलम् अभिघातशक्तिविशेषः, तस्माज्जाताः, तथाच दुर्बलपुरुषस्य बलवद्भिः पुरुषैः सह यः विग्रह आरभ्यते तस्मिन् लगुडादिप्रहारेभ्यः सिरास्नायुस्रोतोऽस्थिमांसलेषु भागेषु पीडारक्तस्रावसिरास्नायुमर्मसंकोचास्थि भङ्गादयोऽभिघातविशेषा जायन्ते, तेभ्यः प्रवृत्ताः संघातबल प्रवृत्ताः, अथवा शस्त्रप्रहारादपि उपरिनिर्दिष्टाः प्रहारविशेषाः व्यालादीनां—दुष्टव्याघ्राणां सविषनखदन्तघातादिसंजातेभ्योऽभिघातविशेषेभ्यो ये व्याधिविशेषा जायन्ते, त एते भूतेषु प्राणिष्वधिकृतत्वाद् आगन्तवोऽपि आधिभौतिक संज्ञया व्यवह्रियन्ते ।

एतेषु व्याधिष्वपि सकलशरीर व्यापकवातपित्तश्लेष्मारब्धत्वं सिद्धमेवेति फलितम् ॥

कालबलप्रवृत्ता ये शीतोष्णवातवर्षाप्रभृतिनिमित्ताः, तेऽपि द्विविधाः—व्यापन्नर्तुकृता अव्यापन्नर्तुकृताश्च । दैवबलप्रवृत्ता ये देवद्रोहादभिशस्तका अथर्वणकृता उपसर्गजाश्च, तेऽपि द्विविधाः—विद्युदशनिकृताः, पिशाचादिकृताश्च । पुनश्च द्विविधाः संसर्गजाः, आकस्मिकाश्च । स्वभावबलप्रवृत्ताः क्षुत्पिपासाजरामृत्युनिद्राप्रभृतयः, तेऽपि द्विविधाः—कालकृता अकालकृताश्च, तत्र परिरक्षणाकृताः कालकृताः, अपरिरक्षणकृता अकालकृताः । एते आधिदैविकाः । अत्र सर्वव्याध्यवरोधः । सु—सू—स्था—अ० २४ ॥

ऋतुविभागात्मकः शीतोष्णवर्षलक्षणो यः कालः तस्य यद् बलं नाम यस्मिन् यस्मिन् ऋतौ यस्य यस्य दोषादेः बलं स्यात् तस्मात् शीतोष्णवातवर्षाप्रभृतिनिमित्ताद् ये ये व्याधयः प्रवृत्तिं लभन्ते, ते नाम 'कालबलप्रवृत्ताः' इति संज्ञया व्यवह्रियन्ते ते च व्याधयः ऋतुविभागात्मकस्य कालस्य बलादेव प्रवृत्ता भवन्ति, तथा च शीते जाड्यं, उष्णकाले दाहः, वर्षायाञ्च कम्पादयः कालबलादेव भवन्ति, शीतकाले श्लेष्मणः संचीयमानतत्वात् पित्तोष्मगततेजसश्च पिण्डीभावात् शीतसहकृतवायोश्च जाड्यकरत्वं कालबलादेव जायते । एवमुष्णकाले श्लेष्मणः संक्षयात् दिनकृद्भासां च प्रखरत्वेन ऊष्मणः समानधर्मतया च वायोश्च संचीयमानतत्वात् कालबलादेव अन्तः शरीरे बहिश्च दाहः संभवति । एवं

वर्षाकाले शरीरान्तःसंचारिणो बहिश्चरस्य च वायोः प्रकोपात् वर्षाशैत्येन च शीतीकृतानामङ्गावयवानां शिथिलीभावात् पित्तस्य च संचीयमानत्वात् स्वाभाविकाः कालबलप्रवृत्ताः कम्प्रादयो भवन्ति। कालबलप्रवृत्ता अपि एते व्याधयः, व्यापन्नर्तुकृतत्वेन अव्यापन्नर्तुकृतत्वेन च द्विविधा भवन्ति। व्यापन्नश्चासौ ऋतुः व्यापन्नर्तुः तेन कृताः तेषां भावः, तेन अर्थात् ऋतुगुणहीना यत्र काले वायूदकदेशा भवन्ति स व्यापन्नर्तुशब्देन काल उच्यते तेन कालेन कृता ये व्याधयः तेषां भावः व्यापन्नर्तुकर्तृत्वम्, तेन कालबलप्रवृत्तव्याधिविशेषा भवन्ति, तदुक्तं चरकसंहितायां विमानस्थाने जनपदोध्वंसनीये——

कालं तु खलु यथर्तुलिङ्गाद् विपरीतलिङ्गमतिलिङ्गं हीनलिङ्ग ञ्चाहितं व्यवस्येत्" ॥ १८ ॥

एवं अव्यापन्नर्तुकृताः पुनः वर्षायां वातदोषजनितज्वरातिसारादयः। शरदि पित्तदोषजनितज्वररक्तपित्तवमिविसर्पादयः। वसन्ते च श्लेष्मजनितज्वराग्निमान्द्यविषूचिकादयः। इत्थं पञ्चमो व्याधिभेदो व्याख्यातः। षष्ठो व्याधिभेदो यथा—दैवबलप्रवृत्ता इति देवानामिदं दैवं दैवञ्चयद् बलं शक्तिविशेषः स्वापराधं कृतवतां दुःखमरणान्यतरोत्पादकः शक्तिविशेष एव बलं तस्मात् प्रवृत्ताः "दैवबलप्रवृत्ता" इति संज्ञया व्यवह्रियन्ते। ते च व्याधयः देवानां देवगोगुरुसिद्धपुरुषाणां अभिशस्तकाः नाम देवगोगुरुसिद्धपुरुषाणामाक्रोशजन्याः अभिशप्तत्वेन भवन्ति तथा चोक्तम्—"अभिचाराभिशापाभ्यां मोहस्तृष्णा च जायते" इति, एवं अथर्वण-

कृता अपि अथर्ववेदप्रणीताभिचारिकमन्त्रैः कृता मारणात्मका व्याधयः। बाणासुरसंतोषितश्रीमहादेवश्रीकृष्णकृतयोः अनिरुद्धपरिणयावसरे आभिचारिकयोः शीतोष्णज्वरयो रुत्पत्त्यात्मिका श्रीमद्भागवती कथाऽत्रानुसन्धेया। उपसर्गजाश्च—उपसृज्यन्ते इति उपसर्गाः रोगपीडितजनानां समीपनिवासेन ये उत्पद्यन्ते व्याधयस्ते हि संक्रामकत्वात् 'उपसर्गज' संज्ञां प्राप्नुवन्ति। एवमुपसर्गजा अपि व्याधयो द्विविधा भवन्ति। विद्युदशनिकृताः नाम अबिन्धनदिव्यतेजोरूपा या विद्युत् तिर्यक् पतन्ती मनुष्यादिस्थावरपर्यन्तान् प्राणिनो मारयति भूमिञ्च दारयति, तन्निमित्ता अपि व्याधयोऽसाध्यप्राया भवन्ति अशनि र्नाम मुशलवदधः पतनशीलमिन्द्रवज्रं, स तु यस्मिन् पतितोऽवश्यमेव प्राणांस्त्याजयति। संसर्गजा नाम देवादिद्रोहकरजनानां पापभूयिष्ठानामपि संसर्गात् तैः सहासनस्नानभोजनशीलानां, तदाज्ञया स्नेहवशेन वा पापं च कर्म कुर्वताम् संपर्कादेव व्याधयो भवन्ति " रोगा भवेयुः किल कर्मदोषजाः " इत्युक्तत्वात एवमाकस्मिका अपि संसर्गं विनैव अकस्माद् भवन्ति, प्राक्तनकर्मविशेषेण यत्किंचित्करं हेतुं लब्ध्वा अलब्ध्वा वा उत्पद्यमाना भोगायतनभोग्या एव व्याधिविशेषा आकस्मिकशब्देनोच्यन्ते तदुक्तम् " नाभुक्तं क्षीयते कर्म ' इति तथा च उपसर्गजसंसर्गजयोरयं विशेषः प्रतिफलति, यद् ज्वरादिरोगपीडितजनसंपर्कजन्यत्वं नाम तद् उपसर्गजत्वम्, संसर्गजत्वं तु देवादिद्रोहकरजनसंपर्कादुत्पत्तिमत्वं, एतेन उपसर्गजाः संसर्गजाश्च व्याधयो भिन्ना एवेति फलितम्। इति षष्ठो व्याधिभेदः।

स्वभावबलप्रवृत्ता ये क्षुत्पिपासाजरामृत्युनिद्रादयः, त एते स्वभावस्य प्रकृतेः बलेन शक्त्या प्रवृत्ता भवन्ति, सर्वप्राणिनाम् स्वदेहपरिपोषणार्थं आयुषः परिपालनार्थं च पूर्व दिनभुक्ते जीर्णे सति जठरानलकर्मवशाद् क्षुद्-बुभुक्षा तु भवत्येव सा च अनिवार्या भवति, तस्याश्च शमनं ऋतुप्रकृति हितकरं अन्नपानमेव, एवं प्रत्यहं क्षुत्-प्रत्यहं पिपासा, अवस्था परिणामेन जराऽपि स्वाभाविकी, आयुषोऽन्ते मृत्युरपि स्वाभाविकः, या च वैष्णवी निद्रा तमोऽज्ञानजन्या सापि प्रत्यहं स्वभावबलेनैव प्रवृत्ता भवति, एवं क्षुत्पिपासाजरामृत्युप्रभृतयः स्वभावबल प्रवृत्ता भवन्ति। तेऽपि स्वभावबलप्रवृत्ता व्याधयः कालकृताकालकृतभेदाभ्यां भिद्यन्ते, तत्र स्वस्थवृत्तानुपालनेन स्वशरीरस्य परिरक्षणे कृतेऽपि क्षुत्पिपासादयो जरामृत्युप्रभृतयश्च कालकृत स्वभावबलप्रवृत्ता भवन्ति। यदा च स्वभावबलप्रवृत्तानामपि व्याधीनां षोडशकलभेषजेनापि प्रतीकारो नैव संभाव्यते, अथवा स्वदैन्यपरिवशादपि ऋतुचर्यादिनचर्यादिपरिपालने स्वमयशक्तिः स्यात्तदा संचितदोषाणां निर्हरणशमनक्रियासु विघातितासु दोषप्रकोपसमये अकालकृता अपि अग्निमान्द्याजीर्णाष्टदशविधत्वय विसर्पोन्मादशिरोरोगप्रभृतयः अकाले एव प्रादुर्भवन्ति, त एते अकालकृताः स्वभावबलप्रवृत्ता व्याधय उच्यन्ते, इति ज्ञेयम्। एते क्षुत्पिपासादयो दैवं नाम पार्थिवानां प्राणिजातानां पूर्वजन्मसु यत् स्वारब्धं तेन भोग्या ये क्षुत्पिपासादयो मिथ्याज्ञानवशात् स्वस्वरूपोपलब्धेश्च विना न निवर्तन्ते, अत एते दैवमधिकृत्यजातानां

व्याधीनामाधिदैविकत्वमुच्यते ॥ एवं सप्तविधा व्याधयो व्याख्याता भवन्ति, सर्वेषामपि व्याधीनामेतेषु सप्तविधेषु संग्रह इति दिक् ॥

एवं सर्वेषामपि व्याधीनामुत्पादकत्वे वातपित्तश्लेष्मणां दोषसंज्ञत्वं व्याध्यारम्भकत्वंच प्रतिपाद्य तेषामेव व्यापकत्वया प्रतिपादयितव्या मलसंज्ञा प्रतिपादनीया स्यात् "मलिनीकरणात् मलाः" इत्युक्तत्वात् ते वातपित्तश्लेष्माणः शरीरस्य स्वास्थ्येऽपि प्रत्यहं एनद् मलिनयन्ति । तथा च चरकसंहितायां शारीरस्थानीये षष्ठेऽध्याये—

शरीरगुणाः पुनर्द्विविधाः संग्रहेण—मलभूताः प्रसादभूताश्च तत्र मलभूतास्ते, ये शरीरे बाधकराः स्युः । तद्यथा—शरीरच्छिद्रेषूपदेहाः, पृथग्जन्मानो बहिर्मुखाः परिपक्वाश्च धातवः प्रकुपिताश्च वातपित्तश्लेष्माणो ये चान्येऽपि केचित् शरीरे तिष्ठन्तो भावाः शरीरस्योपघातायोपपद्यन्ते, सर्वांस्तान् मले सञ्चक्ष्महे । इतरांस्तु प्रसादे गुर्वादींश्च द्रवान्तान् गुणभेदेन । रसादींश्च शुक्रान्तान् द्रव्यभेदेन ॥ १७ ॥

उपयुज्यमानाहारगुणाः परिणामतः यथास्वमविरुद्धाः शरीरे गुणभावनापादयन्ति, शरीरं गुणयन्ति स्वस्थानेषु आहारपरिणामभूतान् रसादीन् व्यवस्थया स्थापयन्ति, विरुद्धाश्च ये आहारगुणाः विरोधिभि रहितै द्रव्यादन्तरैश्च विहता उपघातिताः सन्तः, शरीरगुणाकरत्वाभावेन शरीरं विहन्युरेव । ये च शरीरस्य स्वास्थ्यकरत्वेन

प्रसादभूता रसादयः तत्किट्टभूताश्च पुरीषमूत्रस्वेदाश्च त्यागयोग्या अपि शरीरस्वास्थ्यधारणापेक्षया रक्ष्यत्वेन उक्ताः सन्तः शरीरमिदं गुणयन्ति, अतः शरीरगुणगणनायां सप्तधातूनां अपेक्षित-तन्मलानां द्वैविध्यमुक्तम् । प्रसादभूताश्च सर्वेऽपि धातवः स्वप्रमाणापेक्षयः धारणीयाः स्युः, तन्मला अपि शरीरोपष्टम्भकत्वात् स्व-प्रमाणापेक्षया अपशयारम्भकत्वेन च त्याज्यत्वेन च कथिता अपि धारणीया भवन्ति, यथा ये शरीरच्छिद्रेषु उपदिह्यन्ते सप्तधातुभ्यश्च पृथग्जन्मानो भवन्ति, शरीरच्छिद्रेभ्यश्च वहिर्गमनशीलाः स्युः, प्रकुपिताश्च ये वातपित्तश्लेष्माणः स्यु—र्येषु मलसंज्ञा अन्वर्था स्यात् त एते शरीरस्य प्रसादकरत्वाद् रसादयो धारणयोग्या भवन्ति । प्रतिपादितं चैतत् चरकसंहितायां सूत्रस्थानीये विविधाशितपीतीये—" धातवो हि धात्वाहाराः प्रकृतिमनुवर्तन्ते । तत्राहारप्रसादाख्यो रसः किट्टं च मलाख्यमभिनिर्वर्तते, किट्टात् स्वेदमूत्रपुरीषवातपित्त श्लेष्माणः कर्णाक्षिनासिकास्यलोमकूपप्रजननमलाः केशश्मश्रुलोमनखादयश्चावयवाः पुष्यन्ति । पुष्यन्ति त्वाहाररसात् रसरुधिरमांस-मेदोऽस्थिमज्जशुक्रौजांसि पञ्चेन्द्रियद्रव्याणि धातुप्रसादसंज्ञकानि शरीरसन्धिबन्धपिच्छादयश्चावयवाः । ते सर्वे एव धातवो मलाख्याः प्रसादाख्याश्च रसमलाभ्यां पुष्यन्तः स्वमानमनुवर्तन्ते यथावयःशरीरम् । एवं रसमलौ स्वप्रमाणावस्थितौ आश्रयस्य समधातो र्धातुसाम्य मनुवर्तयतः । निमित्तस्तु क्षीणवृद्धानां धातूनां वृद्धिक्षयाभ्यामाहारमूलाभ्यां रसः साम्यमुत्पादयत्यारोगाय । किट्टं च मलाना मेवमेव, स्वमानातिरिक्ता श्चोत्सर्गिणः शीतोष्णपर्ययगुणैश्चोपचर्य-

मात्रा मलाः शरीरधातुसाम्यकराः समुपलभ्यन्ते । तेषां तु मल-प्रसादाख्यानां धातूनां स्रोतांसि अयनमुखानि । यथास्वं तानि यथाविभागेन यथास्वं धातून् आपूरयन्ति, एवमिदं शरीरमशित पीतलीढखादितप्रभवम् । अशितपीतलीढखादितप्रभवाश्चास्मिन् शरीरे व्याधयो भवन्ति । हिताहितोपयोगविशेषास्त्वत्र शुभाशुभविशेषकरा भवन्तीति ॥ ३ ॥

मनुजैः विविधम् अशीतपीतलीढखादितं अन्तरग्निसन्धुक्षित-बलेन यथास्वेनोष्मणा सम्यग् विपच्यमानं कालवद् अनवस्थित सर्वधातुपाकं अनुपहतसर्वधातूष्ममारुतस्रोतः केवलं शरीरम् उपचय बलवर्णसुखायुषा योजयति, शरीरधातून् ऊर्जयति । विविधा ये अशितपीतादय आहारविशेषाः तेषां परिणामकराः "ऊष्मा वायुः क्लेदः स्नेहः कालः समयोगश्चेति" भावा इति आरम्भक त्रिदोषवादे प्रतिपादितं । अत्रापि प्रसङ्गवशात् ते भावाः स्मार्यन्ते अन्तरग्निसन्धुक्षितबलवता समेनाग्निना सम्यग् विपच्यमानं ह्यन्नं रसायोपकल्पते, तस्य रसस्य त्रयोऽंशाः, स्थूलसूक्ष्मतन्मलभेदात् तत्र यः स्थूलोऽंशः रसाशये रसरूप एव तिष्ठति, यश्च सूक्ष्मोंऽशः स परं द्वितीयं धातुं याति, यश्च तन्मलो नाम रसादिमलः तन्मलं शरीरारम्भकं तत्तद्धातुमलं याति । एवं यथा धातवः सप्त भवन्ति तथैवोपधातवः तन्मलाश्च सप्त एव भवन्ति । तेषां "रसासृङ्मांस मेदोऽस्थिमज्जाशुक्राणि" इति सप्तधातवः त एते क्रमेण एतानि कर्माणि कुर्वन्ति, रसस्तुष्टिं प्रीणनं रक्तपुष्टिं च करोति, रक्तं वर्ण

प्रसादं मांसपुष्टिं जीवयति च, मांसं शरीरपुष्टिं मेदसश्च, मेदः स्नेहस्वेदौ दृढत्वं पुष्टिं मस्थ्नां च, अस्थीनि देहधारणं मज्ज्ञः पुष्टिं च, मज्जा प्रीतिं स्नेहं बलं शुक्रपुष्टिं पूरणमस्थ्नां च करोति, शुक्रं धैर्यं च्यवनं प्रीतिं देहबलं हर्षं बीजार्थं च ॥ सु. सू, अ. १९ ।। एवमुपधातवोऽपि

"स्तन्यं रजो वसा स्वेदो दन्ताः केशास्तथैव च ।
ओजश्च सप्तधातूनां क्रमात् सप्तोपधातवः ॥

एवं मला अपि—

कफः पित्तं मलः खेषु प्रस्वेदो नखरोम च ।
स्नेहोक्षित्वग्विशामोजो धातूनां क्रमशो मलाः ।।
वा. शा. ३ अ. ॥

शरीरारम्भकवातपित्तश्लेष्मणां धातुसंज्ञां प्राप्नुवतां शरीरारम्भकाले तत्कर्मसंपादनार्थं विविधाशयरचनाः कुर्वन्ति, आशयरचना असंपाद्य प्रसवकालादनन्तरं च बालः यत् पुरीषमूत्रविसर्गादिकर्म करोति, तस्मिन् कर्मणि उपयुज्यमानस्तन्यरूपाहारेण रसादयः सप्त धातवः पुष्यन्ति, तेभ्यश्च सप्तधातुभ्यः ये त्याज्यरूपतया मला भवितु मर्हन्ति तेषां धातुमलानां संपादनं वातपित्त श्लेष्मकृतमेव, सर्वोऽप्युपयुज्यमान आहारो रसाय संभवन् मलाय क्लपते एव । आहारपरिणामकरैरपि भावैः सप्तधातूना मुपधातूनां तन्मलानां च निष्पादनमावश्यकमेव, त्याज्यमला ये रसादीनां निष्ठीवनादयः,

त एते वातपित्तश्लेष्मणोऽन्तरा न संभवन्ति, त्याजनीयानां त्यक्तव्यत्वात्, धारणीयानां च धार्यत्वात्, रक्षणीयानां च भावानां रक्ष्यत्वात् पुष्टिकराणां च भावानां पोषणकर्मणि अत्युपयुक्तत्वात धारणरक्षणपोषणत्यागादिकं यत् कर्म तत् वातपित्तश्लेष्मणामेव, अतः धारणपोषणाद्याख्यकर्म कुर्वतां तेषां वातपित्तश्लेष्मणां 'धातव' इति संज्ञा मिथ्याहारविहारैश्च शरीरस्य व्याधिभिः दूषणकरत्वाद् "दोषाः" इति संज्ञा आहारपरिणामजन्यस्यापि मलस्य संपादकत्वात् तेषां 'मला' इति संज्ञा इममेवाभिप्रायं लक्ष्यीकृत्य उक्तम्—

शरीरदूषणाद् दोषा धातवो देहधारणात्
वातपित्तकफा ज्ञेया मलिनीकरणान्मलाः ॥

सप्तानामपि धातूनां मलिनीकरणं तु यच्छरीरे प्रत्यक्षमुपलभामहे तदेतन्मलिनीकरणं वातपित्तश्लेष्मणोऽन्तरा न संभवति अतस्तेषां मलसंज्ञास्वीकारे न कानिचिदन्यानि तत्त्वान्युपपश्यामः ।

एवं गर्भारम्भकत्वे आहारपरिणामभूतयोः शुक्ररजसो रुपादानकारणता, वातपित्तश्लेष्मकृता, संसृष्टयोश्च तयो गर्भाङ्गावयवारम्भे वायूष्मक्लेदानां सहकारिकारणत्वेन वायोश्च गर्भपुष्ट्यर्थं तद्गतजीवादृष्टभोग्यानां भोगानां च सिद्ध्यर्थं—

" आशय्याऽभ्यासयोगेन करोत्याशयसंभवम् " इत्यनेन

वातपित्तश्लेष्माशयसंपादनकरत्वं, गर्भस्य अपत्यपथाद् बहिरानयनं, संजातबालस्य पोषणार्थं मातुः पयोधरयोः स्तन्यसंपादनं बालस्य हसितरुदितादिकर्मप्रवृत्तिकरत्वं स्तन्याकर्षणबुद्धिमत्त्वं च त एव वातपित्तश्लेष्माणः संपादयन्ति, एवं--

बाल्यं वृद्धिश्छवि मेंधा त्वग्दृष्टिः शुक्रविक्रमौ।
बुद्धिः कर्मेन्द्रियं चेतो जीवितं दशतो ह्रसेत् ॥ २० ॥

संजातबालस्य जीवनकर्मणा आरभ्य द्वादशभावाः क्रमेण दशसु दशसु वर्षेषु हीयमाना ये संलक्ष्यन्ते, तेऽपि वातपित्तश्लेष्मकृता एव। तथा च बाल्यात् आरभ्य वृद्धिपर्यन्तमाविंशतेः जायमानायामङ्गावयववृद्धौ श्लेष्मा प्रधानः इतरे गौणे, एकविंशतितमाद् वर्षादारभ्य छवि मेधापुष्ट्यर्थं लोकोत्तरकार्यसंपादनार्थं च पित्तं प्रधानम् इतरौ गौणौ, एक चत्वारिंशद्वर्षादारभ्य वायुः प्रधानो भवति पित्तश्लेष्माणौ तु अप्रधानौ सन्तौ शरीराङ्गावयवांस्तादृत्तया न पुष्यतः अनेन प्रधानो वायुः शरीरमङ्गावयवांश्च ह्रासयति। एवं वेदान्तोक्ताःषड् विकारा अपि 'देहो जायते, अस्ति, वर्धते, विपरिणमते अपक्षीयते, विनश्यति' इति ते वातपित्तश्लेष्मकृतचयापचयनिमित्ताः। तदेतेनादौ गर्भोत्पादने आरम्भकनिमित्तहेतुत्वं, संजातस्य स्वास्थ्यरक्षणे, शरीरावस्थान्तरापादने च परस्परानुग्राहकहेतुत्वं, सप्तविधव्याध्युत्पादने समवायिकारणत्वं च वातपित्तश्लेष्मणामेव सिद्धं भवति, एतेन शरीरारम्भकत्वाद् शरीरस्य धारणकर्तृत्वाच्च ते वातपित्तश्लेष्माणो धातवः। व्याधीन् प्रति

समवायिकारणत्वेन उत्पत्तिकर्तृत्वाद् दोषाः। शरीरस्य प्रतिक्षणं मलिनीकरणाच्च मला इति तेषामेव त्रयाणां वातपित्तश्लेष्मणां धातुत्वं, दोषत्वं, मलत्वञ्च सिद्धमिति फलितोऽर्थः।

एवं पाञ्चभौतिकेऽस्मिन् शरीरे पञ्चीकृतः शब्दस्पर्शगुणो वायुः हृदयादि प्रदेशेषु वसन् श्रवणनलिकासाधनेन प्रत्यक्षमेवोपलभ्यते, हिक्काश्वासादिषु च सुतरां तदुपलब्धिः। अतः षड्विधेषु आत्मेन्द्रियार्थसन्निकर्षेषु शब्दस्पर्शगुणस्य प्राणाद्याख्यस्य वायोः श्रवणेन्द्रियजन्या त्वगिन्द्रियजन्या च प्रत्यक्षता सिद्धैव भवति। एवं पाञ्चभौतिकेऽस्मिन् शरीरे पञ्चभूतात्मकमपि तेजःप्रधानं आग्न्याशये वसत् पित्तं शब्दस्पर्शरूपरसगन्धात्मकं सत् पाचकरञ्जकालोचकादिकर्मभिः अनुगृह्णात्येवेदं स्थूलशरीरम्, सर्वेषामपिसन्निकर्षाणां मध्ये चाक्षुषसंनिकर्षो य आलोकसंयोगाज्जायते स सन्निकर्षः कनीनिकामध्यगतदृष्टिस्थालोचकपित्तमन्तरा न संभवति, विविधाशितपीतभुक्तादि अपि पाचकपित्तं विना नैव परिणमति, शरीरस्पर्शाद् य उष्णः स्पर्शः उपलभ्यते सा उष्णोपलब्धिरपि पित्तरक्तवाहिनीषु संचरत् पित्तमेव प्रत्याययति। मेधाप्रज्ञासाध्यं च यत् लोकातीतं कर्म लोकोत्तराः पुरुषश्रेष्ठाः कुर्वन्ति सोऽपि साधकपित्तस्यैव प्रभाव इति निर्णीतं प्राक्, ज्वरादिषु व्याधिषु तीक्ष्णवेगकरत्वं दाहकरत्वं विदाहित्वं च पित्तस्यैव धर्माः। वम्यतीसारादिषु विस्रगन्धिताऽपि विदग्धपित्तकृता एवेति प्रतीयते, तदेवं बाष्प-

यन्त्रवत् अग्न्याशये घुगधुगिति शब्दकरणं तत् पञ्चीकृतपित्तस्यैव, स्पर्शस्तु सकलशरीरव्यापिना त्वगिन्द्रियेण यत्रतत्राशयादिषु च स्पार्शप्रत्यक्षेणानुभूयते, रूपं तु दृष्टिगतं भास्वरशुक्लं प्रसिद्धमेव, यस्य भास्वरशुक्लस्य प्रभावेण आदित्याद्यालोकसंयोगादिव यस्य सन्निकर्षात् अर्थान् विषयान् चाक्षुषीकुर्मः। रसस्तु अग्न्याशय गतस्य पित्तस्य " पित्तं तीक्ष्णं द्रवं पूति नीलं पीतं तथैव च। उष्णं कटुरसं चैव विदग्धं चाम्लमेव च ॥ इति सौश्रुते वाक्ये कटुर्नाम यस्तिक्तो रसो विदग्धाजीर्णे स्वसंवेद्यः सर्वेषामपि जनानां प्रायः प्रतीत एव, गन्धोऽपि पूत्याख्यः पार्थिव एव, विकृतेऽविकृते वा पित्ते पित्तविकृतिषु वोपलभ्यते। एवं पञ्चभूतगुणमपि पित्तमग्न्या शयादिषु वसत् प्रकृतिस्थं सदनुगृह्णात्येव, विकृतं चैतद् बहून् विकारानुत्पादयतीति प्रतिपादितं। तदेवं शब्दस्पर्शरूपरसगन्धगुण युक्तं पाञ्चभौतिकं पित्तं प्रकृतिस्थं स्वास्थ्यपालनाय, विकृतं च प्रायः बहूनां रोगाणा मुत्पादनसमर्थं भवतीति प्रतिपादितम्।

एवं श्लेष्माऽपि पाञ्चभौतिकः, पाञ्चभौतिकेऽस्मिन् स्थूले आमाशयादिषु वसन् अनुगृह्णात्येवेदं शरीरमिति प्रतिपादितं प्राक्। स चायं श्लेष्मा, शब्दस्पर्शरूपरसगन्धगुणवान् भवति तस्य च जलीयद्रव्यारब्धत्वात् यथा पञ्चीकृते जले शब्दादयः समुपलभ्यन्ते तथैव तदारब्धश्लेष्मण्यपि। किं बहुना, मात्रा य आहार उपभुज्यते तस्यैव जलीयतत्त्वप्रधानो रसः संसृष्टे शुक्ररजसी अङ्कुरयति, अन्येऽपि, वातपित्ते गर्भाशये संसृष्टयोः शुक्ररजसोः सहकारिणी

कारणं भवत स्तथापि मातुराहारजन्यस्य जलीयतत्त्वप्रधानस्य रसस्य गर्भपोषणकरत्वात् स्वतन्त्रमभिन्ननिमित्तोपादानं । यतः तं रसं विना गर्भोऽपि नाप्यायते वातपित्ताभ्यां च संसृष्टयोः शुक्रवंशोः क्षेत्रबीजयोः पर्जन्यजलस्येव अपत्यपथे संसृष्टयोः तयोः मातुराहारादिजनितो रसः पोषणकर्मसिद्ध्यर्थं जलीयतत्त्वमपेक्षते एव। एवं शब्दादिगुणवानयं श्लेष्माऽपि शब्दवान् स्पर्शवान् रूपवान् रसवान् गन्धवांश्चेति प्रागेव प्रतिपादितमपि प्रकरणोपसंहारार्थमत्राप्यनुसंधेयम् । तद्यथा—

श्लेष्मा श्वेतो गुरुः स्निग्धः पिच्छिलः शीत एव च ।
मधुरस्त्वविदग्धः स्याद् विदग्धो लवणो भवेत् ॥

सु. सू. २१ अ० ।

आहाररसः आरम्भकं श्लेष्माणं पुष्यति स च जलीयतत्त्वप्रधानः पिच्छिलेन श्लेष्मणा संयुज्यते तदा सूक्ष्मशब्दं कृत्वैव तस्य पिच्छिलपिण्डीभावो भवति, शीतः स्पर्शस्तु तस्य प्रसिद्ध एव त्वगिन्द्रियग्राह्यः, श्वेतमपि रूपं चाक्षुषप्रत्यक्षयोग्यं, रसोऽपि यदा प्रकृतिस्थः स श्लेष्मा तदा मधुररस एव, जिह्वामूले तिष्ठतः अविकृततर्पकश्लेष्मणा एव रसनेन्द्रियग्राह्यता एवं विकृतस्याविकृतस्य च श्लेष्मणो गन्धोऽपि घ्राणाख्येनेन्द्रियेणोपलभ्यते ।

इत्थं पाञ्चभौतिकेऽस्मिन् स्थूले शरीरे शरीरानुग्रहार्थं आशयविभागेन स्थितिं लभमाना वातपित्तश्लेष्माणः शरीरस्य धारण-

पोषणाख्यकर्म कुर्वन्तो धातुसंज्ञया व्यवह्रियमाणा अपि दोषा एव, येनकेनचिदपि अपराधलेशेन स्वस्थवृत्तानुपालनापेक्षया ऋतु विपर्ययेण वा शरीरस्य शीघ्रदूषणकरत्वाद्दोषा एवेति सिद्धं भवति ।

इतिश्री त्रिवाडयुपाह्व निर्भयरामात्मज भानुशङ्करशर्म्मणा संगृहीते त्रिदोषवादे प्रत्यक्षखण्डः ॥

॥ ॐ नमः श्री धन्वन्तरयेऽन्तर्यामिणे ॥

त्रिदोषवादे.

अथानुमान खण्डः

अनुमानेन लक्ष्यो यः प्रत्यक्षः स्यात् कदाचन ।
त्रिगुणो विगुणो वाऽपि त्रिदोषज्ञानसाधकः ॥
स एव भगवान् साक्षात् अम्भोधिमथनोद्भवः ।
भूयात् त्रिदोषवादेऽस्मिन् खण्डे साध्यानुमानके ॥

[भानुः]

अथानुमानं निरूप्यते ।

अनुमितिकरणमनुमानम् । अनुमितिश्च व्याप्तिज्ञानत्वेन व्याप्तिज्ञानजन्या । व्याप्तिज्ञानानुव्यवसायादेस्तत्त्वेन व्याप्तिज्ञानजन्यत्वाभावान्नानुमितित्वम् । अनुमितिकरणं च व्याप्तिज्ञानं तत्संकारोऽवांतरव्यापारः, न तु तृतीयलिङ्गपरामर्शोऽनुमितौ करणं तस्यानुमितिहेतुत्वांसिद्धया तत्करणत्वस्य दूरनिरस्तत्वात । इत्येकदेशीयं मतम् ॥

ननु ' अनुमितिकरणमनुमानम् ' इति अनुमितिरूपा अवा-

धितान्तःकरणावृत्यात्मिका प्रमा एवास्माभि र्न स्वीक्रियते तर्हि अनुमितिकरणात्मकं अनुमानं नाम प्रमाणान्तरं कथमभ्युपगच्छाम इति चेन्न, परपुरुषगताज्ञानसन्देहविपर्ययाः अनुमानमन्तरा नैव स्वात्मप्रत्ययकारकाः स्युः । 'यथायं देवदत्तः वर्णाश्रमाचारान् न विजानाति वर्णाश्रमाचारविषयकाज्ञानवानयम्' इत्याकारिका प्रतीतिः अनुमानमनभ्युपगच्छतोऽपि पुरुषस्य भवत्येव, तथा चायं यज्ञदत्तः मदुक्तप्रवचने सन्देहवान् इवाभाति, इति यज्ञदत्तगत सन्देहोऽपि अनुमानं विना नैव प्रतीयते, तथा चायं भिषक् अस्मिन् व्याधिविज्ञाने विपर्ययवान् लक्ष्यते इति भिषग्गतो भ्रमोऽपि अनुमानप्रकारं विजानतः प्रेक्षावतो भवत्येव एवं अज्ञान सन्देहविपर्ययाः अनुमानं प्रमाणान्तरत्वेनानभ्युपगच्छतोऽपि प्रसह्य अनुमापयन्ति, अतः अनुमानं तु प्रमाणान्तर त्वेनाभ्युपगन्तव्यमेवेति फलितं भवति । तच्चानुमानं प्रत्यक्षपूर्वमेव त्रिविधं त्रिकालानुमितिविषयकं भवति कार्यात् कारणानुमितिजन्यं, कारणात् कार्यानुमितिजन्यं सामान्यतो दृष्टं च । तथा च चरकसंहितायाः सूत्रस्थानीये तिस्रैषणीयेऽध्याये

प्रत्यक्षपूर्वं त्रिविधं त्रिकालं चानुमीयते ।
वह्नि र्निगूढो धूमेन मैथुनं गर्भदर्शनात् ॥ २१ ॥
एवं व्यवस्यन्त्यतीतं, बीजात् फलमनागतम् ।
दृष्ट्वा बीजात्फलं जातं इहैव सदृशं बुधाः ॥ २२ ॥

" इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारिव्यव-

सायात्मकं प्रत्यक्षम् " इति प्रत्यक्षप्रमाणलक्षणे निरूपितं, अनुमानेस्यापि प्रत्यक्षपूर्वकत्वात् तदनुमानं त्रिविधं भवति त्रिकाल विषयकं च भवति, प्रत्यक्षपूर्वमित्यनेन व्याप्तिज्ञानपूर्वकमेवानुमानं भवतीति द्योतितम् सा च व्याप्ति वह्निधूमयोः साहचर्यलक्षणा साहचर्यनियमवतीत्यर्थः। कार्यात् कारणानुमानं यथा गर्भरूपकार्यं अन्तर्वत्न्याः स्त्रिया यद् दृश्यते तत्कार्यं मिथुनीभावं विना नैव संगच्छते, मैथुनपूर्वकत्वादेवगर्भोत्पत्तेः, अतस्तत् गर्भकार्यरूपात् मिथुनीभावरुपकारणस्यानुमितिः। एषा चानुमितिः अतीतमिथुनी भावरुपनिमित्ता। एवञ्च कारणात् कार्यानुमिति यथा बीजरूपात् कारणात् अनागतं फलं अनुमीयते, भूमावुप्तबीजात् वृक्षे प्ररुह्यमाणे सति भविष्यत्फलानि अनुमीयन्ते, सैषाऽनुमितिः भविष्यन्निमित्ता। एवं वर्तमानलक्षणोऽप्यनुमितिस्तु प्रसिद्धा एव, पर्वतो वह्निमान् धूमादित्यत्र वर्तमानधूमलक्षणकाद् हेतोः पर्वते वह्निरनुमीयते अनेन प्रकारेणानुमानस्य त्रैधिध्यमुदाहृतं भवति—

नैयायिकास्तु अनुमानप्रकारमित्थं वर्णयन्ति, स यथा परामर्शजन्यं ज्ञानमनुमितिः। व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। यथा वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं परामर्शः। तज्जन्यं पर्वतो वह्निमान्' इति ज्ञानमनुमितिः। यत्र यत्र धूमस्तत्रतत्राग्निरिति साहचर्यनियमो व्याप्तिः॥ व्याप्यस्य—धूमादेः पर्वतादिवृत्तित्वं पक्षधर्मता, एतादृश्याः पक्षधर्मतायाः यद् व्याप्तिविशिष्टं ज्ञानं स परामर्शः, "तज्जन्यं च ज्ञाममनुमिति" रिति प्रतिपाद-

यन्ति ॥ परामर्शजन्यव्याप्तिविशिष्टपक्षधर्मतावगाहिज्ञानस्य अनुमितेर्हेतुता संमता न वा आयुर्वेदतन्त्रे इत्यनुपदमेव प्रथयामः ॥

अनुमितिकरणम् अनुमानं यत् प्रोक्तं तदनुमानं द्विविधं स्वार्थं परार्थं च। तत्र स्वार्थं स्वानुमितिहेतुः। तथाहि—अनुमाता स्वयमेव भूयोदर्शनेन यत्र यत्र धूमस्तत्र तत्राग्निरिति महानसादौ वह्निधूमसाहचर्यरूपां व्याप्तिं गृहीत्वा पर्वतसमीपं गतः, तद्गते च अग्नौ सन्दिहानः पर्वते धूमं पश्यन् महानसदृष्टां वह्निधूम साहचर्यलक्षणां व्याप्तिं स्मरति "यत्र यत्र धूमस्तत्र तत्राग्निः" इति। तदनन्तरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते। अयमेव लिङ्गपरामर्श इत्युच्यते। तस्माच्च लिङ्गपरामर्शात् "पर्वतो वह्निमान्" इत्यनुमित्यात्मकं ज्ञानमुत्पद्यते, तदेतत् 'स्वार्थानुमानम्' इति शब्देन व्यवह्रियते, स्वार्थानुमानं नाम प्रतिज्ञाहेतूदाहरणादि पञ्चावयववाक्यरूपपर्यायस्य अप्रयोजनवत्त्वम्।

यत्तु स्वयं धूमादग्निमनुमाय परं प्रतिबोधयितुं पञ्चावयववाक्यं प्रयुज्यते तत् परार्थानुमानम्। यथा पर्वतो वह्निमान्, धूमवत्त्वात्, यो यो धूमवान् स स वह्निमान् यथा महानसम्, तथा चायं, तस्मात्तथा, इति। अनेन पञ्चावयववाक्येन प्रतिपादितात् लिङ्गात् परोऽप्यग्निं प्रतिपद्यते इति परार्थानुमानप्रकारः ॥

प्रतिज्ञा—हेतु—उदाहरण—उपनय—निगमनानि पञ्चावयवाः ॥

'पर्वतो वह्निमान्' इति प्रतिज्ञा, धूमवत्त्वात्, इति हेतुः

'यो यो धूमवान् स स वह्निमान्' इत्युदाहरणम्, तथा–चायम्' इत्युपनयः, 'तस्मात्तथा' इति निगमनम् ॥

स्वार्थानुमितिपरार्थानुमित्यो लिङ्गपरामर्श एव करणम् अतो द्विविधयोरप्यनुमित्यो लिङ्ग परामर्शस्य करणत्वस्वीकारात् लिङ्गपरामर्शोऽनुमानम् ॥ इति नैयायिकी प्रक्रिया ।

आयुर्वेदे तु स्वार्थानुमानपरार्थानुमानयोः सामान्यलक्षणपूर्वकत्वेन विशेषलक्षणपूर्वकत्वेन च स्वीकृतिः । तत्रानुमानसामान्यं तु–

"तल्लिङ्गलिङ्गि पूर्वकम्" इति सांख्योक्तरीत्या प्रतिपादितं, लिङ्गं नाम व्याप्यम्, लिङ्गयते–गम्यते–ज्ञायते अप्रत्यक्षः अर्थः अनेन इति लिङ्गम् ॥ लिङ्गि–व्यापकम् । एतेन न्यूनदेशवर्तित्वं व्याप्यम् अधिकदेशवर्तित्वञ्च व्यापकमिति फलितम् । पर्वतो वह्निमान् धूमात्' इत्यत्र पर्वते वह्नौ साध्ये पञ्चमीश्रवणमात्रेणैव धूमस्य हेतुत्वे सिद्धे पर्वते वह्निः अनुमीयते इदञ्चानुमानम् महानसे वह्निधूमयोः साहचर्येण प्रत्यक्षदृष्टत्वात् लिङ्गस्य व्याप्यधूमस्य यत्र यत्र धूमस्तत्रतत्र वह्नि'रिति साहचर्यलक्षणां व्याप्तिं स्मरन् स्वयमेव पर्वते वह्निमनुमिनोति "पर्वतो वह्निमान् धूमादिति" तदेतत् स्वार्थानुमित्यपरपर्यायं अनुमानसामान्येनोच्यते, तेन च धूमादि व्याप्यो वह्न्यादिर्व्यापक इत्याकारकः यः प्रत्ययस्तत्पूर्वकम् "तल्लिङ्ग लिङ्गिपूर्वकम्" इति फलितोऽर्थः:–

सामान्यलक्षणेश्चानुमानं द्विविधं भवति वीतानुमानम्, अवी-

तदनुमानं च, वि—विशेषेण इतं ज्ञातं—प्रसिद्धम् यदनुमानम् अन्वय व्याप्तिहेतुकम् तद् वीतानुमानम्, अन्वयमुखेन प्रवर्तमानं विधायकम् वीतम्, व्यतिरेकमुखेन प्रवर्तमानं निषेधकम् अवीतम्। यत्सत्त्वे यत्सत्त्वम् अन्वयः, यदभावे यदभावो व्यतिरेकः। तेन पर्वते धूमसत्वे वह्निसत्त्वरूपा या कल्पना तन्मुखेन यदनुमानं तत् केवलान्वयि वीतानुमानम्। पर्वते धूमाभावे वन्ह्य भावः इति अनुमानहेत्वभावे वह्न्यनुमितिकार्याभावः इत्याकारकं यदनुमानं तद् अवीतानुमानशब्देन उच्यते, अवीतानुमानं नाम व्यतिरेकव्याप्तिहेतुकम् इत्यर्थः।

तदेतत् न्यायनये इत्थं प्रतिपादितम्।

लिङ्गं त्रिविधम्—अन्वयव्यतिरेकि, केवलान्वयि, केवल व्यतिरेकि चेति। अन्वयेन व्यतिरेकेण च व्याप्तिमद् अन्वय व्यतिरेकि। यथा वन्हौ साध्ये धूमवत्त्वम्। यत्र धूमस्तत्राग्नि र्यथा महानसम् इत्यन्वयव्याप्तिः। यत्र वन्हि र्नास्ति तत्र धूमोऽपि नास्ति यथा ह्रद इति व्यतिरेकव्याप्तिः।

अन्वयमात्रव्याप्तिकं केवलान्वयि। यथा सर्वे व्याधयः त्रिदोषजन्याः दोषविकृतिजन्यत्वात् ज्वरादिवत्। अत्र दोषविकृति जन्यत्वत्रिदोषजन्यत्वयोः हेतुसाध्ययोः व्यतिरेकव्याप्ति र्नास्ति, सर्वेषामपि व्याधीनां दोषविकृतिजन्यत्वात् त्रिदोषजन्यत्वाच्च। व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि। यथा ज्वर इतरेभ्यो भिद्यते, स्वेदावरोधादीनां युगपद्दर्शनात्। य इतरेभ्यो न भिद्यते

न स स्वेदावरोधादिमान् यथा कासः। न चायं तथा। तस्मान्न तथा इति। अत्र यः स्वेदावरोधादियुगपद्दर्शनवान् स इतरभिन्नः इति अन्वयदृष्टान्तो नास्ति। ज्वरमात्रस्य पक्षत्वात्।

संदिग्धसाध्यवान् पक्षः यथा धूमवत्त्वे हेतौ पर्वतः।
निश्चितसाध्यवान सपक्षः यथा तत्रैव महानसम्॥
निश्चितसाध्याभाववान् विपक्षः यथा तत्रैव महाह्रदः।
एवं सद्धेतून् निरूप्य हेत्वाभासा अपि व्यक्तव्याः स्युः।

सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्चहेत्वाभासाः।

सव्यभिचारोऽनैकान्तिकः। स त्रिविधः साधारणासाधारणानुपसंहारिभेदात्। तत्र साध्याभाववद्वृत्तिः साधरणाऽनैकान्तिकः। यथा ज्वरो दोषजन्यः दोषविकृतिजन्यत्वात् इति। दोषविकृति जन्यत्वस्य ज्वराभाववति शूलादौ विद्यमानत्वात्।

सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृतिः असाधारणः यथा स्वाभाविकाः क्षुत्पिपासादयः, नित्याः, नित्यव्याधित्वात् इति अत्र नित्यव्याधित्वं सर्वेभ्योऽवस्थाकृत व्याधिभ्यो दोषजन्यव्याधिभ्यश्च व्यावृत्तं क्षुत्पिपासादि नित्यव्याधिमात्रवृत्ति।

अन्वयव्यतिरेक दृष्टान्तरहितोऽनुपसंहारी। यथा सर्वे मनुजाः व्याधिग्रस्ताः दोषविकृतिसंभवात् इति। अत्र सर्वेषामपि मनुष्याणां पक्षत्वात् दृष्टान्तो नास्ति, यद् रोगरहितः कश्चन मनुजः स्यात जननिधनादिषु दोषजन्यव्याधीनां नियतत्वात्॥

साध्याभावव्याप्तो हेतुर्विरुद्धः । यथा ज्वरो नित्यः दोषजन्यत्वात् इति । दोषजन्यत्वं हि नित्यत्वाभावेन अनित्यत्वेन व्याप्तम् ॥ साध्याभावसाधकं हेत्वन्तरं यस्य स सत्प्रतिपक्षः । यथा ज्वरो नित्यः पीडाकरत्वात् सूचीकण्टकवेधजन्यपीडावत् । यथा वा ज्वरोऽनित्यः त्रिदोषकार्यत्वात् राजयक्ष्मवत् ।

असिद्धस्त्रिविधः—आश्रयासिद्धः स्वरूपासिद्धः व्याप्यत्वासिद्धश्चेति ॥

तत्राश्रयासिद्धो यथा आकाशज्वरः त्रिदोषजन्यः, ज्वरत्वात् मनुष्यशरीरगतज्वरवत् । अत्र त्रिदोषजन्यत्वस्य साध्यस्य आकाशज्वर आश्रयः स च नास्त्येव । एतेन पक्षतावच्छेदकाभाववत्पक्षकत्वम् आश्रयासिद्धत्वमिति फलितम् । स्वरूपासिद्धो यथा ज्वरो गुणः रसनेन्द्रियप्रत्यक्षत्वात् मधुराम्लादिवत् । अत्र रसनेन्द्रियप्रत्यक्षता ज्वरे नास्ति तस्य दर्शनस्पर्शनादिप्रत्यक्षविषयत्वात् । एतेन पक्षे हेत्वभावः स्वरूपासिद्धिरिति फलितम् ॥

सोपाधिको हेतु र्व्याप्यत्वासिद्धः । साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः । साध्यसमनाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम् । साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वम् । शरीरी कासाद्युपद्रववान् ज्वरवत्त्वादित्यत्र ज्वरारम्भकदोषप्रकोपजन्यकासादिसंयोग उपाधिः ।

यत्र कासाद्युपद्रव स्तत्र ज्वरारम्भकदोषसंयोग इति साध्य-व्यापकता । यत्र ज्वर स्तत्र कतमस्मिन्नप्येकस्मिन् प्राकृते ज्वरे तदारम्भकदोषप्रकोपजन्योपद्रव संयोगो नास्ति " इत्येतादृशे ज्वरे तदारम्भकदोषप्रकोपजन्योपद्रवसंयोगाभावादिति साधना व्यापकता । एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वात् कासाद्युपद्रवसंयोग उपाधिः । सोपाधिकत्वाद् ज्वर-वत्त्वं व्याप्यासिद्धम् ॥ अत्र उपाधिरपि त्रिविधो व्याख्यायते, केवलसाध्यव्यापकः पक्षधर्मावच्छिन्नसाध्यव्यापकः, साधनावच्छिन्न साध्यव्यापकश्चेति अन्यत्र विस्तरः ॥

यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितः । यथा ज्वरः अव्याधिः द्रव्यत्वात् इति । अत्र ज्वरस्य अव्याधित्वं साध्यं तदभावो नाम ज्वरे यद् व्याधित्वं देहेन्द्रियमनःसंतापकर-त्वेन स्वसंवेद्यत्वेन च प्रत्यक्षसिद्धं गृह्यते इति बाधितत्वम् ॥

एव मनुमानसाध्येषु त्रिदोषसाधकेषु वाक्येषु " पञ्चावयव वाक्यप्रयोज्य प्रतिज्ञाद्यन्यतमावयवेषु सद्धेतुनिदर्शनार्थम् असद्धेतु विशेषान् दर्शयित्वा-अनुमानखण्डे यानि यान्यनुमानानि त्रिदोषज्ञानसाधकानि स्युः तानि तानि सद्धेतुपुरःसराणि दर्शनीयानि स्युः ।

आदौ तावत् प्रत्यक्षगोचरेऽपि अस्मदीयपार्थिवशरीरे इदमनुमानम्-" अस्मदादिशरीरं पाञ्चभौतिकं पञ्चमहाभूतारब्धत्वात् पञ्चमहाभूतारब्धसृष्टिवत् " ॥ अनेन अस्मदादिशरीराणां पाञ्चभौ-

तिकत्वे सिद्धे "अस्मदादि शरीरं पार्थिवं भूयस्त्वेन पार्थिवगुणो-पलब्धेः घटवत्" इत्यनुमानेन पार्थिवत्वे सिद्धे, अस्मदादि पार्थिवशरीरं वातपित्तश्लेष्मारब्धं तदाकृष्टतद्गुणशुक्ररजोभ्या-मारब्धत्वात् वाय्वग्निजलारब्धघटवत् इत्यनेनानुमानेन अस्मदादि पार्थिवशरीरस्य वातपित्तश्लेष्मारब्धत्वं सिद्ध्यति। एवं "वातपित्त श्लेष्माणः, धातुसंज्ञकाः, अस्मदादिपार्थिवशरीरे आहारपरिणामा-दिना धारणपोषणकर्तृत्वात् वाय्वग्निजलैः धृतपुष्टपृथिवीवत्। वातपित्तश्लेष्माणः, दोषाः, मिथ्याहारविहारजन्यविकृत्युत्पादक-त्वात्, क्षेत्रोप्तबीजानां अपेक्षाधिकवाताग्निजलवत्॥ वातपित्त-श्लेष्माणः, मलाः तज्जन्यविकृतिषु शोधनलङ्घनकर्षणक्रियाभिः निवर्त्यत्वात् वाय्वग्निजलवृष्ट्याहतजीर्णागारवत्॥ वातपित्तश्लेष्माणः पाञ्चभौतिकाः पञ्चमहाभूतगुणोपलम्भात् पञ्चीकृतवाय्वग्निजलवत्। वातपित्तश्लेष्माणः, गर्भशरीरारम्भकाः, तदारब्धशुक्ररजसोः परि-णामभूते अस्मदीयशरीरे समवायिकारणतयोपलम्भात् भूमिगतवृक्ष-बीजाङ्कुरवत्॥ एतैरनुमानैः पार्थिवशरीराणां पाञ्चभौतिकत्वम्, पार्थिवत्वं, वातपित्तश्लेष्मारब्धत्वं च सिद्ध्यति। तथाच उपरिनिर्दि-ष्टानामनुमानानामयमनुमाननिष्कर्षः:—

अस्मदादिशरीरं वातपित्तश्लेष्मारब्धं तद्गुणशुक्ररजसोः पर-स्परानुग्रहात् परस्परानुप्रवेशात् परस्परोपकाराच्च खण्डप्रलयादन-न्तरं पुनः सृष्टिनिर्माणे वाय्यग्निजलारब्धमहापर्वतवत्॥ इत्यनु-मानेनास्मदादीनां पार्थिवशरीराणां धातुसंज्ञाऽपरपर्यायत्रिदोषार-

न्धत्वं सिद्धमेव। विशेषश्च प्रत्यक्षखण्डे व्याख्यात एव ॥ एवं ज्वरादयः त्रिदोषजन्याः मिथ्याहारविहारकृतत्रिदोषविकृतिजन्यत्वात् राजयक्ष्मादिवत् ॥ एवमतीसारादीनामपि त्रिदोषजन्यत्वं सिद्धयति। यद्यपि ज्वरादिरोगाणां मूर्तिमत्त्वाभावेन दर्शनस्पर्शन प्रश्नविशेषैः देहेन्द्रियमनःसंतापकरै र्लक्षणै रेवानुमीयन्ते स्वपरशरीरगता ज्वरादयस्तथापि ज्वरार्तानां शरीरस्पर्शमात्रेण स्पार्शन प्रत्यक्षेण भिषक्त्वगिन्द्रियजन्यप्रत्यक्षत्वेऽपि स्वेदावरोधसंताप सर्वाङ्गग्रहादिभिः ज्वरार्तसंवेद्यै लक्षणै ज्वरस्यानुमानमेव भवति, एतैर्ज्वरलक्षणैर्विना अयं ज्वरः स्वतन्त्रो वा औपद्रविको वा इति निश्चेतुमशक्यत्त्वात्। तथा अतीसारग्रहण्यग्निमान्द्याजीर्ण पित्तकास रक्तपित्त राजयक्ष्म विसर्पादिषु बहुष्वपि व्याधिषु ज्वरानुबन्धित्वं दृश्यते, तत्र स्वपरिचायकलक्षणसमन्वयं विना चिकित्साभेदो न सिद्धयेत्। चिकित्साभेदनिर्णयं विना च उपशयलेशोऽपि न दृष्टिगोचरः स्यात्। न च केवलं ज्वरानुबन्धिषु व्याधिषु ज्वरभेदेषु वा चिकित्साविशेषः प्रतिपादितः, किन्तु आमपच्यमान पक्वसंज्ञकानां दोषमर्यादितज्वराणां, विषमज्वराणां, सान्निपातिक ज्वरविशेषाणां, कालविशेषकृतज्वराणां प्राकृतज्वराणां च चिकित्साभेदः सुतरामायुर्वेदतन्त्रे विशिष्टतया प्रतिपादितः। तथा च— आमज्वरे पाचनलङ्घनादिक्रमः पच्यमाने शमनादिक्रमः परिपक्वे च शोधनादि क्रमः, सान्निपातिकेषु च ज्वरेषु विकृतदोषाणा माशय विशेषाणाञ्च साम्यतापादनं क्रियाविशेषैः समादिष्टं, एवं अतीसारादिषु लङ्घनपाचनक्रमः, कासादिषु दोषपाचनशमनक्रमः राजय-

क्षमादिषु च बलमांसजाठरानलपरिरक्षणपूर्वकं बृंहणोपक्रमः, व्याधिविज्ञानप्रतिपादकस्वातन्त्र्यपारतन्त्र्यरूपाभ्यां संप्राप्तिभेदाभ्यां प्रतिपादितः, एते च भेदाः अनुमानविशेषैरेव व्याधिभेदविज्ञापकैः लक्षणैः ज्ञायन्ते ॥

एवमहं स्वस्थो वा व्याधिग्रस्तो वा इत्याकारा या प्रतीतिः सा च अनुमानविशेषैरेव साधनीया स्यात् स्वस्थलक्षणञ्च तावत्—

समदोषः समाग्निश्च समधातुमलक्रियः ॥
प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते ॥ ४४ ॥

सु. सू. स्था. अ. १५ ॥

स्वास्थ्यं नाम दोषादिसाम्यं, दोषाश्च वातपित्तश्लेष्माणः गर्भशरीरारम्भका जन्मनः अनन्तरं च शरीरस्य बाल्यत्ववृद्धिकरत्वादिसंपादकाः मिथ्याहारविहारैश्च व्याधिप्रापकाः जरादि विकारैश्च निधनोत्पादकाः अस्मिन्त्रिदोष–वादे प्रत्यक्षखण्डे प्रतिपादिताः, तेषां साम्यावस्थायां यो भवति स्वस्थः, अथवा ऋतुकालविपर्ययेऽपि संचयप्रकोपाभ्यां उत्पत्स्यमानायामपि आतोवस्थायां यद् वैषम्यं दोषाणां संभवति, तद्वैषम्यस्य प्रथमतः शोधनलङ्घनादिक्रियाविशेषै र्दूरीकरणाद् दोषाणां साम्यतापालनरूपं यदारोग्यं तद्वान् स्वस्थ इति एकदेशीयं स्वस्थलक्षणम् । स्वस्थलक्षणञ्च पुनः न केवलेन दोषसाम्यतापालनेन सिद्ध्यति अत आह—" समाग्निश्च " इति, जठराग्निश्चतुर्विधः मन्दः, तीक्ष्णः, विषमः, समश्चेति ॥ तदुक्तम्—

मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्विधः ।
कफपित्तानिलाधिक्यात् तत्साम्याज्जाठरोऽनलः ॥

आमाशये कफाधिक्यात् जाठरानलो मन्दो भवति, मन्दीभूतश्च स जाठरानलः विंशतेः कफविकाराणामालस्यादीनामन्यतमान् विकारान् जनयति । अग्न्याशये पित्ताधिक्यात् तीक्ष्णीभूतो जठरानलः, पित्तजानाम् ओषचोषादीनां चत्वारिंशद्विकाराणामन्यतमान् जनयति, पक्वाधानगुदालययो र्वाताधिक्यात् वातनानात्मजानामशीते र्विकाराणा मन्यतमान् आपादयति, कफपित्तानिलानां स्वस्थवृत्तपरिपालनेन यदा साम्यं स्यात् तदा स जाठरानलः "समः" इति संज्ञया भण्यते, एतादृशसमाग्निवान् स्वस्थ इति द्वितीयं स्वस्थताद्योतकं लक्षणम् ।

एते मन्दाग्न्यादयः कथं ज्ञातव्या इति विचार्यमाणे इमानि लक्षणानि मन्दाग्न्याद्यनुमानसाधकानि—

अयं पुरुषः, मन्दाग्निमान्, स्वल्पाहारयोग्यपरिणामाभावात्, यो नैवं स नैवं यथा स्वस्थः 'तस्मात्तथा तथा चायम्' इति व्यतिरेकिणानुमानेन पुरुषस्य मन्दाग्निमत्त्वं सिद्ध्यति । एवं अयं पुरुषः तीक्ष्णाग्निमान्, अतिभुक्तान्नादिपरिणामदर्शनात् वृकोदरवत् इत्यनुमानेन पुरुषस्य तीक्ष्णाग्नित्वं सिद्ध्यति ॥

एवमयं पुरुषः विषमाग्निमान्, स्वल्पबहुभुक्तस्य अनियत् परिणामदर्शनात् स्वल्पबहुवृष्टिप्ररूढशस्यवत् ।

एवमयं पुरुषः समाग्निमान्, हितमितभुक्तस्य कालेन सम्यक् परिणामदर्शनात् हितमितवृष्टिप्ररूढान्नादीनां कन्यार्कांशुभिः संजायमानपरिपाकवत् ॥ इत्थं स्वस्थलक्षणे समाग्निरपेक्षितः स च मन्दतीक्ष्णविषमजठरानलभेदेभ्यः पृथगेव निर्दिष्टानुमानहेतुभिः प्रतिपादितः—

तदुक्तम्—

समा समाग्ने रशिता मात्रा सम्यग् विपच्यते ।
स्वल्पापि नैव मन्दाग्ने विषमाग्नेस्तु देहिनः ॥
कदाचित्पच्यते सम्यक् कदाचिच्च न पच्यते ।
मात्रातिमात्राप्यशिता सुखं यस्य विपच्यते ॥
तीक्ष्णाग्निरिति तं विद्यात् समाग्निः श्रेष्ठ उच्यते ॥

एवं स्वस्थपुरुषस्य 'समाग्नि' रिति द्वितीयं विशेषणं प्रतिपाद्य तृतीयं विशेषण माह—"समधातुमलक्रियः" इति, धातवश्च मलाश्च धातुमलाः तेषां क्रियाः धातुमलक्रियाः ताः समाः यस्य सः समधातुमलक्रियः, एतेन धातूनां आहारपरिणामजन्य रसरक्तादिसप्तधातूनां "रसस्तुष्टि प्रीणनं रक्तपुष्टिं च करोति, रक्तं वर्णप्रसादं मांसपुष्टिं जीवयति च, इति सौश्रुते सूत्रस्थानीये पञ्चदशेऽध्याये प्रतिपादिताः, प्रत्यक्षखण्डेऽस्माभिरपि व्याख्याताः रसादीनां तुष्टि प्रीणन रक्तपुष्टि वर्णप्रसाद मांसपुष्टि जीवन—शरीरपुष्टिमेदः पुष्टि—स्नेहस्वेदास्थिपुष्टि दृढत्व—देहधारण मज्जपुष्टि—प्रीति स्नेहबल—शुक्रपुष्ट्य—स्थिपूरण धैर्यच्यवन प्रीति देहबल हर्षबीजात्मिकाः याः

क्रियाः ताः समाः स्वप्रमाणापेक्षितानधिकाः यस्य स:, पुनश्च मलादीनामपि पुरीषमूत्रस्वेदसिङ्घाणकादीनां प्राकृतकर्मापेक्षया त्याज्यत्वेन त्यक्तानां धार्यत्वेन धृतानां च, उपस्तम्भवाय्वग्निधारणा, बस्तिपूरणा विक्लेदकरत्व, क्लेदत्वक्सौकुमार्यकरात्मिकाः क्रियाः। ताश्च धातूनां मलानां च क्रियाः समाः यस्य सः समधातुमलक्रियः "इति स्वस्थस्य तृतीयं लक्षणं" व्याख्यातं भवति। एतेन त्रिदोषारब्धस्य अस्य पाञ्चभौतिकस्थूलशरीरस्य स्वास्थ्यं व्याख्यातं भवति, किन्तु नैतावता शरीरस्वास्थ्यलक्षणेन चिकित्साधिकृतः षड्धातुसमुदितः पुरुषः संपूर्णः सुखी स्वस्थो वा भण्यते, यतः मनोबुद्ध्यहंकारसमेतस्य जीवात्मनः रजस्तमोभ्यां मनोदोषाभ्यां विषयान् प्रति आकृष्यमाणत्वाद् सत्वगुणप्रधानस्य च मनसः कामक्रोधलोभमोहेर्ष्यामात्सर्यप्रभृतिभिरविद्याविकारैः प्रमथ्यमानत्वात्, तादृशमनोबुद्ध्यहंकारवानहमिति अविद्यारोपिताध्यासेन च पाञ्चभौतिकस्य स्थूलशरीरस्य उपरिनिर्दिष्टै लक्षणैः स्वास्थ्ये संपन्नेऽपि निरंतरं प्रतिकूलवेदनात्मकदुःखानुभव एव संभवति–अत आह " प्रसन्नात्मेन्द्रियमनाः " इति

आत्मा च इन्द्रियाणि च मनश्च आत्मेन्द्रियमनांसि तानि प्रसन्नानि यस्य सः प्रसन्नात्मेन्द्रियमनाः, एतादृशचतुर्थलक्षणवान् स्वस्थशब्देन भण्यते। मनोबुद्ध्यहंकारसमेत आत्मा जीवसंज्ञकः सुखदुःखमोहभाक् इति शास्त्रेषु प्रतिपादितम्। इन्द्रियाणि च सत्वगुणोपेतपाञ्चभौतिकानि श्रोत्रत्वक्चक्षूरसनघ्राणाख्यानीति

प्रत्यक्षखण्डे पञ्चीकृतप्रकरणे प्रतिपादितम्, तानि त्विन्द्रियाणि— " पराञ्चि खानि व्यतृणात् स्वयंभूः तस्मात् पराङ् पश्यति नान्तरात्मन् " इति भगवती श्रुति रेवेन्द्रियाणां पराङ्निर्माणेन नित्यशुद्ध बुद्धविमुक्तस्वभावादात्मनो विमुखत्वं प्रतिपादयति, अतः प्रत्यक्षानुमितिशब्दज्ञानुभूतिषु मोहबहुलेन मनसा समेतानि सन्ति तानीन्द्रियाणि रागद्वेषात्मकेषु रजस्तमोबहुलेषु बहुविधविकारेषु व्यासज्यन्ते। व्यासक्तानि च तानि सुखदुःखमोहानेव जनयन्ति यथा कस्मिंश्चिदेकस्मिन् भव्यसंगीते तच्छ्रवणादेवव्यामोहः, एवं मृद्वादिधर्मोपेते कस्मिंश्चिद्वस्तुनि स्पृष्टे सत्येव व्यामोहः, सौन्दर्यातिशय विशिष्टे कस्मिंश्चि द्रूपदर्शने व्यामोहः, कस्मिंश्चिदेकस्मिन् घृतसंस्कृत पुरोडाशभक्षणे विशिष्टाम्रफलभक्षणे वा व्यामोहः। गन्धतैल जातिचम्पक पारिजातपुष्पामोदे आघ्राते सति व्यामोहः, एवं क्रमेण, शब्दस्पर्शरूपरसगन्धाख्यैर्विषयैः श्रोत्रत्वक्चक्षूरसन घ्राणेन्द्रियाणां सन्निकर्षे सत्येव अविद्याविमोहितानां व्यामोहो भवत्येवेति सुप्रसिद्धं मनुष्यर्षिभ्य आरभ्य शतमखपर्यन्तां देवानां चरित्रेषु। अतो रजस्तमोभ्यां जन्यमानः स व्यामोहः सत्त्वावजयेनैव दूरीभवति। एवं मनोऽपि——

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद् दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥

इति श्रीमद्भगवद्गीतावचनात् वायोरिव चञ्चलप्रमाथिनः बलवतः अविद्यासंस्कारदृढस्य मनसो निग्रहः सदुष्कर इति

अर्जुनस्य मनोविषयके प्रश्ने योगेश्वरः श्री श्रीकृष्णस्तत्रैव समादधाति–

असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥ ३५ ॥
असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥ ३६ ॥

श्रीमद्भगवद्गीता अ. ६ ॥

इति मनसः स्थिरता–सत्वावजयश्च अभ्यासवैराग्याभ्यां भवति, यदा तु आत्मसंज्ञकं मनः इन्द्रियावजयेन वश्यं भवति, तदा आत्मनः शुद्धस्वरूपं व्यक्ततरं भवति आत्मेन्द्रियमनसां च प्रसन्नता दैवीं संपदमभिजातस्यैव भवति सा च दैवी–संपद् ।

अभयं सत्त्वसंशुद्धिः ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ १ ॥
अहिंसा सत्यमक्रोध स्त्यागः शान्तिरपैशुनम् ॥
दयाभूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥ २ ॥
तेजः क्षमाधृतिः शौचमद्रोहो नातिमानिता ॥
भवन्ति संपदं दैवी मभिजातस्य भारत ॥ ३ ॥

श्री. गी. अ. १६ ॥

एतादृशै दैवीसंपद्गुणैश्च आत्मेन्द्रियमनसां प्रसन्नता सिद्ध्यति– अतः एतादृशानि प्रसन्नानि आत्मेन्द्रियमनांसि यस्य सः " प्रसन्नात्मेन्द्रियमनाः " इति स्वस्थस्य चतुर्थं लक्षणं सिद्ध्यति एतेन–दोषाग्निधातुमलक्रियाणां साम्ये सति, आत्मेन्द्रियमनसां

प्रसन्नतारूपं यत् स्वास्थ्यं तद्वान् स्वस्थः इति स्वस्थलक्षणमिति फलितम् इति दिक् ।। एवं संपूर्णस्वस्थोऽपि दोषाग्नीनां साम्येन, धातुमलक्रियाणामपि साम्येन, आत्मेन्द्रियमनसां च प्रसन्नतारूपेण लक्षणेन अनुमीयते ।

एवं वातपित्तश्लेष्माख्यानां दोषाणां वृद्धिक्षयावपि अनुमानसाध्यौ भवतः—तथाहि—

अयं व्याधिमान् वाक्पारुष्यकार्श्यकार्ष्ण्यगात्रस्फुरणोष्णकामितानिद्रानाशाल्पबलत्वमाढवर्चस्त्ववान्, वातवृद्धिकरकृतस्थ्याहारविहारोपयोगत्वम्त्, अकालवृष्टिजनितविष्टब्धाजीर्णवत् ।। एव मयं व्याधिमान् पीतावभासतासंतापशीतकामित्वाल्पनिद्रतामूर्च्छाबलहानीन्द्रियदौर्बल्यपीतविण्मूत्रनेत्रत्ववान् पित्तवृद्धिकराम्ललविदाहिभोजनादिमत्त्वात् मद्यपानकृतपित्तमदात्ययवत् । एव मयं व्याधिमान् शौक्ल्यशैत्य स्थैर्य गौरवावसादतन्द्रा निद्रासन्ध्यस्थिविश्लेषवान् श्लेष्मवृद्धिकरगुरुमधुररसादिभोजन दिवास्वप्नोत्थश्लेष्मविकारत्वात् गुरु मधुर रसादिभोजनदिवास्वप्न जनितमेदोरोगवत् ।। इति वातपित्तश्लेष्मवृद्धिज्ञानानुमानानि ।।

एवं दोषाणां वृद्धिज्ञानलक्षणान्यनुमानानि व्याख्याय सांप्रतं तेषां क्षयलक्षणान्यनुमीयन्ते—

अयं व्याधिमान् मन्दचेष्टताल्पवाक्त्वाप्रहर्षमूढसंज्ञतावान् अतिसंशोधनातिसंशमनवेगविधारणासात्म्यान्नपानमनस्तापादिमत्त्वात् चिरकालभूगृहनिवासजनितकार्श्यवत् ।। इति वातक्षयानुमानम् ।

एवमयं व्याधिमान मन्दोष्माग्निता निष्प्रभताबान् गुरुमधुर रसभोजनादिना जठराग्निदौर्बल्ये सति पित्तक्षयकर द्रव्योपयोगात् दिवास्वप्नलवणाम्लमद्यातिसेवनजनितपैत्तिकपाण्डुवत् ॥ इति पित्त क्षयानुमानम् ॥

एवमयं व्याधिमान्, रूक्षतान्तर्दाहश्लेष्माशयशून्यतासंधिशैथिल्यतृष्णादौर्बल्यप्रजागरणवान्, श्लेष्मक्षयकरमिथ्याहारविहारोपसेवनात् अतिव्यायामव्ययाद्यारब्धप्रीणनादिकरश्लेष्मक्षयारब्धराजयक्ष्मवत् ।। इतिश्लेष्मक्षयानुमानम् ॥

एवं वृद्धानां दोषाणां यथा व्याधिकरत्वस्ता नियता तथा क्षीणा अपि दोषाः व्याधीं स्तद्विशेषांश्चोपद्रवारिष्टादीन् जनयन्त्येव–बहुषु व्याधिषु एको दोषो वृद्धः अन्यतरौ क्षपयति अन्यतरौ च वृद्धौ एकं क्षपयतः त्रयश्च वृद्धाः सप्तधातुषु असाध्यकल्पां विकृति मारभन्ते । एवमेकः क्षीणो अन्यतरौ वर्धयते; अन्यतरौ क्षीणौ सप्तधातुक्षयमारभेते, त्रयश्च क्षीणाः क्षीयमाणाश्च अष्टादशसु क्षयस्थानेषु क्रमेण क्षयं जनयन्तः राजक्ष्मरूपतां नयन्ति ' इति बहुधा वर्णितं व्याधिज्ञापकेषु निदानवर्णनेषु महर्षिभिः । अत्र तु त्रिदोषवादस्यैव प्रतिपादनीयत्वात् तेषां त्रयाणां वातपित्तश्लेष्मणां लक्षण वृद्धिक्षयान् तत्कृतांश्च विशिष्टविकारानेव आर्षग्रन्थोक्तान् ब्रूमः ॥ प्रतिपादितं चैतन्मुनिवरेण वाग्भटाचार्येण–अष्टांगहृदये सूत्रस्थानीये दोषभेदीयोध्याये–

चयो वृद्धिः स्वधाम्न्येव प्रद्वेषो वृद्धिहेतुषु ॥ २२ ॥

विपरीतगुणेच्छा च, कोपस्तून्मार्गगामिता ॥
लिंगानां दर्शनं स्वेषामस्वास्थ्यं रोगसंभवः ॥ २३ ॥
चयप्रकोपप्रशमा वायो ग्रीष्मादिषु त्रिषु ॥
वर्षादिषु तु पित्तस्य श्लेष्मणः शिशिरादिषु ॥ २४ ॥

दोषाणां व्याप्तिनिवृत्ति वैचित्र्यमप्युदाहरति—तद्यथा

व्याप्नोति सहसा देहमापादतलमस्तकम् ।
निवर्तते तु कुपितो मलोऽल्पाल्पं जलौघवत् ॥ २९ ॥

तथा च

नानारूपैरसंख्येयै विकाराः कुपिता मलाः ।
तापयन्ति तनुं तस्मा त्तद्धेत्वाकृतिसाधनम् ॥ ३० ॥
शक्यं नैकैकशो वक्तुमतः सामान्यमुच्यते ॥

दोषविकृतिजन्या व्याधयः तनुतापकरत्वहेतुना सामान्यतो दृष्टेनानुमानेनानुमेयाः इति फलितम् ॥ तथा च दोषा एव सर्व व्याध्युत्पादकाः, अत्र विषये हेतूदाहरणानि उच्यन्ते ।

दोषा एव हि सर्वेषां रोगाणामेककारणम् ॥ ३२ ॥
यथा पक्षी परिपतन् सर्वतः सर्वमप्यहः ।
छायामत्येति नात्मीयां यथा वा कृत्स्नमप्यदः ॥ ३२ ॥
विकारजातं विविधं त्रीन् गुणान् नातिवर्तते ।
तथा स्वधातुवैषम्यनिमित्तमपि सर्वदा ॥ ३२ ॥
विकारजातं त्रीन् दोषान्, — तेषां कोपे तु कारणम् ॥
अर्थैरसात्म्यैः संयोगः कालः कर्म च दुष्कृतम् ॥ ३४ ॥

हीनातिमिथ्यायोगेन भिद्यते तत्पुनस्त्रिधा ॥

एतेन सर्वरोगाः दोषविकृतिजन्याः असात्म्येन्द्रियार्थसंयोगात् त्रिगुणात्मिकप्रकृत्यारब्धविकारजातवत् " इत्यनुमानं साधितं भवति ॥

वातपित्तश्लेष्मणां वृद्धिक्षयलक्षणानि श्रीमद्भि वाग्भटाचार्यैरपि प्रतिपादितानि सूत्रस्थाने दोषादिविज्ञानीयेऽध्याये—

वृद्धस्तुकुरुतेऽनिलः ॥

कार्श्यकार्ष्ण्योष्णकामित्वकंपानाहशकृद्ग्रहान् ॥
बलनिद्रेंद्रियभ्रंशप्रलापभ्रमदीनताः ॥ ६ ॥

पीतविण्मूत्रनेत्रत्वक्क्षुत्तृड्दाहाल्पनिद्रताः ।
पित्तम्—[[वृद्धं सत् कुरुते इत्यन्वयः] ।
श्लेष्माग्निसदनप्रसेकालस्यगौरवम् ॥ ७ ॥
श्वैत्यशैत्यश्लथांगत्वं श्वासकासातिनिद्रताः ॥

इमानिवृद्धश्लेष्मलक्षणानि.

तथाच दोषाणां वातपित्तश्लेष्माख्यानां क्षीणलिङ्गानि यथा—

लिङ्गं क्षीणेऽनिलेऽङ्गस्य सादोऽल्पभाषितेहितम् ।
संज्ञामोहस्तथा श्लेष्मवृद्ध्युक्तामयसंभवः ॥ १५ ॥
पित्ते मन्दोऽनलः शीतं प्रभाहानिः—

कफे भ्रमः ॥

श्लेष्माशयानां शून्यत्वं हृद्द्रवश्लथसंधिता ॥ १६ ॥

क्षीणे पित्ते जाठरानलो मन्दो भवति शीतप्रभाहानी च भवतः, कफे क्षीणे श्लेष्माशयानां उरःशिरःसन्ध्याद्यानां शून्यता, भ्रमः, हृदयस्य दैन्यरूपा द्रवता, सन्धीनां च श्लथता भवन्ति ।

दोषः प्रकुपितो धातून् क्षपयत्यात्मतेजसा
इद्धः स्वतेजसा वह्निरुखागतमिवोदकम् ॥ ३९ ॥

सु. सू. अ. ॥ १९ ॥

इद्धः स्वतेजसा प्रदीप्तः वह्निः उखागतं स्थालीस्थं उदकं यथा क्षपयति तथैव स्वकारणैः प्रकुपितः वातपित्तश्लेष्मसंज्ञकः दोषः आत्मतेजसा धातून् क्षपयतीति भावः ॥

वर्णितप्रायमेतत् सुश्रुतप्रमाणरूपैरनुमानलक्षणैः । वृद्धिक्षयात्मकं वातपित्तश्लेष्माख्यानां दोषाणां वैषम्यञ्च अनुमानैरेव प्रतिपत्तव्यं स्यादिति प्रतिपादयन्त्याचार्याः—

दोषादीनां त्वसमता मनुमानेन लक्षयेत् ।
अप्रसन्नेन्द्रियं वीक्ष्य पुरुषं कुशलो भिषक् ॥ ४२ ॥

सु. सू. अ. १९ ॥

तथाच शोफाख्यानां व्याधीनां परिपाककाले या पीडा भवति, यश्च मांससिरास्नायुलसीकादीनां पाको भवति, यच्च पूयः भवति तानि पीडापाकपूयांसि केन कृतानि स्युरिति विचार्यमाणे पीडाकर्तृत्वं वातस्यैव सिद्धयति, पाकश्च पित्तकृत एव संभवति

पूयश्च मांससिरास्नायूलसीकादीनां पूयोभावता च, कफादिना नोत्पद्यते, साधितं चैतद् आमपक्वैषणीयेऽध्याये सुश्रुतसूत्रस्थाने—

वातादृते नास्ति रुजा न पाकः ।
पित्तादृते नास्ति कफाच्च पूयः ॥
तस्मात् समस्ताः परिपाककाले ।
पचन्ति शोफांस्त्रय एव दोषाः ॥ ८ ॥

शोफेषूपचीयमानेषु या पीडा भवति सा दूष्यानुगतदोषविकृतिहेतुत्वात् कर्तृजन्यैव, एतादृश्याः पीडाया वातादृते अन्यः कश्चन भाव उत्पत्तिं कर्तुं नैव शक्नुयात्, तथा चेदमनुमानम्—

शोफादिपीडा सकर्तृका कार्यत्वात् शिरोरोगपीडावत्, सा च पीडा दूष्यानुगतसकलशरीरव्यापिव्यानकृतैव सिद्ध्यति ॥ एवं शोफादिषु मांससिरास्नायुलसीकादीनां यः पाकः परिभाव्यते स च पाकः सकलशरीरव्यापित्वगिन्द्रियगतभ्राजकपित्तकृत एवेत्यनुमिनुमः । तथा च " शोफादिपाकः सकर्तृकः कार्यत्वात् आम्रफलपरिपाकवत् " तच्च पाककर्तृ, पित्तमेव " रागपक्त्योजस्तेजोमेधोकृत् पित्तम् " इति पाककर्तृत्वं पित्तस्यैव धर्मः, अतः शोफादिषु पाककर्तृता पित्तस्यैव सिद्ध्यति ॥

एवं शोफादिषु रक्तलसीकादीनां पूयोभावसंपादकत्वं श्लेष्मण एव संभाव्यते विकृतिं प्राप्नुवतां शोफगतदोषदूष्याणां पूयोभावसंपादकता नान्यस्य कस्यचन भवितुमर्हति, वायुनानुगतस्य पित्तस्य ऊष्मणा रक्तलसीकादिगतोदकधर्मणा श्लेष्मणा स्तत्र शोफस्थानेषु

चिरकालस्थायित्वात् शोफधर्मेणाच गुरुत्वपिच्छिलत्वधर्मणः श्लेष्मणः प्रतिरुद्धत्वात् श्लेष्मानुगतानां च दूष्याणां चिरकालपर्युषितान्नवत पूयोभावता नियतैव । अतः पूयोभावसंपादकत्वं श्लेष्मण एव सिद्ध्यति ॥ अतः शोफादिषु पीडापाकपूयोभावसंपादका वात पित्तश्लेष्माणा एव सिद्धाः, इत्यनुमानसिद्धं भवति ॥

एवं चरकसंहितायां त्रिविधकुक्षीये विमाने—" त्रिविधं कुक्षौ स्थापयेदवकाशांशमाहारस्याहारमुपयुञ्जानः, तद्यथैकमवकाशांशं मूर्तानामाहारविकाराणाम्, एकं द्रवाणां, एकं पुनर्वातपित्तश्लेष्मणाम्, एतावतीं ह्याहारमात्रामुपयुञ्जानो न अमात्राहारजं किंचिदशुभं प्राप्नोति ॥ ३ ॥ अत्र सूत्रे मूर्तानामाहारविकाराणामिव, द्रवाणामिव, वातपित्तश्लेष्मणां संचाराय, आहार परिणामकराणां भावानामथवा आहारपरिणामकरसाधनानां तेषामेव वातपित्तश्लेष्मणां रसाद्युत्पादनकर्मप्रयुक्तानां अवकाशांशदानमावश्यकतयोपपादितम् । अन्यथा आहारस्य अधिकमात्रावत्त्वे अर्थात् मात्रायां अधिकप्रमाणे आहारे उपयुक्ते सति यथा अशीतिवातविकाराणामायतनत्वमुक्तं तद्वत् हीनामात्रावत्त्वे—सर्वे एव दोषाः प्रकुप्यन्ति तदुक्तम्—

अतिमात्रं पुनः सर्वदोषप्रकोपणमिच्छन्ति सर्वकुशलाः

च. वि. स्था. सू. ७

तथा च आहारस्य अधिकामात्रावत्त्वे पुनस्तत्रैव दोषाणां प्रकोपणमुपपादितम्, मात्राया अधिकप्रामाण्ये च आहारे उपयुज्यमाने तत्तद्दोषजन्याजीर्णविकारांश्च पशुवद् भुञ्जानेषु प्रत्यक्षमुपलभामहे,

तांस्तान् अजीर्णविकारान् वातपित्तश्लेष्मणो विना नान्ये केच न भावाः, उत्पादयितुं समर्था भवन्ति, अतः अधोनिर्दिष्टान् अधिकामात्रावत्त्वे प्रयुक्तान् आहारान् उपयुञ्जाना विकारान् लभन्ते, ते च विकाराः वातपित्तश्लेष्मणाभि विना नोत्पद्यन्ते इति पूर्वमेव प्रतिपादितम् ते च विकारा यथा—

यो हि मूर्तानामाहारविकाराणां सौहित्यं गत्वा पश्चाद् द्रवैस्तृप्तिमापद्यते भूयः, तस्यामाशयगता वातपित्तश्लेष्माणोऽभ्यवहारेण अतिमात्रेणातिप्रपीड्यमानाः सर्वे युगपत् प्रकोपमापद्यन्ते। ते प्रकुपिता स्तमेवाहारराशिमपरिणतमाविश्य, कुक्ष्येकदेशमन्नाश्रिताविष्टम्भयन्तः सहसा वाप्युत्तराधराभ्यां प्रच्यावयन्तः पृथक् पृथग् विकारान् अभिवर्तयन्ति—अतिमात्रभोक्तुः ॥ ८ ॥

अतिमात्रेण आहारोपयोगेन प्रपीड्यमाना आमाशयगता वातपित्त श्लेष्माणः युगपत् प्रकुप्यन्ति, प्रकुपिताश्च ते अपरिणतमाहारराशि माविश्य, अपरिपक्वान्नाश्रिताः सन्तः कुक्ष्येकदेशं विष्टम्भयन्तः प्राणान्नाम्बुरसरक्तवाहिनां स्रोतसां मार्गान् अपरिपक्वेन अन्नरसेन अपिधापयन्तः वमनातिसारमार्गाभ्यां मुखपायुभ्यां प्रच्यावयन्तः अधोदर्शितान् विकारान् जनयन्ति। तथा च—

तत्र वातः शूलानाहाङ्गमर्दमुखशोषमूर्च्छाभ्रमाग्निवैषम्यसिरासङ्कोचनस्तम्भनानि करोति, पित्तं पुनः ज्वरमतीसारमन्तर्दाहं तृष्णामदभ्रमप्रलपनानि। श्लेष्मा तु छर्द्यरोचकाविपाकशीतज्वरालस्यगात्रगौरवाभिनिर्वृत्तिकरः संपद्यते ॥ च—वि—स्था अ. २ ॥

तथा चेमान्यनुमानानि—

आहारपरिणामकरसाधनभूतो वातः, शूलानाहाङ्गमर्दमुखशोषादिजनकः आहारस्याधिकामात्रात्वात्, भूकम्पजन्यनदीवृक्षादिक्षोभकरवातवत् । एवं शूलानाहादिकर्तृत्वं शरीरगतदोषसंज्ञकस्य वातस्यैव सिद्ध्यति ॥

एवमाहारपरिणामसाधनभूतं ऊष्मापरपर्यायं पित्तं, ज्वरातीसारान्तर्दाहाधिजनकं आहारस्याधिकामात्रात्वात् परस्परसंघर्षजन्यदावाग्निदह्यमानवनवत् " ॥ इत्थं ज्वरातीसारान्तर्दाहादिकर्तृत्वं अग्न्याशयगतपित्तसंज्ञकस्यैव दोषस्य सिद्धयति ॥

एवम् " आहारपरिणामसाधनभूतः क्लेदापरपर्यायः श्लेष्मा छर्द्यरोचकाविपाकशीतज्वरादिजनकः, आहारस्याधिकामात्रात्वात् पर्जन्यकृतशैत्यजनितछर्द्यरोचकादिवत् । इत्थं छर्द्यरोचकादिकर्तृत्वम् आमाशयगतविसर्गधर्मावलम्बकसंज्ञकस्य दोषाख्यश्लेष्मण एव सिद्धयति ॥

तथा च स्रोतःसिराधमनीरसवाहिनीनाड्यादयः दोषदूष्यवहमार्गा यदा दूषिताः स्युः, तद्दुष्टिकर्तृत्वमपि वातपित्तश्लेष्माख्यदोषकृतमेवेत्यनुमेयम् । तथा चोक्तम्—"तेषां प्रकोपात् स्थानस्थाश्चैव मार्गगाश्चैव शरीरधातवः प्रकोमापद्यन्ते, इतरेषां च प्रकोपादितराणि स्रोतांसि स्रोतांस्येव धातवश्च धातूनेव प्रदूषयन्ति । प्रदुष्टास्त्वेषां सर्वेषामेव वातपित्तश्लेष्माणः प्रदुष्टा दूषयितारो भवन्ति दोषस्वभावादिति । च. वि. स्था. अ. ५ ॥ अनेन, प्रदुष्टा वातपित्तश्लेष्माणः, स्रोतः

सिरादीनां तद्गतधातूनां च दूषयितारः दोषस्वभावात्, वाय्वग्निजल दूषितानुपयुज्यमानगृहवत् ॥ इत्यनुमानं स्रोतः सिरादीनांसप्तधातूनां च शरीरस्थवातपित्तश्लेष्माण एव दूषका इति सिद्धं भवति ॥ तदेतत् रोगानीके विमाने संक्षेपत उक्तम्—तत्र 'व्याधयोऽपरिसंख्येया भवन्त्यतिबहुत्वात्, दोषास्तु खलु परिसंख्येया भवन्त्यनतिबहुत्वात्। तस्माद्यथाचित्रं विकारा उदाहरणार्थमनवशेषेण च दोषा व्याख्यास्यन्ते। रजस्तमश्च मानसौ दोषौ। तयो र्विकाराः कामक्रोधलोभमोहेर्ष्यामानमदशोकचित्तोद्वेगभयहर्षादयः। वातपित्तश्लेष्माणस्तु खलु शारीरदोषाः, तेषामपि च विकारा ज्वरातीसारशोफशोषश्वासमेहकुष्ठादय इति दोषाश्च केवला व्याख्याताः विकारैकदेशश्च ॥ ९ ॥

तत्र तु खल्वेषां द्वयानामपि दोषाणां त्रिविधं प्रकोपणम्, तद्यथा—असात्म्येन्द्रियार्थसंयोगः प्रज्ञापराधः परिणामश्चेति। ६।

तथा च स्वस्थलक्षणेऽपि "समवातपित्तश्लेष्माणं ह्यरोगमिच्छन्ति भिषजः, यतः प्रकृतिश्चारोग्यम्, आरोग्यार्था च भेषजप्रवृत्तिः, सा चेष्टरूपा। तस्मांद्भवन्ति समवातपित्तश्लेष्माणः ॥ तथा चोत्तरत्र, तत्र समसर्वधातूनां सर्वाकारसमधिकदोषाणां तु त्रयाणां यथास्वं दोषाधिक्यमभिसमीक्ष्य दोषप्रतिकूलयोगीनि त्रीण्यनुप्रणिधानानि श्रेयस्कराणि भवन्ति यावदग्नेः समीभावात्। समे तु सममेव कार्यम्, एवं चेष्टा भेषजप्रयोगाश्चापरे, इत्यादि। च. वि. स्था. ६ अ० ॥

वातपित्तश्लेष्माणः दोष संज्ञकाः इति प्रत्यक्षखण्डे सयुक्तिकैः आर्षवचनैः, अनुमानखण्डे च कार्यकारणानुमितिसाधकैश्चानुमानैः प्रतिपादितम् ॥ प्रकृतिवर्णनेऽपि " न तु खलु सन्ति वातप्रकृतयः श्लेष्मप्रकृतयो वा, तस्य तस्य किल दोषस्य हि आधिक्यभावात् सा सा दोषप्रकृतिरुच्यते मनुष्याणाम् । न च विकृतेषु दोषेषु प्रकृतिस्थत्वमुपपद्यते । तस्मान्नेताः प्रकृतयः सन्ति । सन्ति खलु वातलाः पित्तलाः श्लेष्मलाश्च, अप्रकृतिस्थास्तु ते ज्ञेयाः । तेषां तु खलु चतुर्विधानां पुरुषाणां चत्वारि अनुप्रणिधानानि श्रेयस्कराणि इत्यादि । एवं केवलवातप्रकृतयः, केवलपित्तप्रकृतयः, केवल श्लेष्मप्रकृतयश्च अस्वस्थाः परिगण्यन्ते, चतुर्थस्तु समवातपित्त श्लेष्मप्रकृतिकः स्वस्थो भण्यते, तस्य समदोषत्वात् नैव स्वल्पेऽप्य पचारे एष रोगाक्रान्तो भवति, केवलवातपित्तश्लेष्मप्रकृतिकास्तु तत्तत्प्रकृतिविरुद्धे स्वल्पेऽप्यपचारे झटिति रोगाक्रान्ता भवन्तीति प्रत्यक्षमुपलभामहे । तथा चोक्तम्—

त्रयस्तु पुरुषा भवन्त्यातुराः, ते त्वनातुरास्तन्त्रान्तरीयाणां भिषजाम् । तद्यथा—वातलः, पित्तलः श्लेष्मलश्चेति, तेषां विशेष विज्ञानं वातलस्य वातनिमित्ताः, पित्तलस्य पित्तनिमिमित्ताः, श्लेष्म-लस्य श्लेष्मनिमित्ताः व्याधयः प्रायेण बलवन्तश्च भवन्ति ॥ १५ ॥

अत्रेदं चिन्त्यते—यदा गर्भशरीरारम्भकाः मिथ्याहारविहा-राभ्यां च व्याध्युत्पादकाः वातपित्तश्लेष्माणः यदा दोषत्वेन नैव स्वीक्रियेरन्, तदा गर्भशरीरादेव वातादिप्रकृत्यारब्धानां केषाञ्चित् स्नेहस्निग्धादयो मधुरा एव भावा उपशेरते, मृदूनि संशोधनानि च ।

नान्येभावाः।केषाञ्चित्त सर्पिष्पानादिकं, अधोभागेन च दोषहरणं मधुरतिक्तकषायशीताश्च भावा एव उपशेरते, नान्ये। केषाञ्चित्त तीक्ष्णोष्णानि संशोधनानि चणकमुद्गकुलत्थमकुष्ठयूषाद्या रूक्षादयो भावा एव उपशेरते न तथान्ये॥ एतेषामभ्यवहाराणां प्रत्यक्षदृष्टत्वात् तादृशप्रकृतिका स्तैस्तैर्भावै रनुमीयन्ते । तथा च प्रतिपादितमेव चरकसंहितायां विमानस्थानीये रोगानीके विमाने।

तत्र वातलस्य वातप्रकोपणोक्तान्यासेवमानस्य क्षिप्रं वातः प्रकोपमापद्यते,न तथेतरौ दोषौ, स तस्य प्रकोपमापन्नो यथोक्तै र्विकारैः शरीरमुपतपति बलवर्णसुखायुषामुपघाताय। तस्यावजयनम्–स्नेहस्वेदौ विधियुक्तौ मृदूनि च संशोधनानि स्नेहोष्णमधुराम्ललवणयुक्तानि, तद्वदभ्यवहार्याण्युपनाहनोपवेष्टनोन्मर्दनपरिषेकावगाहन संवाहनावपीडन वित्रासन विस्मापन विस्मारणानि, सुरासवविधानं स्नेहाश्चानेकयोनयो दीपनीयपाचनीयवातहरविरेचनीयोपहिताः, तथा शतपाक्याः सहस्रपाक्याः सर्वशः प्रयोगार्था बस्तयो बस्तिनियमः सुखशीलता चेति ॥ १६ ॥

पित्तलस्यापि––पित्तप्रकोपणोक्तान्यासेवमानस्य क्षिप्रं पित्तं प्रकोपमापद्यते, न तथेतरौ दोषौ। तदस्य प्रकोपमापन्नं यथोक्तैर्विकारैः शरीरमुपतपति बलवर्णसुखायुषामुपघाताय। तस्यावजयनम् सर्पिष्पानं सर्पिषा च स्नेहनमधश्च दोषहरणं मधुरतिक्तकषायशीतानां चौषधाभ्यवहार्याणामुपयोगो मृदुमधुरसुरभिशीतहृद्यानां

गन्धानां चोपसेवा, मुक्तामणिहारावलीनां च परमशिशिरवारि-संस्थितानां धारणमुरसा, क्षणे क्षणे चाग्र्यचन्दनप्रियङ्गुकालीय मृणाल शीतवातवारिभिः, उत्पल कुमुद कोकनदसौगन्धिकपद्मानुगतैरभिप्रोक्षणम्, श्रुतिसुखमृदुमधुरमनोऽनुगानां च गीतवादित्राणां श्रवणम्, चाभ्युदयानां सुहृद्भिश्च संयोगः संयोगश्चेष्टाभिः स्त्रीभिः-शीतोपहितांशुकस्रग्धारिणीभिः, निशाकरांशुशीतप्रवातहर्म्यवासः शैलान्तरपुलिनशिशिरसदनवसनव्यजनघनसेवनम्, रम्याणांचोपवनानां सुखशिशिरसुरभिमारुतोपवातानामुपसेवनम्, सेवनञ्च-नलिनोत्पलपद्मकुमुदसौगन्धिक पुण्डरीकशतपत्रहस्तानां सौम्यानां च सर्वभावानामिति ॥ १७ ॥

श्लेष्मलस्यापि श्लेष्मप्रकोपणोक्तान्यासेवमानस्य क्षिप्रं श्लेष्मा प्रकोपमापद्यते, न तथेतरौ दोषौ। स तस्य प्रकोपमापन्नो यथोक्तैर्विकारैः शरीरमुपतपति बलवर्णसुखायुषामुपघाताय। तस्यावजयनम्-विधियुक्तानि तीक्ष्णोष्णानि संशोधनानि, रूक्षप्रायाणि चाभ्यवहार्याणि कटुकतिक्तकषायोपहितानि, तथैव धावनलङ्घनप्लवनपरिसरणजागरणानि, युद्धव्यवायव्यायामोन्मर्दन स्नानोत्सादनानि, विशेषतस्तीक्ष्णानां दीर्घकालस्थितानां मद्यानामुपयोगः, सर्वशश्चोपवासस्तथोष्णवासः सधूमपानः सुखप्रतिषेधश्च सुखार्थमेवेति ॥ १८ ॥

एवं वातपित्तश्लेष्मप्रकृतिकानां नराणां तत्तद्दोषप्राधान्येन तत्तद्दोष प्रकोपणभावानां सेवनेन तत्तद्दोषप्रधाना व्याधयो बलवन्तो भवन्तीति प्रत्यक्षमुपलभामहे। इत्थञ्च वातपित्तश्लेष्मप्रकृतिकाः तत्तद्दोषविकृतिजन्यलक्षणैः अनुमिता भवन्ति।

तथाच—

समपित्तानिलकफाः केचिद् गर्भादिमानवाः ।
दृश्यन्ते वातलाः केचित् पित्तलाः श्लेष्मलास्तथा ॥ ३९ ॥
तेषामनातुराः पूर्वे वातलाद्याः सदातुराः ।
दोषानुशयिता ह्येषां देहप्रकृति रुच्यते ॥ ४० ॥
च. सू. स्था. अ. ७ ॥

दोषविकृतिजन्यलक्षणैश्च बद्धदोषसंचयप्रकोपक्षयलक्षणा-न्यनुमाय, प्राणाभिसराख्या भिषजः लङ्घनबृंहणशमनादिषूपक्रमेषु प्रयतन्ते । तथा चोक्तम्

प्रकृत्यन्तरभेदेन रोगानीकविकल्पनम् ।
परस्पराविरोधश्च सामान्यं रोगदोषयोः ॥
दोषसंख्याविकाराणा मेकदोषप्रकोपणम् ।
जरणं प्रति चिन्ता च कायाग्नेर्धुक्षणानि च ॥
नराणां वातलादीनां प्रकृतिस्थापनानि च ।
रोगानीके विमानेऽस्मिन् व्याहृतानि महर्षिणा ॥ २० ॥
च. सं. वि. स्था. अ. ६ ॥

विकारप्रकृत्यादिकं दोषाणां बुद्ध्वाऽपि चिकित्साधिकृतानां भिषजां नैव नियता सिद्धिः दृश्यते, अतः दोषदूष्यातुराणां सूक्ष्मा अवस्था अपि भिषग्वरैः कल्पनीया स्यात् । ताश्च सूक्ष्मसूक्ष्मा अवस्था

निर्णीयैव दोषौषधनिरूपणं कृत्वैव आतुरा उपक्रमणीयाः स्युः। ताश्चावस्था अनेन प्रकारेण निरूपणीयाः—

दूष्यं देशं बलं कालमनलं प्रकृतिं वयः।
सत्वं सात्म्यं तथाऽऽहारमवस्थाश्च पृथग्विधाः॥
सूक्ष्मसूक्ष्माः समीक्ष्यैषां दोषौषधनिरूपणे।
यो वर्तते चिकित्सायां न स स्खलति जातुचित्॥

वा. सू. स्था. अ. १२॥

दूष्यदेशबलकालानल प्रकृतिवयःसत्वसात्म्याहारान् तैस्तै रौषधकल्पनै स्तेषु षड्टत्वात्मकेषु दिनविभागेषु, तास्ताः सूक्ष्मसूक्ष्माः पृथग्विधा अवस्थाः समीक्ष्य—तासामवस्थानां सम्यक् प्रकारेण ईक्षणं कृत्वा यो भिषग्वरः प्राणाभिसरः सन् प्रवर्तते स प्राणाचार्यशब्दभाक् चिकित्सायां कदाचित् न स्खलति इति फलितोऽर्थः—

तथा चोक्तम्—

साध्यासाध्यविभागज्ञो ज्ञानपूर्वं चिकित्सकः।
काले चारभते कर्म यत्तत्साधयति ध्रुवम्॥ ७॥
अर्थविद्यायशोहानि मुपक्रोशमसंग्रहम्।
प्राप्नुयान्नियतं वैद्यो योऽसाध्यं समुपाचरेत्॥ ८॥

च. सू. स्था. अ. १०॥

इत्थं साध्यासाध्यविभागोऽपि दोषदूष्यदेशादीनां तारतम्य कल्पनयैव ज्ञायते, तदनन्तरञ्च ज्ञानपूर्विका चिकित्सा प्रवृत्ता

भवति प्राणाभिसराणां भिषजाम्। दोषविकृतिजन्या व्याधयोऽपि गुरुव्याधितलघुव्याधितभेदाभ्यामनुमीयन्ते । ते यथा—द्वौ पुरुषौ व्याधितरूपौ भवतः। तद्यथा गुरुव्याधित एकः—सत्वबल-शरीरसम्पदुपेतत्वात् लघुव्याधित इव दृश्यते। लघुव्याधितोऽपरः सत्वादीनामधमत्वाद् गुरुव्याधित इव दृश्यते । तयोरकुशलाः केवलं चक्षुषैव रूपं दृष्ट्वाऽध्यवसन्तो व्याधिगुरुलाघवे विप्रति-पद्यन्ते ॥ ३ ॥

गुरुव्याधितलघुव्याधितविज्ञानमपि दोषाणां तारतम्य भेदैः साधनीयं स्यात्, केवलं चक्षुषैव व्याधितरूपाणि पश्यन्तो भिषग्वराः सत्वबलशरीरसम्पद्युक्तत्वात् अयं लघुव्याधिरिति गुरावपि व्याधौ विप्रतिपन्नाः मोहयन्त्यातुरान् उपक्रमक्रमैः, स्वयं च मुह्यन्ति दोषतारतम्यसत्वबलशरीरसम्पदादीनां कल्पनायाम्, पुनश्चायं गुरुव्याधिरिति लघावपि व्याधौ सत्वादीनामधमत्वाद् तीक्ष्ण-संशोधनादिना शरीरं क्षिण्वन्त्येव लघुव्याधितानाम्। अतस्तत्र दोषाणां सत्वबलशरीरसम्पदादीनाञ्च तारतम्यविज्ञानं त्वावश्यक-मेव प्राणाभिसरपदभाजाम्। तदुक्तम्—

न हि ज्ञानावयवेन कृत्स्ने ज्ञेये ज्ञानमुपपद्यते, विप्रतिपन्ना-स्तु खलु रोगज्ञाने उपक्रमयुक्तिज्ञाने विप्रतिपद्यन्ते। ते यदा गुरु-व्याधितं लघुव्याधितरूपमासादयन्ति, तदा तमल्पदोषं मत्वा संशोधनकालेऽस्मै मृदुसंशोधनं प्रयच्छन्तो भूय एवास्य दोषानुदी-रयन्ति। यदा तु लघुव्याधितरूपमासादयन्ति, तं महादोषं मत्वा

संशोधनकालेऽस्मै तीक्ष्णं संशोधनं प्रयच्छन्तो दोषानतिहृत्य शरीरमस्य क्षिण्वन्ति, एवमवयवेन ज्ञानस्य कृत्स्ने ज्ञेये ज्ञानमिति मन्यमानाः स्खलन्ति, विदितवेदितव्यास्तु भिषजः सर्वं सर्वथा यथासंभवं परीक्ष्यं परीक्ष्य—अध्यवस्यन्तो न कचिदपि विप्रतिपद्यन्ते, यथेष्टमर्थमभिनिर्वर्तयन्ति चेति ॥ ४ ॥ च॰ वि. स्था. अ. ७ ॥

प्रतिपादितं तदेवार्थजातं श्रीमद्भिर्वाग्भटाचार्यैः—

"गुर्वल्पव्याधिसंस्थानं सत्वदेहबलाबलात् ॥ ६८ ॥
दृश्यतेऽप्यन्यथाकारं तस्मिन्नवहितो भवेत् ।
गुरुं लघुमिति व्याधिं कल्पयंस्तु भिषग्ब्रुवः ॥ ६९ ॥
अल्पदोषाकलनया पथ्ये विप्रतिपद्यते ॥

यस्मादेवम् । अतः—

ततोऽल्पमल्पवीर्यं वा गुरुव्याधौ प्रयोजितम् ॥ ७० ॥
उदीरयेत्तरां रोगान् संशोधनमयोगतः ॥
शोधनं त्वतियोगेन विपरीतं विपर्यये ॥ ७१ ॥
क्षिणुयान्न मलानेव केवलं वपुरस्यति ॥
अतोऽभियुक्तः सततं सर्वमालोच्य सर्वथा ॥ ७२ ॥
तथा युञ्जीत भैषज्य मारोग्याय यथा ध्रुवम् ॥

सू. स्था. अ. १२ ॥

"शोधनं त्वतियोगेन विपरीतं विपर्यये" इति वाक्यस्य सर्वाङ्गसुन्दराख्यव्याख्यायामपीत्थं वर्णितम्—खरनादेनाप्युक्तम्—

अल्पमुत्क्लेशयेद्दोषं बहु प्राणान्निहन्ति च ।
तस्मान्निरूप्य भिषजा देयं युक्तं विरेचनम् ॥ इति—

तथा ज्वरगुल्मादीनां च तत्प्रतिकारार्थं यद्दीयते भेषजं तत्रापि महारम्भेऽल्पम–अल्पवीर्ये च औषधं न देयमित्यस्मादेव दृष्टान्तीभूतादर्थादवगन्तव्यम् । इति उपरिनिर्दिष्टानां श्लोकानां व्याख्याने श्रीमन्त अरुणदत्ताचार्याः ॥

एवम्–"अल्पदोषाकलनया पथ्ये विप्रतिपद्यते" इत्युक्तत्वात् दोषाणां तारतम्येन–आकलनं तु आवश्यकमेव, अन्यथा मृदुतीक्ष्ण संशोधनयोग्यताया अनिर्णीतत्वात् व्याधितानां पुनराकुलीकरणं च नियतमेव संभाव्यते–अतस्ते वातपित्तश्लेष्माख्या दोषाः वृद्धिक्षयप्रशम–भेदैरेव वक्तव्याः स्युः । तथा च प्रतिपादितमेव श्रीमद्धिवाग्भटाचार्यैः—

वक्ष्यन्तेऽतः परं दोषा वृद्धिक्षयविभेदतः ॥ ७३ ॥
पृथक् त्रीन् विद्धि संसर्गं त्रिधा तत्र तु तान्नव ॥
त्रीनेव समया वृद्ध्या षडेकस्यातिशायने ॥ ७४ ॥
त्रयोदश समस्तेषु,–षट्द्वयेकातिशयेन तु ॥
एकं तुल्याधिकैः, षट् च तारतम्यविकल्पनात् ॥ ७५ ॥
पञ्चविंशतिमित्येवं वृद्धैः, क्षीणैश्च तावतः ।
एकैकवृद्धिसमताक्षयैः षट् ते, पुनश्च षट् ॥ ७६ ॥
एकक्षयद्वंद्ववृद्ध्या सविपर्यययाऽपि ते ॥

भेदा द्विषष्टि र्निर्दिष्टाः,
त्रिषष्टः स्वास्थ्यकारणम् ॥ ७७ ॥

"वक्ष्यन्ते" इति वृद्धिश्च क्षयश्च वृद्धिक्षयौ तयो विर्भेदः—विभागः तस्मात—वृद्धिक्षयविभेदतः—अतः परं दोषा वातपित्त-श्लेष्माणः वृद्धिक्षयविभागतः कथ्यन्ते । पृथग् व्यस्तान्— स्वप्रमा-धाधिकान् त्रीन् दोषान रोगहेतून् विद्धि—जानीहि—ते यथा—१ वातो-वृद्धः—२ पित्तं वृद्धं ३ श्लेष्मा वृद्धः । एवं त्रयो दोषाः वृद्धिभेदेन पृथगूज्ञेयाः । अधुना तेषां वातपित्तश्लेष्मणां त्रिधा संसर्गभेदो-वक्तव्यः । ४ वातपित्ते समेवृद्धे स्वस्थः—श्लेष्मा, ५ वातश्लेष्माणौ समौ वृद्धौ स्वस्थं पित्तं, ६ पित्तश्लेष्माणौ समौवृद्धौ, स्वस्थः वातः ॥

अन्यतराधिकवृद्धाभ्यां षट्, तद्यथा—७ वातपित्तयो वृद्धयोर्वा तोऽधिकोवृद्धः स्वस्थः श्लेष्मा, ८ वातपित्तयो वृद्धयोः पित्तमधिक-वृद्धं स्वस्थः श्लेष्मा, ९ वातश्लेष्मणो वृद्धयोः वातोऽधिकवृद्धः स्वस्थं पित्तम् १० वातश्लेष्मणो वृद्धयोः श्लेमाऽधिकवृद्धः स्वस्थं पित्तम् ११ पित्तश्लेष्मणो वृद्धयोः पित्तमधिकं वृद्धं स्वस्थो वातः १२ पित्त-श्लेष्मणो वृद्धयोः श्लेष्मा—अधिकवृद्धः स्वस्थो वातः ॥ त्रिश-स्तुवृद्धै त्रयोदश, तत्र त्रिभिरधिकैरेकः, अधिकैकदोषास्त्रयः, अधिकद्विदोषास्त्रयः, समतव्यमोल्वणाः षट् । तद्यथा १३ वातपित्त-श्लेष्मणां वृद्धानां वातोऽधिकवृद्धः, १४ वातपित्तश्लेष्मणां वृद्धानां पित्तमधिकवृद्धम्, १५ वातपित्तश्लेष्मणां वृद्धानां श्लेष्माऽधिक-वृद्धः ॥ अथाधिक द्विवृद्धदोषाः, तद्यथा—१६ वातपित्तश्लेष्मणां

वृद्धानां वातपित्ते अधिकवृद्धे, १७ वातपित्तश्लेष्मणां वृद्धानां वातश्लेष्माणौ अधिकवृद्धौ, १८ वातपित्तश्लेष्मणां वृद्धानां पित्तश्लेष्माणौ अधिकवृद्धौ, १९ क्षीणो वातः स्वस्थौ पित्तश्लेष्माणौ, २० क्षीणं पित्तं स्वस्थौ वातश्लेष्माणौ, २१ क्षीणः श्लेष्मा स्वस्थे वातपित्ते, एवं पृथक् त्रय एव। अथ हीनमध्योल्बणवृद्धाः षडुच्यन्ते, तत्र समः, समवृद्धो, हीनवृद्ध इत्यर्थः–तद्यथा २२ हीनवृद्धो वातः मध्यवृद्धं पित्तं अधिकवृद्धः श्लेष्मा, २३ हीनवृद्धो वातः, मध्यवृद्धः श्लेष्मा, अधिकवृद्धं पित्तम्, २४ हीनवृद्धं पित्तं, अधिकवृद्धो वातः, मध्यवृद्धः श्लेष्मा, २५ मध्यवृद्धो वातः, हीनवृद्धं पित्तं, अधिकवृद्धः श्लेष्मा, २६ हीनवृद्धः श्लेष्मा, अधिकवृद्धं पित्तं, मध्यवृद्धो वातः, २७ अधिकवृद्धो वातः, मध्यवृद्धं पित्तं, हीनवृद्धः, श्लेष्मा, २८ सर्वदोषैः समवृद्धैरेकः, यथा समाः वृद्धा वातपित्तश्लेष्माणो यस्य स समवृद्धवातपित्तश्लेष्मा। उक्तं च तन्त्रान्तरे–

"द्व्युल्बणैकोल्बणैः षट् स्यु र्हीनमध्याधिकैश्च षट्।
समश्चैको विकारास्ते सन्निपाता स्त्रयोदश" इति

"पञ्चाशदेवं तु सह भवन्ति क्षयमागतैः" इति सुश्रुते उत्तरतन्त्रे दोषभेदविकल्पाध्याये प्रतिपादितत्वात्। एवमनेन प्रकारेण क्षयमागते पञ्चविंशतिदोषभेदैः सह पञ्चाशद् भवन्ति। तद्यथा–वातपित्तकफैरेकैकैः क्षीणैः त्रयो भेदा भवन्ति, द्विशो नवै प्रोच्यन्ते तद्यथा–२९ वातपित्ते समक्षीणे स्वस्थः श्लेष्मा, ३०

वातश्लेष्माणौ समक्षीणौ स्वस्थं पित्तम्, ३१ पित्तश्लेष्माणौ सम- हीनौ स्वस्थो वातः ॥ अधिकक्षीणाः षट्, तद्यथा—३२ वातपित्तयोः क्षीणयोः वातोऽधिकक्षीणः स्वस्थः श्लेष्मा, ३३ वातपित्तयोः क्षीणयोः पित्तमधिकक्षीणं स्वस्थः श्लेष्मा, ३४ वातश्लेष्मणोः क्षीणयोः वातोऽधिकः क्षीणः स्वस्थं पित्तम्, ३५ वातश्लेष्मणोः क्षीणयोः श्लेष्माऽधिकक्षीणः स्वस्थं पित्तम्—३६ पित्त- श्लेष्मणोः क्षीणयोः पित्तमधिकक्षीणं स्वस्थो वातः, । ३७ पित्तश्लेष्मणोः क्षीणयोः श्लेष्माऽधिकक्षीणः स्वस्थो वातः, ।

अथ क्षीणदोषत्रयभेदास्त्रयोदश प्रोच्यन्ते, तत्र—३८ त्रिभिरपि सम- क्षीणैरेकः, अधिकैकैकक्षीणैश्च त्रयः यथा—३९ वातपित्तश्ले- ष्मणां क्षीणानां वातोऽधिकक्षीणः, ४० वातपित्तश्लेष्मणां क्षीणानां पित्तमधिकं क्षीणं, ४१ वातपित्तश्लेष्मणां क्षीणानां श्लेष्माऽधिक- क्षीणः, अथाधिकक्षीणद्विदोषाः तद्यथा—४२ वातपित्तश्लेष्मणां क्षीणानां वातपित्ते अधिकक्षीणे, ४३ वातपित्तश्लेष्मणां क्षीणानां वातश्लेष्माणौ अधिकक्षीणौ, ४४ वातपित्तश्लेष्मणां क्षीणानां पित्त- श्लेष्माणौ अधिकक्षीणौ, अथ हीनमध्योल्बणक्षीणाः षट् प्रोच्य- न्ते, तद्यथा—४५ हीनक्षीणो वातः, मध्यक्षीणं पित्तं, अधिक- क्षीणः श्लेष्मा, ४६ मध्यक्षीणो वातः, हीनक्षीणं पित्तं, अधिक- क्षीणः श्लेष्मा, ४७ अधिकक्षीणो वातः मध्यक्षीणं पित्तं, हीन- क्षीणः श्लेष्मा, ४८ हीनक्षीणो वातः अधिकक्षीणं पित्तं, मध्य- क्षीणः श्लेष्मा, ४९ अधिकक्षीणो वातः हीनक्षीणं पित्तं, मध्य- क्षीणः श्लेष्मा ५० मध्यक्षीणो वातः, अधिकक्षीणं पित्तं, हीन-

क्षीणः श्लेष्मा । क्षीणेत्यादि—अत्र मध्यशब्देन स्वस्थो दोषोऽभिधीयते, अधिक शब्देन च वृद्धः ॥ तत्र क्षीणमध्यादिकभेदेन षट् । तद्यथा—५१ क्षीणो वातः, स्वस्थं पित्तं, वृद्धः श्लेष्मा, ५२ क्षीणो वातः, वृद्धं पित्तं, स्वस्थः श्लेष्मा, ५३ स्वस्थो वातः, पित्तं क्षीणं, वृद्धः श्लेष्मा: ५४ वृद्धो वातः, क्षीणं पित्तं, स्वस्थः श्लेष्मा, ५५ स्वस्थो वातः, वृद्धं पित्तं, क्षीणः श्लेष्मा, ५६ वृद्धो वातः स्वस्थं पित्तं क्षीणः श्लेष्मा, अथ द्विक्षीणैकवृद्धांस्त्रीनाह ५७ वातपित्ते क्षीणे वृद्धः श्लेष्मा, ५८ वातश्लेष्माणौ क्षीणौ, पित्तं वृद्धं, ५९ पित्तश्लेष्माणौ क्षीणौ; वातो वृद्धः अथ द्विवृद्धैकक्षीणानाह ६० वातपित्तेवृद्धे क्षीणः श्लेष्मा, ६१ वातश्लेष्माणौ वृद्धौ क्षीणं पित्तम् ६२ पित्तश्लेष्माणौ वृद्धौ क्षीणो वातः ॥ एव मनेन प्रकारेण—

त्रय एव पृथग् दोषा द्विशो नव समाधिकैः ।
त्रयोदशाधिकैक द्वि सममध्योल्वणै स्त्रिशः ॥ १० ॥
पञ्चाशदेवं तु सह भवन्ति क्षयमागतैः ।
क्षीणमध्याधिकक्षीण क्षीणवृद्धैस्तथाऽपरैः ॥ ११ ॥
द्वादशैवं समाख्यातास्त्रयो दोषा द्विषष्टिधा ॥

समाख्याताः—वातपित्तश्लेष्मणां त्रयाणां दोषाणा—मुपरिनिर्दिष्ट प्रकारेण द्विषष्टिधा भेदाः व्याख्याताः, स्वस्थैस्तु वातपित्त श्लेष्मभिः ६३ स्वास्थ्यं त्रिषष्टमिति स्वस्थलक्षणानुमानेऽस्मिन्नेवानुमानखण्डे निरूपितम् । एतेषां वातपित्तश्लेष्मणां वृद्धक्षीणानां

लक्षणानि तु प्रायः प्रत्यक्षखण्डे प्रतिपादितानि, शिष्यबुद्धिवैश-द्यार्थं तु अत्रापि पुनस्तानि स्मार्यन्ते तद्यथा—

वातवृद्धौ—वाग्बाहुल्यं, कार्श्यं कार्ष्ण्यं गात्रस्फुरणमुष्णकामिता निद्रानाशोऽल्पबलत्वं गाढवर्चस्त्वं चेति, **पित्तवृद्धौ** पीतावभासता सन्तापः शीतकामित्वमल्पनिद्रता मूर्च्छा बलहानिरिन्द्रियदौर्बल्यं, पीतविण्मूत्रनेत्रत्वं चेति, **श्लेष्मवृद्धौ** शौक्ल्यं शैत्यं स्थैर्यं गौरव मवसादस्तन्द्रानिद्रासन्ध्यस्थिविश्लेषश्च । **वातक्षये** मन्दचेष्टता अल्पवाक्त्वमप्रहर्षो मूढसंज्ञता च । **पित्तक्षये** मन्दोष्माग्निता निष्प्रभता च । **श्लेष्मक्षये** रूक्षताऽन्तर्दाह आमाशयेतरश्लेष्माशय शिरसां शून्यता सन्धिशैथिल्यं तृष्णा दौर्बल्यं च । एव मेतै लक्षणैः प्रकृतिसमसमवेतानां वृद्धानां क्षीणानां च वातपित्तश्लेष्मणामव-गमो मिश्रैश्च लक्षणैः संसर्गसन्निपातावगम इति । सुश्रुतटीकायां श्रीमन्तः डल्हणाचार्याः ।

प्रकृतिसमसमवेतत्वं नाम रसानां दोषाणां च मिलितानां यः प्रकृतिगुणानुपमर्देन मेलको भवति स प्रकृतिसमसमवाय शब्देन उच्यते, तदवच्छिन्नत्वं नाम मिलितानां रसदोषाणां प्रकृतिगुणानु-पमर्देन मेलकत्वं । विकृतिविषमसमवायस्तु प्रकृतिगुणोपमर्देनैव भवति अनेन प्राकृतगुणोपमर्दनपूर्वक विषमारब्धत्वं नाम विकृतिविषमसम-वेतत्वमिति फलितम् । तथा च प्रकृतिसमसमवाय विकृतिविषमसम-वाययोश्च—अयमर्थः—प्रकृत्या हेतुभूतया समः कारणानुरूपो यः समवायः कार्यकारणभावसंबन्धः स प्रकृतिसमसमवायः, कारणानुरूप

कार्यमिति फलितम्, यथा शुक्लतन्तुसमवायारब्धस्य पटस्य शुक्लत्वम् अथवा वातप्रकृतिकस्य वातलाद्याहारजातं सेवमानस्य वात प्रकोपकाले वर्षादौ " वेपथु र्विषमो वेगः कण्ठोष्ठपरिशोषणम् । निन्द्रानाशः क्षवस्तम्भो गात्राणां रौक्ष्यमेव च " इत्यादिलक्षणकः यो, ज्वर उत्पद्यते स नाम प्रकृतिसमसमवायरब्ध इति ज्ञेयं । एवं पित्तप्रकृतिकस्य श्लेष्मप्रकृतिकस्य वा क्रमेण शरदि वसन्ते च यः पित्तज्वरः श्लेष्मज्वरो वा उत्पद्यते, स नाम प्रकृतिसमसमवायारब्धः, दोषप्रकृत्यारब्धदोषप्रकोपजनितत्वात् ॥ विकृतिविषम समवायस्तु विकृत्या हेतुभूतया विषमः कारणानुरूपः समवायो विकृतिविषमसमवायः, यथा हरिद्राचूर्णसंयोगे लौहित्यम् इति हरिद्रा पीतवर्णा प्रसिद्धा सुधाऽपरपर्यायं तु चूर्णं उष्णधर्मकं श्वेत-वर्णं पार्थिवं, द्वयोरपि पार्थिवयोः यः संयोगविशेषः, तेन रक्तवर्णा विकृति रारभ्यते, तया विकृत्या विषमः हरिद्रायाः रक्तीकरणरूप-कारणाननुरूपो यः समवायः स विकृतिविषमसमवाय इत्यर्थः । अथवा संसर्गजन्येषु विकारेषु सन्निपातजन्येषु वा विकारेषु दोषाणां संसर्गसन्निपाताभ्यां आतुरप्रकृत्याः या विकृतिरारभ्यते तया विकृत्या विषमः यः समवायः रोगारम्भकदोषविकृतिप्रको-पाभ्यां जन्यमानः उपद्रवविशेषः स विकृतिविषमसमवायारब्धः इत्यपि प्रतिफलति, अनेन " तृष्णा मूर्च्छा भ्रमो दाहः स्वप्न नाशः शिरोरुजा । कण्ठास्यशोषो वमथू रोमहर्षोऽरुचिस्तमः इत्यादिकानि दोषसंसर्गजन्यलक्षणानि, क्षणे दाहः क्षणे शीत मस्थिसन्धिशिरोरुजा, सास्रावे कलुषे रक्ते निर्भुग्ने चापि लोचने "

इत्यादिकानि सन्निपातजन्यलक्षणानि विकृतिविषमसमवाया-रब्धानि ' इत्यनुमीयन्ते । तदेतत् प्रतिपादितं चरकसंहितायां विमानस्थानीये रसविमाने—

न ह्यमानज्ञो दोषादीनां भिषक् व्याधिनिग्रहसमर्थो भवति ; तस्माद्दोषादिमानज्ञानार्थं विमानस्थानमुपदेक्ष्यामोऽग्निवेश ॥ ३ ॥

तत्रादौ रसद्रव्यप्रभावान् वक्ष्यामः—रसास्तावत् षट् मधुराम्ललवणकटुतिक्तकषायाः । ते सम्यगुपयुज्यमानाः शरीरं यापयन्ति, मिथ्योपयुज्यमानास्तु खलु दोषप्रकोपनायोपकल्पयन्ति ॥ ४ ॥

दोषाः पुनस्त्रयो वातपित्तश्लेष्माणः । ते प्रकृतिभूताः शरीरोपकारका भवन्ति, विकृतिमापन्नास्तु खलु नानाविधैर्विकारैः शरीरमुपतापयन्ति ॥ ५ ॥

तत्र दोषमेकैकं त्रयस्त्रयो रसा जनयन्ति, त्रयस्त्रयश्चोपशामयन्ति । तद्यथा कटुतिक्तकषाया वातं जनयन्ति, मधुराम्ललवणास्त्वेनं शामयन्ति । कट्वम्ललवणाः पित्तं जनयन्ति, मधुरतिक्तकषाया स्त्वेनं शमयन्ति । मधुराम्ललवणाः श्लेष्माणं जनयन्ति, कटुतिक्तकषाया स्त्वेनं शमयन्ति ॥ ६ ॥

रसदोषसन्निपाते तु ये रसा यैर्दोषैः समानगुणाः समानगुणाभूयिष्ठा वा, ते तानभिवर्धयन्ति, विपरीतगुणास्तु विपरीतगुणाभूयिष्ठा वा शमयन्त्यभ्यस्यमाना इत्येतद्व्यवस्थाहेतोः षट्त्वमुपदिश्यते रसानां परस्परेणासंसृष्टानाम्, त्रित्वं च दोषाणाम् ॥ ७ ॥

अत्रेदमनुमीयते–रसास्तु सर्वस्मिन्नपि जगति मधुरादिभेदेन षडेव, संसृष्टानां तरतमयोगेन मिलितानामेतेषां पुनः त्रिषष्टिभेदा जायन्ते, यदि नाम मधुराम्ललवणाः अत्युपयुज्यमानाः श्लेष्माणमेव जनयन्ति प्रकोपयन्ति वा, दोषाणामपि तदा वृद्धिक्षयात्मकं तारतम्यं तु नियतमेव, स्थानभेदैः प्रकुपितः खलु श्लेष्मा, तद्विकृतिहेतोः व्याधिकरः स्यात् तर्हि तद्विकाराणां शमनोपाये सर्वदेशीया अपि भिषजः कटुतिक्तकषायैरेव द्रव्यरसै स्तद्विकारान् शमयितुं प्रयतमाना दरीदृश्यन्ते, एतादृशैः तत्तद्दोषविकारशमनै रसैः उपशयो व्याधिनिवृत्ति र्वा दृष्टिगोचरः स्यात्तर्हि को नाम नानुमन्येत " मधुराम्ललवणै र्जनितश्लेष्मविकारा एते भिषग्वरैः कटुतिक्तकषायप्रधानैरेव रसै स्तादृशै र्वा भावैः उपशमिताः, स्वस्थीकृतोऽयं व्याधिग्रस्तश्चेति " एवं वातपित्तजनकान् वातपित्तप्रकोपकरान् वा रसान् सेवमानः, यदा वातपित्तविकृतिजन्यान् व्याधिविशेषानुपलभते, तदा मधुराम्ललवणप्रधानैरेव द्रव्यरसैस्तादृशै र्वा भावैः वातविकारान् , पित्तविकृतिजन्यांश्च व्याधीन् मधुरतिक्तकषायै रसैस्तादृशै र्भावै र्वा " अंशांशकल्पनापुरःसरमेवोपशामयन्ति भिषग्वराः । अतः वातपित्तविकृतय इव तैस्तैर्भावै रुपशीयमाना द्रव्यरसा अपि वातपित्तविकृती रनुमापयन्ति ॥ दोषविकाराणामपरिसंख्येयत्वे रससंसर्गसन्निपातै र्भिद्यमाना रसभेदविशेषा अपि यथा अपरिसंख्येया भवन्ति तथा तत्तद्दोषारब्धप्रकृतिभेदा अपि भिद्यन्ते, दोषभेदभिन्नत्वात्, दृष्टं च लोके यथा केचित् रसभेदभिन्ना भक्ष्यभावविशेषाः

कासुचित् प्रकृतिषु केषुचिद् वा देशेषु उपशेरते, कैश्चिच्च उपयुज्यमाना स्त एव रसभेदभिन्ना भक्ष्यपेयविशेषाः, व्याधिविशेषा नेवोत्पादयन्ति । नहि सर्वथा सर्वमेव वस्तुजातं सर्वानेव उपशय मीयात् । तत्र तु हेतुः दोषभेदभिन्नत्वात्, इति वर्णितप्रायः, तत्तद्दोषारब्धप्रकृतिभेदानामपि प्रत्यक्षोपलम्भात् ते ते दोषभेदा अनुमेया एव, इति सिद्धं भवति ॥ तदुक्तम्—

संसर्गविकल्पविस्तरो ह्येषामपरिसंख्येयो भवति विकल्पभेदाऽपरिसंख्येयत्वात् ॥ ८ ॥

तत्र खलु अनेकरसेषु द्रव्येषु—अनेकदोषात्मकेषु च विकारेषु रसदोषप्रभावमेकैकत्वेनाभिसमीक्ष्य ततो द्रव्यविकारप्रभाव तत्त्वं व्यवस्येत् ॥ ९ ॥

संसृष्टरसानां संसृष्टदोषाणां च प्रभावः अनयैव युक्त्या अनुमेय इति फलितम् । द्रव्याणि हि अनेकरसात्मकानि, तदुपयोगजन्यविकाराश्च अनेक दोषात्मकाः, अतः अयं उपयुक्तरस विकारः अयं च शरीरारम्भकदोषविकारः इति एकैकत्वेन अभिसमीक्ष्य—रसोपयोगजन्यं दोषविकारं रसोपयोगजन्यं वा उपशयं आयुर्वेदोक्तन्यायेन निर्णीय रसगुणदोषविकृतिजातं समुदितप्रभावं अध्यवसेद् इति तात्पर्यम् ॥

अयं च रसदोषप्रभावद्वारा द्रव्यविकारप्रभावनिश्चयः सर्वस्मिन् द्रव्ये विकारे वा नानुमेयः स्यात्—तथा चोक्तम्—

न त्वेवं खलु सर्वत्र। न हि विकृतिविषमसमवेतानां नानात्मकानां द्रव्याणां परस्परेण चोपहतानामन्यैश्च विकल्पनै र्विकल्पितानामवयवप्रभावानुमानेन समुदायप्रभावतत्त्वमध्यवसातुं शक्यम् ॥ १० ॥

एतस्य संदर्भस्य श्रीमद्भिश्चक्रदत्तमहोदयै रित्थं व्याख्यानं कृतम्—तद्यथा—विकृतिविषमसमवेतानामिति—विकृतिसमवेतानां तथा विषमसमवेतानाम्। समवेतानामिति मिलितानां रसानां दोषाणां च, तत्र रसस्य विकृतिसमवायो यथा—मधुरे तण्डुलीयके, मधुरो हि (रसः) प्रकृत्या स्नेहवृष्यत्वादिकरः, तण्डुलीयके विकृतिसमवेतत्वेन तन्न करोति। विषमसमवेतास्तु तिले कषायकटुतिक्तमधुराः। यदि हि इमे रसाः अमात्रया समवेता न स्यु स्ततस्तिलोऽपि पित्तश्लेष्महरः त्रिदोषहरो वा स्यात्, पित्तकफकरस्त्वयम्। तेन—अत्र रसानां क्वचित् कर्तृत्वम्—अकर्तृत्वं च क्वचिदिति वैषम्य मुन्नीयते। इत्यन्यत्र विस्तरः।

एवं दोषतद्भेदविस्तरं प्रकृतिसमसमवेतविकृतिविषमसमवेतानां च दोषविकाराणां कल्पनाविशेषांश्च व्याख्याय शस्त्रकर्मसाध्येष्वपि व्याधिषु वातपित्तश्लेष्मणां संबन्धो वक्तव्यः। तत्राष्टविधेष्वपि छेद्य—भेद्य—लेख्य—वेध्य—एष्य—आहार्य—स्राव्य सीव्याख्येषु शस्त्रकर्मसु, भगन्दरग्रन्थ्यादीनां छेद्यानां, विद्रधि विसर्पप्रमेहपिडकाशोफस्तनरोगादीनां भेद्यानां, रोहिणीकिला-

सोपजिह्विकार्शोमण्डलमांसकन्यादीनां लेख्यानां दकोदरादीनां चं वेध्यानां नाडीव्रणासशल्यव्रणादीनाञ्च एष्याणां शर्कराऽश्मरीमूढगर्भगुदनिचितवर्चसां च आहार्याणां श्लीपद विषजुष्टशोणितपञ्चविद्रधिकुष्ठादीनां अर्बुदग्रन्थिविसर्पोपदंशोष्ठर्थ्व्याध्यादीनाञ्च स्राव्याणां, सुलिखितगदसद्योव्रणादीनां च सीव्यान्नां व्याधीनामुपचारेषु शस्त्रकर्मप्रयोगे, तत्तद्धेतुदूषितवातपित्तश्लेष्मासृजां रक्तरक्तलसीकादिभि र्यः दूष्यविशेषैः सबन्धः स वातपित्तश्लेष्मकृत एवेत्यनुमितो भवति। तथा च–व्रणास्रावविज्ञानीये सुश्रुतसंहितायाः सूत्रस्थानीयेऽध्याये–अत ऊर्ध्वं सर्वव्रणवेदना वक्ष्यामः–“तोदन भेदन ताडनच्छेदनायमनमन्थनविक्षेपण चुम्चुमायननिर्दहनावभञ्जनस्फोटनविदारणोत्पाटनकम्पनविविधशूल विश्लेषणविकिरणपूरणस्तम्भनस्वप्नाकुञ्चनाङ्कुशिकाः संभवन्ति, अनिमित्तविविधवेदनाप्रादुर्भावो वा मुहुर्मुहु र्यत्रागच्छन्ति वेदनाविशेषास्तं वातिकमिति विद्यात्। ओषचोषपरिदाहधूमायनानि यत्र गात्रमङ्गारावकीर्णमिव पच्यते, यत्र चोष्माभिवृद्धिः, क्षते क्षारावसिक्तवच्च वेदनाविशेषास्तं पैत्तिकमितिविद्यात्, पित्तवद्रक्तसमुत्थं जानीयात्। कण्डूर्गुरुत्वं सुप्तत्वमुपदेहोऽल्पवेदनत्वं स्तम्भः शैत्यञ्च यत्र तं श्लैष्मिकमिति विद्यात्, यत्र सर्वासां वेदनानामुत्पत्तिस्तं सान्निपातिकमिति विद्यात् ॥ ११ ॥

अत्रेदं चिन्त्यते–शस्त्रकर्मसाध्येष्वपि व्याधिषु तोदनभेदनादिपीडाविशेषास्तु व्रणितानां नियता एव, एवं ओषचोषादयोऽपि व्रणव्याधिग्रस्तैर्भारतीयैरन्यदेशस्थैर्वा अनुभूयन्ते एव, एवं कण्डूगुरु-

त्वादयोऽपि भावविशेषाः सर्वेषामपि व्रणितानां भवन्त्येव, इत्थं व्रणितानां देहे तोदनभेदनादिपीडाकरः कः ? किञ्च ओषचोषादि संपादकश्च ? कश्च कण्डूगुरुत्वादिजनकः ? इति पृष्टा आंग्लभिषजः किं ब्रुयुः ! पीडाकरत्वञ्च दोषत्वेन संमतस्य मानवादिदेहस्थस्य धातुदोषमलसंज्ञां प्राप्तस्य वायोरेव इति सिद्धमनुमितं च भवति; "वातादृते नास्ति रुजा न पाकः "इत्यादि श्लोके तथैव प्रतिपादितत्वात् स्थानात् स्थानान्तरं गत्वा या पीडा व्रणितानामुत्पद्यते सा चल-स्वभावात् सदागतिसंज्ञां लभमानात् सकलशरीरव्यापकात् मानवादि देहस्थदोषसंज्ञकवायोरेव भवतीति सर्वैरपि चिकित्साधिकृतैरभ्युप-गन्तव्यम् । एवं व्रणितानां ये ओषचोषादयो भवन्ति, तेऽपि उष्ण-धर्मिणः उष्णधर्मकपित्तकृता एव भवन्ति, तच्च पित्तं पञ्चधा विभक्त-मपि आहारपरिणामादिजन्यरसादिषु सप्तधातुष्वपि व्यापकत्वेनोप-लभ्यते, व्रणादिषु अनुभूयमानाश्च ओषचोषादयोऽपि पित्तवाहि-नीषु सिरासु सूक्ष्मरूपेण संचरता पित्तेनैव संपद्यन्ते, तीक्ष्णगतित्वाच्च पित्तस्य व्यापकत्वाच्च पित्तवाहिनीनां ओषचोषादयः स्थलविशेषेषु भवन्त्येवेति स्वीकारे न तव काचन हानिः, अतः व्रणादिषु ओष-चोषादिकर्तृत्वं सकलशरीरव्यापिपित्तकृतमेवेति सिद्धमनुमितं च भवति । एवं—व्रणितानां यद् कण्डूगुरुत्वाद्युत्पद्यते, तदपि सकल-शरीरव्यापिश्लेष्मणोऽन्तरा न संभवति, स्वस्थशरीरेऽप्यनुभूयमानं कण्डूगुरुत्वादि पिच्छिलस्निग्धधर्मिणः विकृताच्छ्लेष्मण एव जायते, यथा हि शिरसि यूकालिक्षादयः कण्डूगुरुत्वाद्युत्पादयन्ति, कपि-कच्छ्वादीनाञ्च शरीरलग्नाः शूकविशेषाश्च कण्डूशोफादीनुत्पाद-

यन्ति, एवं व्रणिताः रुह्यमाणव्रणा अपि कण्डूयमाना दरीदृश्यन्ते, व्रणावास्तुषु च सुप्तत्वोपदेहत्वाल्पवेदनत्वादिकं स्तम्भशैत्यादिकञ्च सर्वेऽपि व्रणितैरनुभूयमानं यत् कर्म तत् श्लेष्मकृतमेवेति सिद्धमनुमितञ्च भवति ।

एवमायुर्वेदे सर्वेषामपि व्याधीनां द्वौ महाभेदौ उदाहृतौ, द्विविधास्तु व्याधयः—शस्त्रसाध्याः, स्नेहादिक्रियासाध्याश्च । तत्र शस्त्रसाध्येषु स्नेहादिक्रिया न प्रतिषिध्यते, स्नेहादिक्रियासाध्येषु (व्याधिषु) शस्त्रकर्म न क्रियते ॥ सु. सं. सू. अ. २४ ॥ इति, शस्त्रसाध्यव्याधिषु स्नेहादिक्रियाप्रतिषेधाभावः, शस्त्रसाध्येषु दोषावजयसौकर्यार्थमेव उत्सर्गप्रवृत्तये प्रतिपादितः, स्नेहादिक्रियासाध्येषु च व्याधिषु शस्त्रकर्माभावप्रतिपादनं तु युक्ततममेवेति, प्रत्यक्षमुपलभामहे, संचयप्रकोपजन्यानां वातपित्तश्लेष्मविकाराणां स्नेहनस्वेदनक्रियायुक्तैः वमनविरेचनादिपञ्चकर्मभिरेव साध्यत्वात् । न चाष्टविधशस्त्रकर्मसाध्येषु विद्रधिविसर्पादिषु वातपित्तश्लेष्मणां तादृशोऽन्वयो न दृश्यते येन शस्त्रकर्मसिद्धिरेव साधिता तादृशेषु व्याधिष्विति वाच्यम्, शस्त्रकर्मसाध्यानां हि व्याधीनां शाखामर्मसु दोषग्रथितत्वेन रूढत्वात् शस्त्रकर्मणो विना मर्मान्वयिनां च तेषां शस्त्रसाध्यानां व्याधीनामन्यथा पञ्चकर्मभिरपि साधयितुं दुःशक्यत्वात् । अत एव “ शस्त्रसाध्येषु व्याधिषु स्नेहादिक्रिया न प्रतिषिध्यते ” इति प्रतिपादितमाचार्यवर्यैः ॥

एवं स्थावरजङ्गमकृत्रिमविषसङ्क्रमोऽपि वातपित्तश्लेष्मगु-

णापेक्षः, दर्वीकरादिसर्पाणां विषसङ्क्रमव्याख्याने व्याख्यातः–स यथा “ तत्र, दर्वीकरविषेण त्वङ्नयनखदशनवदनमूत्रपुरीषदंशकृष्णत्वं रौक्ष्यं शिरोगौरवं सन्धिवेदना कटीपृष्ठग्रीवादौर्बल्यं जृम्भणं वेपथुः स्वरावसादो घुर्घुरको जडता शुष्कोद्गारः कासश्वासौ हिक्का वायो रूर्ध्वगमनं शूलोद्वेष्टनं तृष्णा लालास्रावः फेनागमनं स्रोतोऽवरोधस्तास्ताश्च वातवेदना भवन्ति, मण्डलिविषेण त्वगादीनां पीतत्वं शीताभिलाषः परिधूपनं दाहस्तृष्णा मदो मूर्च्छा ज्वरः शोणितागमनमूर्ध्वमधश्च मांसाना मवशातनं श्वयथु र्दंशकोथः पीतरूपदर्शनमाशुकोपस्तास्ताश्च पित्तवेदना भवन्ति, राजिमद्विषेण शुक्लत्वं त्वगादीनां, शीतज्वरो रोमहर्षः स्तब्धत्वं गात्राणां आदंशशोफः सान्द्रकफप्रसेकश्छर्दिरभीक्ष्णं मक्ष्णोः कण्डूः कण्ठे श्वयथुः घुर्घुरक उच्छ्वासनिरोध स्तमःप्रवेशस्तास्ताश्च कफवेदना भवन्ति ॥ सु. कल्प, स्था. ४ अ० ॥ ३७ ॥ एते च दर्वीकरमण्डलिराजिमदभिधेयाः सर्पविशेषाः क्रमेण वातप्रकोपकरविषाः, पित्तप्रकोपकरविषाः श्लेष्मप्रकोपकरविषाश्च, तैर्दष्टानां शरीरे प्रादुर्भूतेभ्य उपरिनिर्दिष्टलक्षणेभ्यः अनुमिता भवन्ति। सर्वविधसर्पविषसङ्क्रमस्य तथैव व्याख्यानात्–तथाहि—

“ तत्र सर्वेषां सर्पाणां सामान्यत एव दष्टलक्षणं वक्ष्यामः। किं कारणम्? विषं हि निशितनिस्त्रिंशाशनिहुतवहदेश्यम्, आशुकारि मुहूर्तमप्युपेक्षितमातुरमतिपातयति, न चावकाशोऽस्ति वाक्समूहमुपसर्तुं, प्रत्येकमपि दष्टलक्षणेऽभिहिते सर्वत्र त्रैविध्यं भवति, तस्मात् त्रैविध्यमेव वक्ष्यामः, एतद्धि आतुरहितम, असं-

मोहकरश्च, अपि चात्रैव सर्वसर्पव्यञ्जनावरोधः ॥ सु. क. स्था. अ० ४ ॥ ३६ ॥ तच्च त्रैविध्यं वातपित्तश्लेष्मलक्षणलक्षयविषविकारै रनुमितं भवतीति प्रतिपादितम् । सर्वविधानामपि सर्पविषाणां ये सप्त वेगा भवन्ति, तेऽपि वातपित्तश्लेष्मकृता एव अनुमातव्याः । विस्तरभियाऽत्र नोल्लिख्यन्ते । सर्वविधसर्पविषस्य सप्त एव वेगा भवन्ति, तांश्च वेगान् शरीरस्थविषदुष्टो वातसंज्ञकदोष एव करोतीति संक्षेपतः सुश्रुतोक्तवचनानि स्मार्यन्ते ।

धात्वन्तरेषु याः सप्त कलाः संपरिकीर्तिताः ।
तास्वेकैकामतिक्रम्य वेगं प्रकुरुते विषम् ॥ ४० ॥
येनान्तरेण तु कलां कालकल्पं भिनत्ति हि ।
समीरणेनोह्यमानं तत्तु वेगान्तरं स्मृतम् ॥ ४१ ॥

येन अन्तरेण कालेन कालतुल्यं विषं कलां धात्वाशयमध्यगां कलां भिनत्ति, तां कलामतिक्रम्य तद्विषं प्रवृत्तं भवति समीरणापरपर्यायेण वातसंज्ञकेन दोषेण उह्यमानं तन्नाम विषं वेगान्तरं अन्यस्मिन् धातौ विषवेग आरब्ध इति—स्मृतम कथितमित्यर्थः। भूतस्य भविष्यतश्च विषवेगस्य मध्यभूतः काल स्तावत्प्रमाण इति फलितम् ॥

तथा च त्रिदोषलक्षणकानां सर्पविषाणामपि चिकित्सितं तत्तद्दोषहरं विषशमनात्मकं च दोषप्रत्यनीकमेव " दुन्दुभिस्वनीये च सौश्रुते कल्पे " ऽगदकल्याणघृतादीनां प्रयोगविशेषाणां दोषहरविधानेनैव प्रतिपादितत्वात् ॥ इति.

एवं वमनविरेचनादीनि पञ्चकर्माण्यपि कायचिकित्सा-प्रधानाङ्गानि वातपित्तश्लेष्माख्यानां त्रयाणां दोषाणां तारतम्यं आशयदोषदुष्टिं च निर्णीयैव प्रयोक्तव्यानि—वमनं तु कफव्याप्ता-माशयस्यैव हृल्लासादिनिपीडितस्य विधेयतया प्रायः प्रतिपादितम्। विरेचनं तु दोषबलाबलं निरीक्ष्यैव प्रयोक्तव्यमिति प्रतिपादितं, विरेचनीयस्यतु खलु मलस्य पक्वाधानगुदसंश्रयत्वात्, विरेचनविधौ च विरेचनज्ञानार्थं कोष्ठभेदा अनुमातव्या एव, तान्यनुमानानि च दोषविकल्पैरेव भवन्ति—तदुक्तम्.

बहुपित्तो मृदुः कोष्ठो बहुश्लेष्मा च मध्यमः।
बहुवातः क्रूरकोष्ठो दुर्विरेच्यः स कथ्यते ॥

यस्य कोष्ठे पित्तं प्रधानतया वर्तते स मृदुकोष्ठ उच्यते स च द्राक्षाक्वाथादिना, उष्णेनपयसा, उष्णाम्बुना एरण्डतैलेन वा विरिच्यते तस्य मृदु कोष्ठत्वात् कफवातौ तादृशविष्टम्भकरौ न भवत इति तात्पर्यम्। यस्य च कोष्ठे श्लेष्मा अधिकः स्यात् स मध्यमकोष्ठ इति शब्देन कथ्यते। एतादृशकोष्ठो मृदुरपि क्रूरोऽपि च न गण्यते श्लेष्मणा अवरुद्धानां मलवाहिनीस्रोतसां वातावजयपुरःसरं श्लेष्मविलयनेनैव विरेच्यत्वात्। स च श्लेष्मविलयः त्रिवृता—तिक्ता (कटुकी) राजवृक्षसमै रूक्षगुणप्रधानैः मलद्रवतासंपादकै रेव द्रव्यै र्भवति। यस्य च कोष्ठे वातस्यैव प्राधान्यं तस्य पुरीषादयो मला विशेषेण पक्वाधानगुदयोः विष्टम्भिता भवन्ति, प्रबलतरेण वातेन आमपुरीषादीनाञ्च संचितत्वात् प्रबलो विष्टम्भो भवति,

स च विष्टम्भः मुहुर्मुहुः मलाशये शोषयत्येव मलादीन्, अतस्तेषां निर्हरणस्य कष्टसाध्यत्वात् एतादृशमलसंचयविष्टम्भवान् क्रूरकोष्ठ-शब्देन भण्यते स–चैव क्रूरकोष्ठः स्नुक्पयसा, हेमक्षीरीदन्तीफला-दिभिश्च स्नेहपानस्वेदनपूर्वकं विरेच्यः स्यात् । एवमास्थापननिरू-हकर्मणोरपि दोषभेदगणना आवश्यकी, अनुवासनञ्च "अनुवास्य-स्तु रूक्षः स्यात् तीक्ष्णाग्निः केवलानिली" इत्युक्तेः रूक्षतीक्ष्णाग्नि केवलानिलेभ्य एव साधिततैलादिभिरेवानुवासनं देयम् । वाग्भटे-ऽपि–'वातोल्वणेषु दोषेषु वाते वा बस्तिरिष्यते' इति प्रतिपादितं, चरकसंहितायामपि "पित्तं वा कफपित्तं वा पित्ताशयगतं हरेत् । स्रंसनं त्रीन्मलान् बस्तिः पक्वाशयगतं हरेत्" इति त्रिदोषमल हरत्वं बस्तीनामभिहितम् । तथा च–बस्तयो दोषहरा एव, ते च दोषा मिथ्याहारविहारैः प्रकुपिताः सन्तः, कोष्ठशाखामर्मादिषु, ऊर्ध्वाधस्तिर्यग्भेदेन सर्वाङ्गावयवानाश्रयन्ते, तत्र स्थानात् स्थानान्तर-दोषप्रापकस्य वायोरेव श्रेष्ठकर्मकरत्वं प्रतिपादितं प्रत्यक्षखण्डे । तच्चेह पुनः स्मृतिपथमानीयते—

शाखागताः कोष्ठगताश्च रोगाः,
मर्मोर्ध्वसर्वावयवाङ्गजाश्च ।

ये सन्ति तेषां न तु कश्चिदन्यो,
वायोः परं जन्मनि हेतुरस्ति ॥ ३७ ॥

तस्य च वायोः श्रेष्ठत्वे अन्यदपि कारणं वर्तते—तद्यथा,

विण्मूत्रपित्तादिमलाशयानां,
विक्षेपसंहारकरः स यस्मात् ।
तस्यातिवृद्धस्य शमाय नान्यद्,
बस्ते विना भेषजमस्ति किंचित् ॥ ३८ ॥

अतिवृद्धः शाखामर्मगत एष वायुः विण्मूत्रपित्तादिमलाशयानां विक्षेपसंहारादिकं कर्म करोति, अतस्तस्य शमनाय बस्ते विना अन्यत् किंचिद् भेषजं नास्तीति फलितम् । अतएव—

तस्माच्चिकित्सार्धमिति ब्रुवन्ति,
सर्वां चिकित्सामपि बस्तिमेके ।
नाभिप्रदेशं च कटिं च गत्वा,
कुक्षिं समालोड्य पुनश्च पार्श्वम् ॥ ३९ ॥

संस्नेह्य कायं शिथिलांश्च कृत्वा,
दोषान् पुरीषं ग्रथितं विमथ्य ।
संसक्तवेगः सपुरीषदोषः,
प्रत्यागतो बस्तिरिति प्रशस्तः ॥ ४० ॥
च. सं. सि. स्था. अ. १ ॥

सम्यग् योजितः बस्तिः, नाभिप्रदेशकटिभागौ, कायस्य दोषसंश्रयौ पूर्वापरौ भागौ गत्वा, पुनश्च कुक्षिपार्श्वे समालोड्य तत्स्थान् दोषान् मथित्वा, कायं—दोषनिभृतशरीरभागं च सम्यक् स्नेहयित्वा, दोषान्—वातपित्तश्लेष्माख्यान्—वृन्तात् फलानीव

शिथिलान् कृत्वा ग्रथितं पुरीषं विमथ्य निर्हरणासमर्थं द्रवीकृत्य संसक्तवेगः सपुरीषदोषः गुदमार्गप्रयोजितो बस्तिः प्रत्यायाति स नाम प्रशस्तत्वेनाभिधीयते ।

अत्र बस्तिविधानं वातप्रधानदोषाणां निर्हरणार्थं तद्विकाराणां च शीघ्रशमनार्थं चिकित्सार्धत्वेनाभिहितम् ॥ अतः बस्तिरपि य आंग्लभिषजैरप्यनुष्ठियते स त्रिदोषविकाहर इति सिद्ध मनुमितञ्च भवति । एवं स्नेहनशोधनभेदेन द्विविधमपि नस्यं त्रिदोषहर मुपशयकरं चानुभूयते भिषग्वरैरातुरैश्च । इत्थं कायचिकित्सायाः प्रधानाङ्गानि वमनविरेचनादीनि विकृतिमूल दोषाणां प्रकृतिस्थापनानि, प्रकृतिस्थापकैश्चैतैः पञ्चभिः कर्मभिः दोषा एव चिकित्सितव्या अनुमातव्याः अनुमिताश्च भवन्तीति सिद्धम् ॥

एवं सर्वेऽपि रोगा त्रिदोषजन्याः, तदुद्दिष्टचिकित्सितत्वात्, इत्यनुमानं सिद्धं सद्धेतुकञ्च भवतीति ॥ एवमस्मदीयानां शरीराणां पार्थिवत्वं, त्रिदोषारब्धत्वं, त्रिदोषकर्तृकधारणपोषणात्मकत्वञ्चानुमानैरेव सिद्ध्यति, वातपित्तश्लेष्माख्यानां च दोषाणां दोषत्वम रोगोत्पादकत्वं, स्वस्थशरीरेऽपि स्वास्थ्यानुमापकत्वं दोषाग्निधातुमल क्रियाणां साम्यताज्ञापकैर्लक्षणै रनुमितं भवति, वातपित्तश्लेष्मप्रकृतिकाश्च तैस्तै रुपशीयमानै र्भावैः विरुद्धगुणत्वाच्च भोजनादीना मुत्पद्यमानै स्तै स्तै र्व्याधिलक्षणैरनुमिता भवन्ति, त्रिषष्टिधा दोषविकृतयः चतुःषष्ठश्च स्वस्थोऽपि दोषतारतम्यभेदैः समतया

च अनुमिता भवन्ति, दोषविकाराणां प्रकृतिसमसमवेतत्वं विकृतिविषमसमवेतत्वं वा, प्राकृतदोषजन्यत्वेन, दोषसंसर्गसन्निपातजन्यत्वेन चानुमितं भवति। अष्टविधशस्त्रकर्मस्वपि दोषान्वयित्वं, व्रणविसर्पादिषु पीडापाकपूयोभावत्वासंपादक वातपित्तश्लेष्महेतुकं सिद्धानुमितं भवति। विविधसर्पविषेष्वपिवातपित्तश्लेष्म विकृतीनां दर्शनात् विषसङ्क्रमेऽपि ते वातपित्तश्लेष्माणोऽनुमिता भवन्ति, वमनविरेचनादिष्वपि पञ्चकर्मसु वातपित्तश्लेष्मणामेव विकृतसंबन्धः चिकित्सितत्वेन प्रतिपादितः सुतरां प्रसिद्धः दृश्यते। बस्तिसिद्धौ बस्तिप्रयोजनेष्वपि वातपित्तश्लेष्मणामेव हेतुता प्रतिपादिता। अतः "सर्वाण्यपि पार्थिवशरीराणि त्रिदोषारब्धानि, सर्वेऽपि रोगाः त्रिदोषविकृतिजन्याः, विविधाभिश्च चिकित्साभिः वातपित्तश्लेष्माण एव चिकित्सतव्यतया प्रतिपादिता इत्यनुमानैर्वातपित्तश्लेष्माणोऽनुमिताः सिद्धाश्च भवन्तीति सिद्धम्। हरिः ॐ॥

इतिश्री त्रिवाड्युपाह्व निर्भयरामात्मज भानुशङ्करशर्म्मणा संगृहीते त्रिदोषवादे-अनुमानखण्डः॥



॥ ॐ नमः श्रीधन्वन्तरयेऽन्तर्यामिणे ॥

त्रिदोषवादे

अथोपमान-प्रमाणविचारः ।

उपमा यस्य नास्त्येवो-पमेयः स कथं भवेत् ।
सादृश्येन कथं सिद्धिः, उपमाया ह्यगोचरः ॥ १ ॥
तत्प्रणीते च शास्त्रे वा उपमानं कथं भवेत् ।
आयुर्वेदप्रदानेन मनुजा निर्जराः कृताः ॥ २ ॥
तस्याकृतेर प्रत्यक्षात् अनुमानात्स कथंचन ।
आप्तवाक्योपदेशैश्च शब्दमूर्तिः प्रसीदतु ॥ ३ ॥

[भानुः]

' उपमानं प्रमाणान्तरं न वा, इति चिन्त्यते, बहुषु तन्त्रेषु उपमानप्रमाणस्य स्वीकारा दत्राप्यायुर्वेदे स्यान्नामोपमानं प्रमाणम्-तथाहि-" संज्ञासंज्ञिसंबन्धज्ञानम्-उपमितिः " संज्ञा नाम पदं संज्ञी नाम अर्थः तयोः संज्ञासंज्ञिनो र्यः संबन्धः शक्तिः, तस्य संज्ञासंज्ञिसंबन्धस्य यत् ज्ञानम् सा नाम उपमितिः । अनेन पदपदार्थसंबन्ध ज्ञानम् उपमितिः, तत्करणंच उपमानं नाम, अतिदेशवाक्यार्थज्ञानमितिफलितम । अथवा सादृश्यप्रमायाः उपमितिप्रमायाः यद्

असाधारणं कारणम्—तदुपमानम् । सादृश्यञ्च तद्भिन्नत्वे सति तद्गत भूयोधर्मवत्त्वम् ।

प्रकृते च "गोसदृशो गवयशब्दवाच्य" इति केनचिदाप्तपुरुषेणोच्चारिते सति, श्रुतगवयपदः कश्चन ग्रामीणोऽरण्यं गत्वा-गवयं च पश्यन् आप्तोच्चरितं वाक्यं स्मरति "गोसदृशो गवय पदवाच्य" इति तदनन्तरं गोः सादृश्यज्ञानेन गवयमुपमिनुते अनेन सदृशी मदीया गौरिति, तत्रान्वयव्यतिरेकाभ्यां गवयनिष्ठगो सादृश्यज्ञानं करणं, गोनिष्ठगवयसादृश्यज्ञानञ्च फलम्, अनेन प्रकारेण सादृश्यज्ञानरूपाया उपमितिप्रमाया अनुभूयमानत्वात् गोसदृशो गवयपदवाच्य इति उपमानं प्रमाणान्तरत्वेन स्वीकरणीयमेवेति प्राप्ते—उपमानं तावद् "यथा गौस्तथा गवय" इति वाक्यं तज्जनिता धीश्च आप्तजनोच्चरितत्वात् "शब्द प्रमाणमेव" सांख्यनयोक्तरीत्या चायुर्वेदे चित्तवृत्तेरेव प्रमात्वस्वीकारात् वाक्यजन्यं ज्ञानमेवागमप्रमाणं न तु वाक्यमात्र मितिसांख्य कौमुदीटीकायां श्रीमन्त उदासीनवर्याः । एवं योऽप्ययं गवयशब्दो गोसदृशस्य वाचक इति प्रत्ययः सोऽप्यनुमानमेव एतेन गवयशब्दो गोसदृशस्य वाचकः इति ह्याप्तवाक्यस्य शब्द प्रमाणान्तर्भावात् उपमानं न पृथक् प्रमाणमिति फलितम्, संज्ञासंज्ञिसंबन्धज्ञानरूपोपमानफलस्य च अनुमानेनैव निष्पन्नत्वात् न तदर्थं पृथगुपमानं प्रमाणान्तरत्वेनाभ्युपगन्तव्य मितिभावः । तथा च "यो हि शब्दो यत्र वृद्धैः प्रयुज्यते सोऽसति वृत्त्यन्तरे तस्य

वाचकः यथा गोशब्दो गोत्वस्य। प्रयुज्यते चैष गवयशब्दो गोसदृश इति तस्यैव वाचकः, इति तज्ज्ञानमनुमानमेव"। इति सांख्य-तत्त्व कौमुद्यां सर्वतन्त्रस्वतन्त्राः श्रीमन्तो वाचस्पतिमिश्राः–[भामती टीकाकाराः] ॥

यत्तु गवयस्य चक्षुःसंनिकृष्टस्य गोसादृश्यज्ञानं तत्प्रत्यक्षमेव, अतएव स्मर्यमाणायां गवि गवयसादृश्यज्ञानं प्रत्यक्षम्,

न हि अन्यद् गवि सादृश्यं अन्यच्च गवये, भूयोऽवयव, सामान्ययोगो हि जात्यन्तरवर्ती जात्यन्तरे सादृश्यमुच्यते, सामान्ययोगश्चैकः, स चेद् गवये प्रत्यक्षो गव्यपि तथा,

इति नोपमानस्य प्रमेयान्तरमस्ति यत्र प्रमाणान्तरमुपमानं भवेद्, इति न प्रमाणान्तरमुपमानम्। [सांख्यतत्त्वकौमुदी]

चरकसंहितायामपि–" इमानि तु खलु पदानि वादमार्गज्ञा-र्थमधिगम्यानि भवन्ति, तद्यथा वादो द्रव्यं गुणाः कर्म सामान्यं विशेषः समवायः प्रतिज्ञा स्थापना प्रतिष्ठापना हेतुरुपनयो निगमनमुत्तरं दृष्टान्तः सिद्धान्तः शब्दः प्रत्यक्षमनुमानमैतिह्य-मौपम्यं संशयः प्रयोजनं सव्यभिचारं जिज्ञासा व्यवसायः अर्थप्राप्तिः संभवः अनुयोज्यम् अननुयोज्यम्–अनुयोगः प्रत्यनुयोगः वाक्य-दोषः वाक्यप्रशंसाच्छलम्–अहेतुः अतीतकालम् उपालम्भः परिहारः प्रतिज्ञाहानि रभ्यनुज्ञा हेत्वन्तरमर्थान्तरं निग्रहस्थानमिति। च. सं. वि. स्था. अ. ८। ६। १६ ॥

वादमार्गज्ञानाय अधिगम्यत्वेन स्वीकृतानामेतेषां मध्ये "औपम्यम्" अपि स्वीकृतं तत्तु न आयुर्वेदोक्तप्रमेयसिद्ध्यर्थं प्रमाणत्वेन स्वीक्रियमाणप्रमाणरूपेण; किन्तु वादमार्गज्ञानायैव, तथाहि—"अथौपम्यम्—औपम्यं नाम यदन्येनान्यस्य सादृश्यमधिकृत्य प्रकाशनम्, यथा दण्डेन दण्डकस्य धनुषा धनुस्तम्भस्येष्वासिनाऽऽरोग्यदस्येति—च. वि. स्था. ८ अ. । ६ । ३४ ॥

अन्येन प्रसिद्धेन, अन्यस्य—अप्रसिद्धस्य सादृश्यं—प्रतिपादन योग्यं यत् संज्ञासंज्ञिसंबंधं प्रति कारणतया अधिकृत्य यदर्थप्रकाशनं-तदौपम्यम् । तेन च "सादृश्यप्रतिपत्तिः" उपमानम्, अथवा प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्" इति प्रसिद्धेन कुम्भकारदण्डदर्शनेन दण्डकाख्यस्य ज्वरस्य दण्डकसंज्ञकस्य वा वातव्याधि विशेषस्य साधर्म्यात् धनुषा च धनुस्तम्भस्य उपद्रवविशेषस्य च साधर्म्यात्, इष्वासिना यथा लक्ष्ये अनतिविप्रकृष्टे शरनिपतनरूपं लक्ष्यं सिद्ध्यति, तथैव आरोग्यदेन वैद्यगुणवता वैद्येन आतुरं साधयता वा आतुरस्वास्थ्यसिद्धिरूपं लक्ष्यं सिद्ध्यति" इति साधर्म्येणैव अर्थप्रकाशनात् तच्च आप्तवाक्यान्तर्गतत्वाद् उपमानं शब्दप्रमाणे, सादृश्यलिङ्गज्ञानेन च अनुमाने, उपमेयस्य च प्रत्यक्षदर्शनेन प्रत्यक्षे-एवान्तर्भवतीति नोपमानं प्रमाणान्तरमिति सिद्धम् । एवमर्शोऽतिसारग्रहण्यग्निमान्द्यादीनां व्याधिविशेषाणां अग्निमान्द्यसाधर्म्यात् चिकित्सा अपि प्रायः समानधर्मतयोपदिष्टा, लक्षणानि चैतेषां व्याधीनां दृष्ट्वा साधर्म्यभ्रमेणापि मुह्यन्ति चिकित्साविशेषे भिषजः,

तथापिनिदानोक्तलक्षणाना माप्तवचनोपदिष्टत्वात् तत्तद्व्याधीनाञ्च निदानलक्षणयो रेव विज्ञाने जायमाने उपमानप्रमाणस्याकिंचित्कर. त्वात् नोपमानं पृथक् प्रमाणम् । एवं वातपित्तश्लेष्माख्यानां शारीर दोषाणां सादृश्यमेव नास्ति येन वातादय उपमिताः स्युः, उपमान प्रमाणेन वा साधिता भवेयुः । नहि वातपित्तश्लेष्मसदृशाः भिन्नकार्यकर्तारः अन्ये केचन शारीरभावाः सन्ति । इत्थं उपमानं न प्रमाणान्तरमिति सिद्धं भवति ॥

इतिश्री त्रिवाडयुपाह्व निर्भयरामात्मज भानुशङ्कर-शर्म्मणा संगृहीते त्रिदोषवादे-उपमान-प्रमाण विचारः ॥



॥ ॐ नमः श्री धन्वन्तरयेऽन्तर्यामिणे ॥

त्रिदोषवादे

अथ शब्दखण्डः

आप्तानामपि वाक्यानां प्रामाण्यं स्याच्छ्रुतेरिव ।
आप्ता यथार्थवक्तारः लिप्साभ्रमविवर्जिताः ॥ १ ॥

तेषां ज्ञानं सदा शुद्धं निर्मलं प्रथितं भुवि ।
स्वयंप्रकाशयुक्तास्ते बोधयन्ति परं पदम् ॥ २ ॥

ब्रह्मा दक्षोऽश्विनौ शक्रः भरद्वाजाभिधो मुनिः ।
तेभ्यः क्रमेण प्राप्तोऽसौ आयुर्वेदः सुधामयः ॥ ३ ॥

यत्रायुषो हि विज्ञानं हिताहितसुखस्य वै ।
असुखस्यापि विज्ञानं कस्मान्नाद्रियते ह्यसौ ॥ ४ ॥

शल्यतन्त्रविधानोऽसौ अष्टाङ्गैश्च युतः सदा ।
श्री धन्वन्तरिप्रोक्तोऽयं तस्मादाद्रियतां बुधाः ॥ ५ ॥

साक्षाद्योऽवतीर्णो हि काशिराज इति स्वयम् ।
अमरान्निर्जरांश्चक्रे रुजामृत्युविवर्जितान् ॥ ६ ॥

आयुर्वेदोपदेशाय विश्वनाथपुरीं गतः ।
शल्यशालाक्यज्ञानेन सुश्रुतप्रमुखांस्तथा ॥ ७ ॥

प्रबोध्य विस्तृतं येन शास्त्रं पीयूषवाङ्मयम् ।
उद्धृताश्च जनाः सर्वे श्रीधन्वन्तरये नमः ॥ ८ ॥

(भानुः)

अथ शब्दखण्डो निरूप्यते ।

आप्तवाक्यं शब्दः । आप्तस्तु यथार्थवक्ता । वाक्यं पदसमूहः । " यथा गामानयेति " । शक्तं पदम् । अस्मात् पदादयमर्थो बोद्धव्य इतीश्वरसंकेतः शक्तिः ॥

तथा च चरकसंहितायां " रोगभिषग्जितीये विमाने " वाद मार्गज्ञानार्थं प्रतिज्ञातानां वादादारभ्य निग्रहस्थानपर्यन्तानां मध्ये वाद-मार्गप्रतिपत्तये शब्दोऽपि पठितः । तत्र शब्दस्येदं विवरणम्—

" अथ शब्दः । शब्दो नाम वर्णसमाम्नायः, स चतुर्विधः दृष्टार्थश्च अदृष्टार्थश्च सत्यश्चानृतश्चेति । तत्र दृष्टार्थः त्रिभि र्हेतुभिः दोषाः प्रकुप्यन्ति, षड्भि रुपक्रमैश्च प्रशाम्यन्ति, श्रोत्रादिसद्भावे शब्दादिग्रहणमिति । अदृष्टार्थश्च पुनः अस्ति प्रेत्यभावोऽस्ति मोक्ष इति । सत्यो नाम यथार्थभूतः, सन्त्यायुर्वेदोपदेशाः, सन्त्युपायाः साध्यानाम्, सन्त्यारम्भफलानीति । सत्यविपर्ययाच्च अनृतः ॥ ६ ॥ ३० ॥

शब्दग्रहणेन संकेतरूपः शब्दशक्तिग्रहो " अस्मात् पदात्

अयमर्थो बोद्धव्यः ” इतिज्ञेयः ।। आप्तोपदेशस्वरूपस्तु शब्दो द्विविधः । परमाप्तब्रह्मादिप्रणीतरूपो लौकिकाप्तप्रणीतरूपश्च ।। “ वर्णसमाम्नाय ” इत्यनेन वर्णमेलक इति ज्ञेयम् ।। “ दृष्टार्थ इत्यनेन प्रमाणान्तरेण अवगम्यार्थः इति ज्ञेयम् । एतेन “ त्रिभि र्हेतुभि र्दोषाः प्रकुप्यन्ती ”ति प्रत्यक्षदृष्टेनार्थेन सिद्ध्यति । ते च त्रयो हेतवः– “ असात्म्येन्द्रियार्थसंयोगः, प्रज्ञापराधः, परिणामश्चेति ” एतद्धेतुत्रयं दोषप्रकोपणे प्रत्यक्षदृष्टमेव, एतत् खलु “ त्रिभि र्हेतुभिः दोषाः प्रकुप्यन्तीति ” आर्षवचनं उक्तहेतुत्रयेणैव स्वतःप्रामाण्यमर्हति, प्रकुपितेषु दोषेषु हेतुत्रयस्यैव सिद्धान्तितत्वात् ।

अदृष्टार्थश्च पुनः शब्दः स्वतः प्रमाणम्, श्रुतय इव आर्षवचनोक्तत्वात् “ अहरहः सन्ध्यामुपासीत ” “ ब्राह्मणो ज्योतिष्टोमेन यजेत ”, “राजा राजसूयेन, वैश्यस्तोमेन” इत्यादिष्विव “ अस्य-स्थूलशरीरस्य त्यागानन्तरं प्रेत्यभावोऽस्ति–मरणाभिधानं प्राप्नोति; मोक्षोऽस्ति, इत्येवं अदृष्टार्थवाचकाः शब्दाः, प्रेत्यभावमोक्षयोरवश्यंभावित्वात् अदृष्टार्थवाचकत्वेन प्रमाणभूताः “ निरपेक्षो रवः श्रुतिः ” इतिवत् आर्षवचनानां श्रुतिमूलत्वात् ।।

सत्यः शब्दः–विपर्ययज्ञानरहितः यथार्थभूत इति सिद्धं भवति, तेन आयुर्वेदोपदेशानामस्तित्वं नाम नित्यसिद्धत्वं, साध्यानां च व्याधीनामुपायास्तित्वमिति आस्तिक्यबुद्धिः सिद्ध्यति, तेन च आस्तिक्यबुद्धिप्रभावेण आतुराणां स्वस्य च स्वास्थ्योपपादनरूपः पुरुषार्थचतुष्टयसिद्धिरूपश्च लाभः प्रतिफलति, एवमुपक्रमारम्भफलानां लाभे नित्यसिद्धे आयुर्वेदोपदेशानामपि नित्यसिद्धत्वं सिद्ध्यत्येव ।

" सत्यविपर्ययाच्चानृतः " आयुर्वेदोपशात् सत्यरूपात् यः विपर्ययः विपरीतज्ञानम्—तस्मात् शब्दस्य अनृतता सिद्ध्यति " यथा आयुर्वेदे " न वेगान् धारयेद्धीमान् " इत्यादि सत्यफलदस्यको निषेधः प्रतिपादितः, तस्माच्च विपरीतं वेगधारणारूपं कर्म केनापि साहसिकेनोपदिष्टम्, तच्चोपदेशरूपं वाक्यमनाप्तत्वात् सत्यविपर्ययाच्च-शब्दस्य अनृततां द्योतयति ॥ एवमायुर्वेदोक्तं शब्दस्वरूपं प्रतिपाद्य अध्येतृणां विशिष्टज्ञानप्रतिपादनाय नैयायिकी प्रक्रिया प्रतिपाद्यते। श्री विश्वनाथपञ्चाननप्रणीतमुक्तावल्यां ग्रन्थान्तरेषु च तावत्—

" पदसमूहो नाम वाक्यम् " इति प्रतिपादितम् " यस्य वाक्यस्य तात्पर्यविषयीभूतसंसर्गो मानान्तरेण न बाध्यते तद्वाक्यं प्रमाणं, वाक्यजन्यज्ञाने च आकाङ्क्षा योग्यताऽऽसत्त्य स्तात्पर्यज्ञानं चेति चत्वारि कारणानि। तत्र पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यत्वम् आकांक्षा। तात्पर्यविषयीभूत-संसर्गाबाधो नाम योग्यता—तेन अर्थाबाधो योग्यता इति फलितम्। अव्यवधानेन पदजन्यपदार्थोपस्थिति र्नाम आसत्तिः, पदजन्य पदार्थो द्विविधः शक्यो लक्ष्यश्चेति, तत्र शक्ति र्नाम पदानामर्थेषु मुख्या वृत्तिः, यथा घटपदस्य पृथुबुध्नोदराद्याकृतिविशिष्टे वस्तु-विशेषे वृत्तिः। सा च शक्तिः द्रव्यगतप्रभाव इव पदार्थान्तरं भवितुं नार्हति, प्रभावरूपायाः शक्तेः द्रव्यगतत्वात् द्रव्यं विना च तादृश्याः शक्ते रसंभवात् द्रव्येष्वेवान्तर्भावः। अत एव पदानां योऽर्थः शक्तः स्वीक्रियते स नाम षण्णां पदार्थानामर्थविशेषमिव

द्रव्यगता शक्तिः गुणविशेषमेव परिचाययति, अतः शक्ति र्न पदार्थान्तरम् ।। सा च पदजन्यपदार्थोपस्थितिः शाब्दबोधे हेतुः, तथैवान्वयव्यतिरेकदर्शनात् । अनेन पदानामविलम्बेन उच्चारणं आसत्तिरिति फलितम् ।। तात्पर्यं नाम तत्प्रतीतिजननयोग्यत्वम् । यथायुर्वेदस्य हितमितसुखायुषः प्रत्यायकेषूपदेशेषु हितमितसुखायुषः प्रतीतिजननयोगता वर्तते, इत्थञ्च आयुर्वेदवाक्येषु यथा आकाङ्क्षा योग्यतासत्तीनां प्रयोजनवत्त्वं तथा तात्पर्यस्यापीति तात्पर्यम् ।।

तदेवं वाक्यं द्विविधम् । वैदिकं लौकिकञ्च । वैदिकमीश्वरोक्तत्वात् सर्वमेव प्रमाणम् । लौकिकं त्वाप्तोक्तं प्रमाणम् । अन्यद् अप्रमाणम् ।। वाक्यार्थज्ञानं शाब्दज्ञानम्, तत्करणं शब्दः ।। शाब्दबोधप्रकारश्च अनेन क्रमेण सिद्ध्यति—

पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ।। ८१ ।।

सि. का. [मुक्तावली]

पदजन्यपदार्थोपस्थितावपि वृत्त्या पदजन्यत्वं बोध्यम् । वृत्ति र्नाम शक्तिलक्षणान्यतरसंबन्धः । शक्तिश्च पदेन सह पदार्थस्य संबन्धः, सा च अस्माच्छब्दात् अयमर्थो बोद्धव्य इतीश्वरेच्छारूपा । नव्यास्तु इच्छैव शक्तिः न तु केवलेश्वरेच्छा, तेन आधुनिकसंकेतितेऽपि शक्तिरस्त्येवेति फलितं भवति । लक्षणा च यत्र तात्पर्यानुपपत्तेः शक्यसंबन्धो गम्यः स्यात्, सा च लक्षणा जहत्स्वार्था

अजहत्स्वार्था इति भेदाभ्यां द्विविधा भवति, इत्यन्यत्र विस्तरः।
शक्तिग्रहस्तु व्याकरणादितो भवति, तथाहि—

" शक्तिग्रहं व्याकरणोपमान-
कोशाप्तवाक्याद् व्यवहारतश्च ।
वाक्यस्य शेषाद् विवृते र्वदन्ति
सान्निध्यतः सिद्धपदस्य वृद्धाः " ॥

धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद् भवति। उपमानात् शक्तिग्रहो यथा भवति तत्तु प्रतिपादितमुपमानप्रमाण-विचारे। कोशादपि शक्तिग्रहो भवति " गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति " इति अमरकोशोक्तेः शुक्लादिषु तद्वत्सु च शक्तिग्रहो भवति। आप्तवाक्यात्तु शक्तिग्रहो यथा भवति, तदेतत् अस्मिन् त्रिदोषवादे प्रतिपादनीयं। तद्यथा—

हेतुलिङ्गौषधज्ञानं स्वस्थातुरपरायणम् ।
त्रिसूत्रं शाश्वतं पुण्यं बुबुधे यं पितामहः ॥ २३ ॥

च. सू. अ० १ ॥

परमर्षेः भरद्वाजस्य विपुलां मतिं ज्ञात्वा भगवान् शतक्रतुः, तस्मै भरद्वाजमहर्षये " अल्पैः पदैः " आयुर्वेदं प्रोवाच। यमायुर्वेदं पितामहः—सर्वलोकपितामहः, ब्रह्मा यं त्रिसूत्रं, शाश्वतं—नित्य-स्वरूपम्—पुण्यं—पुरुषार्थचतुष्टयसिद्धिकरत्वेन पुण्यं पुण्यस्वरूपम् त्रिलोकपावनकरं हेतुलिङ्गौषधज्ञानं हेतवश्च लिङ्गानि च औषधानि

च, हेतुलिङ्गौषधानि, तेषां ज्ञानं विद्यते यस्मिन् तमेतं, पुनश्च स्वस्थाश्च आतुराश्च स्वस्थातुराः तेषां स्वस्थानां स्वास्थ्यरक्षणे आतुराणां च व्याधिमोक्षे परम्—उत्कृष्टम् अयनम् मार्गदर्शकम् श्रुतिवाक्यानीव स्वस्थातुराणामुद्धारकं, त्रिसूत्रं—त्रीणि हेतुलिङ्गौषधानि सूत्र्यन्ते यस्मिन् तेन वा, तं त्रिसूत्रं बुबुधे, तमेतं त्रिसूत्रात्मकं शाश्वतं पुण्यमायुर्वेदं शतक्रतुः भरद्वाजमहर्षये प्रोवाच, हेतुलिङ्गौषधज्ञानग्रहणेन यावच्चायुर्वेदवाच्यं तावत् हेतुलिङ्गौषधज्ञानान्तर्भूतमिति फलितं भवति,—तथाच—

हेतुग्रहणेन सन्निकृष्टविप्रकृष्टव्याधिहेतुग्रहणं भवति, सन्निकृष्टविप्रकृष्टव्याधीनां हेतवः शरीरे तारतम्येन वर्तमाना वातपित्तश्लेष्माण एव। लिङ्गग्रहणेन च व्याधेः आरोग्यस्य च सकलं लिङ्गमुच्यते, तेन व्याध्यारोग्ये अपि लिङ्गशब्दवाच्ये भवतः। औषधग्रहणेन च सर्वपथ्यावरोधः। वातपित्तश्लेष्मारब्धमिदं शरीरमपि हेतौ लिङ्गे च अन्तर्भवति। त्रिसूत्रमित्यनेन हेतुलिङ्गौषधज्ञानात्मकानि त्रीणि सूत्राणि अर्थसन्ततिरूपेण सूत्रितानि यस्मिन्, असौ त्रिसूत्रः, तमेतं त्रिसूत्रं आयुर्वेदं यथा ब्रह्मा बुबुधे, तथैव त्रिसूत्रात्मकं हेतुलिङ्गौषधज्ञानमायुर्वेदं इन्द्रः परमर्षये विपुलबुद्धये प्रोवाच, इति आयुर्वेदागमस्य अविप्लुततां दर्शयति, अतएवायमायुर्वेदः शाश्वतः—नित्य इति विशेषितम्। तच्च नित्यत्वं अपौरुषेयत्वञ्चाग्रे प्रतिपादयिष्यते। एवं आप्तवाक्याच्छाब्दबोधो भवतीति सिद्धं भवति।

व्यवहारतोऽपि शक्तिग्रहो भवति स यथा—प्रयोजकवृद्धेन

घटमानयेत्युक्तं, तच्छ्रुत्वा प्रयोज्यवृद्धेन घट आनीतस्तदवधार्य पार्श्वस्थो बालो घटानयनरूपं कार्यं घटमानयेति शब्दप्रयोज्य मित्यवधारयति । ततश्च घटं नय 'गामानयेत्यादि वाक्यादावापोद्वापाभ्यां घटादिपदानां कार्यान्वितघटादौ शक्तिं गृह्णाति " इति व्यवहारतः शब्दशक्तिग्रहः सिद्ध्यति ।

एवं वाक्यशेषादपि शक्तिग्रहो भवति । यथा " यवमयश्चरुर्भवति " इत्यत्र यवपदस्य दीर्घशूकविशेषे आर्याणां प्रयोगः, कङ्गौ तु म्लेच्छानाम् । तत्र हि " अथान्या ओषधयो म्लायन्ते, अथैते मोदमानास्तिष्ठन्ति । वसन्ते सर्वशस्यानां जायते पत्रशातनम् । मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः " इति वाक्यशेषाद् दीर्घशूके शक्ति निर्णीयते, कङ्गौ तु शक्तिभ्रमात् प्रयोगः ॥

एवं विवरणादपि शक्तिग्रहः । विवरणं तु तत्समानार्थकपदान्तरेण तदर्थकथनं । यथा वातेन कृतो विकारः इत्यस्य प्राणाद्यन्यतमवायुना कृतः, पित्तेन कृतम्—इत्यस्य पित्ताशयगतेन ऊष्मधर्मेण पित्ताख्येन दोषेण कृतम्, श्लेष्मणा कृतम् इत्यस्य पञ्चविधान्यतमकफेन कृतम्, इति समानार्थपदकपर्य्यायोच्चारणेन यः शक्तिग्रहो भवति स विवरणाज्जायते ।

एवं प्रसिद्धपदस्य सांनिध्यादपि शक्तिग्रहो भवति । यथा इह सहकारतरौ मधुरं पिको रौतीत्यत्र पिकशब्दस्य कोकिले शक्तिग्रह इति । पिको रौतीत्यत्र पिकजातावेवशक्तिग्रहः, न तु व्यक्तौ,

र्व्यभिचारात्-अगृहीतशक्तिकव्यक्तावपि शाब्दबोधोदयेन तत्र पिकादौ पिकमधुररवश्रवणेन अयं पिकशब्दः पिकश्चेत्थं शब्दं करोतीत्याकारकशक्तिज्ञानाभावाद् व्यभिचार एवेति भावः। एवं व्यक्तौ शक्तिग्रहस्वीकारे, प्रत्येकव्यक्तीनां शब्दान् प्रति शक्तिग्रहोबोधव्यः स्यादित्याकारकात् अनन्तशब्दशक्तिग्रहस्वीकारे च आनन्त्यात् सान्निध्याद् यः शक्तिग्रहो जायते स जातावेव बोद्धव्यः, व्यक्तिं विना जातिभानस्यासम्भवाद् व्यक्तेरपि भानमिति केषांचिन्मतम् तन्न, शक्तिं विना व्यक्तिभानानुपपत्तेः। इत्यन्यत्रविस्तरः॥

"शक्तं पदम्" इत्युक्तं शक्तिग्रहश्च पदजन्यपदार्थज्ञाने एव भवति, स च व्याकरणोपमानकोशाप्तवाक्यादिभि र्जायते इति प्रपञ्चितम्। तच्च शक्तं पदं चतुर्विधं भवति, क्वचिद्यौगिकं क्वचिद्रूढं क्वचिद्योगरूढं क्वचिद्यौगिकरूढम्। तथाहि-यत्रावयवार्थ एव बुध्यते तद्यौगिकम्। यथा पाचकादिपदम्, यथा-वा ज्वरातिसारौ, शरीरमनसी ज्वरयति संतापयति असौ ज्वरः इति ज्वरशब्दे अवयवार्थ एव बुध्यते, एवमतिशयेन सरति मलाद्द्रिद्रवधातुः यस्मिन् असौ अतिसारः अत्रापि अवयवार्थ एव बुध्यते, अवयवार्थबोधनाच्च, ज्वरातिसारौ यौगिकौ मन्तव्यौ। यत्रावयवशक्तिनिरपेक्षया समुदायशक्त्या अर्थो गृह्यते तद्रूढम्। यथा गोमण्डलादिपदम्-यथा वा वातपित्तश्लेष्मपदानि, तानि च शरीरारम्भकवायुकर्मकदेहधारणपोषणकर्तृत्वेन स्वविकृतिजन्यव्याध्युत्पादकत्वेन च रूढानि। यत्र तु

अवयवशक्तिविशेषे समुदायशक्तिरप्यस्ति, तद्योगरूढम् । यथा पङ्कजादिपदम्, तथाहि–पङ्कजपदमवयवशक्त्या पङ्कजनिकर्तृरूपमर्थं बोधयति समुदायशक्त्या च पद्मत्वेन रूपेण पद्मं बोधयति–यथा वा वातव्याधिशब्दः योगरूढः, स च वातव्याधिशब्दः वातव्याधौ केवलवातजन्यत्वात् वातजनिकर्तृरूपमर्थं बोधयति, समुदायशक्त्या च वातव्याधित्वेन रूपेण वातव्याधिं बोधयति । अत्र तु यौगिकार्थ-रूढ्यर्थयोः स्वातन्त्र्येण बोधस्तद् यौगिकरूढम् यथा उद्भिदादि-पदम्, अत्र हि उद्भेदनकर्ता तरुगुल्मादिः–'उद्भिद्' शब्देन बुध्यते पृथिवीं उद्भिद्य तरुगुल्मादीनां जन्यमानत्वात्, तथा च "उद्भिद्" शब्देन यागविशेषोऽपि बुध्यते, "उद्भिदा यजेत पशुकामः" इत्यादिश्रुतौ पशुकामैः 'उद्भिद्' नामकेन यागविशेषेण यष्टव्यम्–इति प्रतिफलति, तथा च उद्भिद्–शब्दस्य यौगिकत्वाद् रूढत्वाच्च तरुगुल्मादिषु तन्नामके यागे च शक्तिः, "उद्भिदस्तरुगुल्माद्याः" इत्यादौ, तरुगुल्माद्या उद्भेनकर्मकर्तारः इत्यर्थः–उद्भिद्शब्दस्य यौगिकार्थस्वीकारात् सिद्ध्यति, यागविशेषे च रूढ्यर्थेनैव सिद्ध्यति, अतः उद्भिद् शब्दो यौगिकरूढः इति सिद्धं भवति, एवमरिष्टशब्दो-ऽपि आयुर्वेदे यौगिकरूढ एव यथा "सोपद्रवारिष्टनिदानलिङ्गः" इत्यत्र–नियतमरणाख्यापकस्यलिङ्गस्यैव अरिष्टस्य प्रतिपादनीयत्वात्, तत्रारिष्टपदं यौगिकरूढम्, अरिष्टशब्देन च वृक्षविशेषफलानि, आसवविशेषश्च गृह्यते, एवं पदार्थानां चतुर्विधो शक्तिग्रहः संक्षेपतो व्याख्यातो भवति ।

एवं शब्दखण्डे प्रतिपाद्यत्रिदोषविषयकप्रकारानुक्त्वा आयुर्वेदशब्दनिरुक्तिस्तावद्वक्तव्या–को नाम आयुर्वेदः किं तस्य लक्षणं, किं नाम आयुः, अप्रवचनैश्च किं प्रतिपत्तव्यमिति विचार्यमाणे–आयुर्वेदस्तावत्—

हिताहितं सुखं दुःखमायुस्तस्य हिताहितम् ।
मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते ॥

च. सू. अ. १-४० ॥

हितमायुः, अहितमायुः, सुखमायुः, दुःखमायुः, तस्य आयुषः यत् हितम्–पथ्यम्–आयुषश्च यद् अहितम्–अपथ्यम्–तदेतत्–आयुषश्च मानं प्रमाणं यत्र वेदे उक्तम् स आयुर्वेद उच्यते महर्षिभिरितिशेषः, यद्वा आयुरस्मिन् विद्यते, अनेन वाऽऽयुर्विन्दतीत्यायुर्वेदः ॥ सु. सू. अ. १ ॥

तत्र आयु र्नाम—

शरीरेन्द्रियसत्वात्मसंयोगो धारि जीवितम् ।
नित्यगश्चानुबन्धश्च पर्यायैरायुरुच्यते ॥ ४१ ॥

च. सं. सू. अ. १ ॥

शरीरं नाम पञ्चमहाभूतविकारात्मकं गर्भशरीरादारभ्य वातपित्तश्लेष्मारब्धं तैश्च वर्धितपुष्टं जीवात्मनो भोगायतनं प्रत्यक्षगोचरमिदं स्थूलम्, इन्द्रियाणि च–तैजससहायवैकृतसात्त्विकाहङ्कारजन्यमानानि चक्षुरादीनि, सत्वं मनः, आत्मा ज्ञानप्रतिसन्धानकर्ता

एव, एतेषां सम्यग् अदृष्टनियन्त्रितो योगः संयोगः, स नाम शरीरेन्द्रियसत्वात्मसंयोगः आयुःपदेन उच्यते, धारि, जीवितम्, नित्यगः, अनुबन्धश्च एते सर्वे आयुःपदवाच्याः आयुःशब्दपर्यायाश्च एव । तथा चास्यायुर्वेदस्योभयलोकहितकरत्वं पुण्यतमत्वञ्च प्रतिपादितम्

तथाहि—

तस्यायुषः पुण्यतमो वेदो वेदविदां मतः ।
वक्ष्यते यन्मनुष्याणां लोकयोरुभयो र्हितः ॥ ४२ ॥

च. सू. अ. १.

आयुर्वेदलक्षणोऽयं वेदः पुण्यतमः अतिशयेन पुण्यस्वरूपः, ऋग्वेदादयो वेदाः परलोकहितसाधकत्वात् पुण्याः, तेभ्यश्चाय-मायुर्वेदः अधिकपुण्यकरः, यस्मादयमायुर्वेदः मनुष्याणामुभयो-र्लोकयो र्हितः हितकरः तस्मात् ऋग्वेदादिभ्यः पुण्यतमः, वेदविदाञ्च मतः पूजितः । चतुर्वर्गसाधनीभूतस्वस्थजीवितप्रदातृत्वादायु-र्वेदस्य सर्वोत्तमत्वं सिद्ध्यति तथा चोक्तम्—" न हि जीवितदानाद्धि दानमन्यद् विशिष्यते " इति

एवं ऋग्वेदादिवदस्यायुर्वेदस्य नित्यत्वमपि सिद्ध्यति तथाहि—

" सोऽयमायुर्वेदः शाश्वतो निर्दिश्यते; अनादित्वात्—स्वभाव-संसिद्धलक्षणत्वात्—भावस्वाभावनित्यत्वाच्च । न हि नाभूत् कदाचिदायुषः सन्तानो बुद्धिसन्तानो वा, शाश्वतश्चायुषो वेदिता

अनादि च, सुखदुःखं सद्रव्यहेतुलक्षणम्–अपरापरयोगात् । एष च अर्थसंग्रहो विभाव्यते आयुर्वेदलक्षणमिति । गुरुलघुशीतोष्णस्निग्धरूक्षादीनाञ्च द्वन्द्वानां सामान्यविशेषाभ्यां वृद्धिह्रासौ यथोक्तम् । गुरुभिरभ्यस्यमानै र्गुरूणामुपचयो भवति–अपचयो लघूनाम् । एवमेवेतरेषां इत्येष भावस्वभावो नित्यः, स्वलक्षणञ्च द्रव्याणां पृथिव्यादीनाम्, सन्ति तु सर्वदा गुणाश्च नित्यानित्याः । न हि आयुर्वेदस्य अभूत्वोत्पत्ति रुपलभ्यते–अन्यत्रावबोधोपदेशाभ्याम् । एतद्वै द्वयमधिकृत्य उत्पत्तिमुपदिशन्त्येके । स्वाभाविकञ्चास्य लक्षणमकृतकम्, यदुक्तमिह चाद्येऽध्याये, यथाग्ने रौष्ण्यं, अपां द्रवत्वम् । भावस्वभावनित्यत्वमपि चास्य यथोक्तं गुरुभिरभ्यस्यमानै र्गुरूणामुपचयो भवत्यपचयो लघूनामित्येवमादि ॥ २४ ॥
च–सं–सू–स्था–अ० ३० ॥

आयुर्वेदस्य नित्यता हेतुत्रयेण साधनीया भवति, तत्र आयुर्वेदः नित्यः, अनादित्वात्' इति महर्षिप्रोक्तेन अनादित्वरूपहेतुना व्यवहारनित्यस्यायुर्वेदस्य अनादित्वं सिद्ध्यति, तच्च व्यवहार नित्यत्वं मानवसृष्टिकाले अदृष्टयोगेनोत्पद्यमानानां मनुष्यादीनां शरीराणां वातपित्तश्लेष्मारब्धत्वेन ऋतुविपर्ययापेक्षया च वातपित्तश्लेष्मवैषम्यसंभवस्तु नित्य एव, वातपित्तश्लेष्मविकाराणाञ्च उपशमः पुरुषार्थचतुष्टयसाधनार्हस्थूलशरीरस्वास्थ्यरक्षणाय आवश्यक एव " यत्र यत्र मानवशरीराणि तत्र तत्र वातपित्तश्लेष्मणां विकारास्तु नियता एव " तेषां विकारैश्च मनुष्यशरीराणां ग्रस्तत्वमु

आयुर्वेदोपदिष्टा आप्तोपदेशा दोषविकृतीनामुपशमाय आयुर्वेदस्य व्यवहारनित्यत्वं साधयन्ति, तच्च आयुर्वेदव्यवहारनित्यत्वमर्थरूपस्यायुर्वेदस्य स्यात्, माभूत् इदानींतनेषु ऋषिप्रणीतेषु तन्त्रेषु किन्तु यथा नष्टश्रुतिमूलानां स्मृतीनामिव आयुर्वेदोपदेशभूतार्थवाद्मूलाना मिदानींतनानामपि तन्त्राणां अर्थरूपेण तथैव नित्यत्वं प्रामाण्यञ्च सिद्धयति, अथवा व्यवहारनित्यायुर्वेदार्थाभिधायकस्य आयुर्वेदस्य पारंपर्ययोगात् नित्यत्वं साध्यते, तथाहि—यो हि वेदो महर्षिणा याज्ञवल्क्येनाधीतः स एव वेदोऽस्माभिरप्यधीयते, एवं हेतुलिङ्गौषधज्ञानरूपो हि य आयुर्वेदो परमेष्ठिना ब्रह्मणा दक्षप्रजापतये अध्यापितः तस्माच्चाश्विनौ प्राप्तवन्तौ ताभ्यामिन्द्रस्तस्मान्महर्षि भरद्वाजः, स एवायुर्वेदो हेतुलिङ्गौषधज्ञानार्थरूपोऽस्माभिरपि भिषक्संज्ञां लभमानै रद्याधीयते, इति प्रत्यभिज्ञा तु वेदपारंपर्यवत् आयुर्वेदस्यापि सिद्धा भवति। आयुश्च अपरापरसन्तानन्यायेन सर्वदैव विद्यते, तस्य चायुषः वेदः ज्ञानमपि नित्यमेव भवितुमर्हति, अन्यथा परिमितायुषां स्वास्थ्यरक्षणज्ञानाभावेन प्रकृतिबलाद् दोषविकृतीनाञ्च नियततया अकाले एव उच्छेदः संभाव्येत। शाश्वतश्चायुषो वेदिता" इत्यनेन च आयुर्वेदवेदितु नित्यत्वे नित्योपयुक्ततया आयुर्वेदस्य नित्यत्वं सिद्धयति, एवं सुखदुःखयोरप्यनादित्वं जीवात्मनस्तु नियतमेव, सुखायुषः प्रतिपालने—दुःखायुषश्च प्रतीकारे जले प्रवहतः पुरुषस्यालम्बनानीव सुखपालनदुःखप्रतीकारोपायास्तु नियता एव स्युः, यदि नाम नैव स्यात् प्रत्यभिज्ञा जीवात्मनः सुखप्राप्तिरक्षणयोस्तर्हि माभूदायुर्वेदस्य नित्यत्वं, किन्तु

सूक्ष्मजीवाणोरपि स्वशरीररक्षार्थे क्रियमाणः प्रयत्नः सर्वेषामप्यस्मदीयानां दृष्टिगोचरः सार्वजनीनश्च, तस्मादस्माकमपि लब्धजीवात्मसंज्ञकानां अनादिजीवात्मना सहैव आयुःपरिपालनार्थं बोधः स्वाभाविकी च अनादि शक्तिः सिद्ध्यति। तथैव आयुर्वेदज्ञानस्याप्यनादित्वात् आयुर्वेदो नित्य इति सिद्धं भवति। तत्रायुर्वेदज्ञानं मानुषीशेमुषीकल्पितमल्पमेव स्यात्, सर्वज्ञकल्पानां च महर्षीणां तद्ज्ञानं त्वनादिसिद्धम् " अतएव–महर्षिप्रोक्तायुर्वेदज्ञानस्यानादिसिद्धत्वादेव "शाश्वत आयुर्वेद " इति सिद्ध्यति। महर्षीणां सर्वदैव तज्ज्ञानमित्यत्र प्रमाणं तु–

"युक्तस्यं सर्वदा भानं चिन्तासहकृतोऽपरः" ॥ इति न्यायादिति भावः–युक्तयुञ्जानभेदेन योगिनो हि द्विविधाः–तेषां युक्तानां ज्ञानस्य त्रिकालाबाधितत्वात् सर्वदैव भानं घटते इति न्याय्यमेव, अपरेषां युञ्जानानां तु भरद्वाजमहर्षिसदृशानां इन्द्रोपगमनचिन्तासहकृतमेव आयुर्वेदतन्त्रवैशारद्यमित्यन्यत्र विस्तरः। प्रकृते च आयुर्वेदपरंपराया अनादित्वात् आयुर्वेदो नित्य इति सिद्धं भवति ॥ अनेन वेद्यवेदनवेदितॄणा मनादित्वात् ' आयुर्वेदो नित्य ' इति प्रथमो हेतु र्व्याख्यातो भवति ॥

" आयुर्वेदो नित्यः " स्वभावसंसिद्धलक्षणत्वात्–इति द्वितीयो हेतुः सांप्रतं विचार्यते, आयुर्वेदे तावत् स्वभावसंसिद्धलक्षणानि द्रव्याणि प्रतिपादितानि,–तथा च गुरुभिरभ्यस्यमानैः गुरूणामुपचयो भवति–अपचयो लघूनाम्। गुरवस्तु माषात्मगुप्ताशूकरमांस-

दयः, तेऽभ्यस्यमाना मांसास्थीनि गुरूण्येवोपचिन्वन्ति, न तथा तदपेक्षितलघूनि रसरक्तादीनि, एवं लघवस्तु अवादिगुणभूयिष्ठाः मुद्गगोदुग्धादयः रसरक्तादीनि मांसास्थ्याद्यपेक्षया लघून्येवोप चिन्वन्ति, न तथा मांसास्थ्यादीनि, एवं स्वभावसंसिद्धलक्षणानां खलु द्रव्याणामेव हिताहितसुखदुःखप्रकाशके आयुर्वेदे व्याख्यानं वरीवर्ति, अतः स्वभावसंसिद्धलक्षणमायुर्वेदे प्रतिफलितम् । आयुर्वेदस्य-एतादृशस्वभावसंसिद्धलक्षणत्वात् नित्यता सिद्ध्यति । अथवा आयुरादयो भावाः, वातपित्तश्लेष्मविकृतिजन्यव्याधयः, तत्कृतबाल्यवृद्धिवार्धक्यनिधनादयो भावाश्च ये गर्भपिण्डादारभ्य स्वभावसंसिद्धास्तेषां लक्षणानि विद्यन्ते यस्मिन् असौ स्वभावसंसिद्धलक्षणः [आयुर्वेदः] तस्य भावः स्वभावसंसिद्धलक्षणत्वं तस्मात् स्वभावसंसिद्धलक्षणत्वाद्-आयुर्वेदो नित्य इति सिद्धं भवति, " स जातो बाल उच्यते " इति वाक्यात् बाल्यत्वादारभ्य द्वादशविकारपर्यन्तस्य आयुषः सन्तानपरंपरामा नित्य प्रतीतत्वाद् आयुर्वेदो नित्यः सिद्ध्यति ॥ इति संक्षेपतो द्वितीयो हेतु र्व्याख्यातः ॥

अथेदानीं " भावस्वभावनित्यत्वाच्च " इति आयुर्वेदस्य नित्यत्वे तृतीयो हेतु र्व्याक्रियते, भावाः खलु ये पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनोरूपाणि द्रव्याणि, गुरुलघुशीतोष्णस्निग्ध रूक्षादयो गुणाः, उत्क्षेपणादीनि कर्माणि, एकत्वबुद्धिप्रतिपादकरूपं सामान्यम्, व्यावृत्तबुद्धिकरो विशेषः, गुणगुणिनो र्द्रव्यगुणयो र्यो

नित्यसंबन्धरूपः समवायः, तेषां षण्णामपि भावानां स्वभावनित्यता शिल्पिसहस्रैरपि नोल्लङ्घनीया । एवमग्नेरौष्ण्यम्—अपां द्रवत्वं, पृथिव्या गुरुत्वखरत्वादीनि, वायोश्चलत्वम् आकाशस्य लघुत्वावकाशदातृत्वे, कालस्य सर्वाभिधेयानां जनकत्वम्, दिशां सर्वत्र व्यापकत्वम् आत्मनः स्वप्रकाशकत्वम्—मनसश्च संकल्पविकल्पात्मकत्वम्—इत्येवमादयो ये द्रव्यधर्माः, गुणादीनाञ्च द्रव्याश्रितत्वम्—इतिस्वरूपा ये च भावाः, तेषां स्वभावो नित्य एव, स च नित्यत्वेन प्रतिपादित आयुर्वेदे, तथा च भावस्वभावो नित्यो यस्मिन् स भावस्वभावनित्यः, तस्य भावः भावस्वभावनित्यत्वं तस्माद् भावस्वभावनित्यत्वाच्च "आयुर्वेदो नित्य" इति सिद्ध्यति ।

अथवा भावानां पाञ्चभौतिकानां द्रव्याणां य उपवर्णितः तत्तद्गुणप्रधानः स्वभावः, स च स्वभावः कदाचन न विपर्येति, एतादृशभावस्वभावेन यो दक्षप्रजापत्यादीनपि आयुर्वेदाचार्यान् प्रकाशयते तस्माच्च नित्यः भावस्वभावनित्यः तस्य भावः तस्मात्—"भावस्वभावनित्यत्वाद्" आयुर्वेदस्य नित्यत्वं सिद्ध्यति ।

अथवा भावो नाम सत्तया सर्वदा प्रतीयमानत्वं, स एव स्वभावः—अर्थात् शरीरान्वयिनां त्रयाणां दोषाणां विकृतिभ्य ऋतुविपर्ययेण वा जायमानाः दोषसंचयप्रकोपादयः तेषां निर्हरणरूपः प्रतिकूलवेदनीयप्रतीकारात्मकः यः प्राणिनां स्वभावः स च व्यवस्थितरूपेण भ्रमलिप्साप्रमादरहितै रार्षवचनै निरूपित आयुर्वेद-

तन्त्रेषु वर्तते एव, तेन भावस्वभावेन नित्यः भावस्वभावनित्यः तस्य भावः, भावस्वभावनित्यत्वं ह्यायुर्वेदे वर्तते एव, तस्माद् भावस्वभावनित्यत्वाच्च आयुर्वेदो नित्य इति सिद्धं भवति ॥ एवमायुर्वेदस्य यत्र तत्रोत्पत्तिश्रवणात् "यो य उत्पत्तिमान् स स नित्यत्वाभाववान् इति न्यायेन उत्पत्तिमत आयुर्वेदस्य पुनरपि "अनित्यत्वं" संभाव्यते, तच्च न संभवति "न हि आयुर्वेदस्य अभूत्वा उत्पत्तिरुपलभ्यते अन्यत्रावबोधोपदेशाभ्याम्" आयुर्वेदस्य ज्ञानात्मके अवबोधे शिष्येभ्यश्चाचार्यैः क्रियमाणे उपदेशे च आयुर्वेदोत्पत्तिरधिगम्यतेऽस्माभिः । सा चोत्पत्तिरवबोधोपदेशात्मिकैव, अवबोधात्मिकोत्पत्ति र्ब्रह्मणः स्मरणात्मिका वेदस्मरणमिव भवति । उपदेशात्मिका च पुनः ब्रह्मकृतेन्द्रोपदेशात् श्रूयते । यदि नाम प्रत्यक्षैवोत्पत्तिः स्वीक्रियते किमात्मिका वा स्यात्, कारणाद्विना कार्यानुपपत्तेः, इति सिद्धान्तितत्वात् । न हि अभावात् कस्यचन वस्तुन उत्पत्तिः सिद्ध्यति, भावरूपश्च यो भावः तस्य प्रलयकाले कारणालीनत्वात् सर्गाद्यकाले च पुनस्तेषामेव शब्दार्थानामाविर्भावः, सत्कार्यवादे तु सतः सञ्जायते इति वृद्धानामागमः, यो हि व्यक्ततरत्वेन भावस्याविर्भावः स च प्रलयकाले भावात्मके वस्तुन्येव तिरोहितो भवति, यथा च प्राणिनामदृष्टानि जीवात्मभिः सह कार्यब्रह्मणि लीयन्ते, सर्गाद्यकाले च पुनराविर्भवन्ति । यदि नाम अदृष्टानि न स्युः कथं तेषां जीवात्मभिराविर्भूयमानैः सहोदयः संभाव्येत, अदृष्टाधीना जीवात्मानस्तु प्रतीयन्ते एव । एवं विविधविकृतिपरिहारज्ञानं तु अदृष्टमुपभुञ्जानानां प्राणिनां कृते तु अवश्यमेवाविर्भावमर्हति, अतः नित्यज्ञानरूपस्य

विविधविकृतिपरिहाराज्ञानात्मकस्य, प्रलयकाले कार्यब्रह्मणि लीनस्य आयुर्वेदस्य या अवबोधात्मिका उत्पत्तिरुपलभ्यते, सा तु नित्यस्वरूपायुर्वेदाविर्भावात्मिकैवेति सिद्धं भवति । एवमिन्द्रादिभ्य आयुर्वेदोपदेशात् न तस्य नित्यत्वं व्याहन्यते, "यो वेदो देवदत्तेनाधीतः स एव वेदोऽद्य मयाधीयते" इति गुरुपरंपराश्रवणात् आयुर्वेदस्य उपदेशकृतमपि अनित्यत्वं व्याहतं भवति । तथा च "स्वाभाविकं चास्य लक्षणम् अकृतकत्वम्" इति "आयुर्वेदो नित्यः अकृतकत्वात्" यद्धि कृतकं कृतिनिष्पन्नं भवति तद्धि अनित्यं भवति, आयुर्वेदस्य व्यवहारनित्यसिद्धत्वात् अनादिसिद्धत्वं स्वाभाविकत्वं च सिद्धयति न कृतकत्वम् "जलाग्निवायूनां च स्वाभाविकता दर्शिता, यथा अग्नेरौष्ण्यं, जले शैत्यं, वायोश्चाञ्चल्यं न व्यभिचरतीति, तथैव आयुर्वेदोऽपि हितमितसुखायुषः प्रतिपादकत्वं न व्यभिचरति, इत्थं आयुर्वेदस्य "हिताहितं सुखं दुःखमायुस्तस्यहिताहितम् । मानं च तच्च यत्रोक्तं आयुर्वेदः स उच्यते ॥ इति नित्यव्यवहारतया हितमितसुखायुषः प्रतिपादकता आयुर्वेदस्य नातिवर्तते, इत्थं तादृशायुःप्रतिपादकतारूपस्वभावस्य सिद्धत्वात्, आयुर्वेदे स्वभावसंसिद्धानि लक्षणान्येव प्रतिपादितानि "तादृशस्वभावसंसिद्धिलक्षणत्वा"च्चायुर्वेदो नित्य इति सिद्धं भवति ॥ एवं गुरुलघुद्रव्याभ्यासकृतः सामान्यविशेषकृतवृद्धिह्रासकारकोऽपि भावस्वभावो अकृतक एव । इत्थं भावनित्यताप्रतिपादनरूपात् भावस्वभावनित्यरूपाद् हेतोः आयुर्वेदो नित्य एवेति सिद्धं भवति, इत्यलं पल्लवितेन ॥

इत्थं हेतुत्रयेण वेदानामिवायुर्वेदस्य नित्यत्वं प्रतिपाद्य वातपित्तश्लेष्मणां शारीरदोषाणां गर्भशरीरारम्भकत्वं, व्याधीनां जनकत्वं, द्वादशभावानां च प्रतिपादकत्वं पुनरस्मिन् शब्दखण्डे आर्षवचनैः प्रतिपादनीयं स्यात् ।

वातपित्तश्लेष्मणां गर्भशरीरारम्भकत्वं तु प्रत्यक्षखण्डे बहुविधं प्रायः प्रपञ्चितम्, यै रार्षवचनैस्तेषां शरीरारम्भकत्वं प्रतिपादितं, तान्येवार्षवचांसि आप्तवाक्यत्वात् शब्दखण्डेऽप्यस्मिन् प्रमाणत्वेन ग्राह्याणि । तानि यथा—परस्परोपकारात्, परस्परानुग्रहात्, परस्परानुप्रवेशाच्च, यथा गर्भशरीरारम्भकाणि भूतानि सिद्धानि, तथैव आहारपरिणामकरत्वेन वायुः, ऊष्मा, क्लेदश्च साधिताः " सौम्यशुक्रस्य—आग्नेयस्य चार्तवस्य, अपत्यपथे मिश्रीकरणं, प्रविभागकरत्वञ्च, मिश्रीभूतयोः शुक्रार्तवयोः रागपक्त्यादिसाधकत्वं, मिश्रीभूतयोश्च तयोः क्लेदनीकरणमङ्कुरीकरणञ्च वातपित्तश्लेष्मणां परस्परानुग्रहादेव सिद्धम् ॥

व्याधयस्तु वातपित्तश्लेष्मविकृतिजन्या एव, तदेतद्—आर्षवचनैः प्रतिपादयामः । तथाच चरकसंहितायाम्—

चत्वारो रोगा भवन्ति, आगन्तुवातपित्तश्लेष्मनिमित्ताः, तेषां चतुर्णामपि रोगत्वमेकविधं भवति रुक्सामान्यात्, द्विविधा पुनः प्रकृति रेषाम्—आगन्तुनिजविभागात्, द्विविधं चैषामधिष्ठानं मनःशरीरविशेषात् ॥ सू—अ. २० ॥ ३ ॥

चतुर्णामपि व्याधीनां रुक्सामान्यात् रोगत्वजातिबोधकं

तु रोगत्वमेकविधमेव । एषां चतुर्विधानां रोगाणां द्विविधा प्रकृतिर्नाम द्विविधः स्वभावः, आगन्तूनां निजानाञ्च स्वभावः तस्मात्, आगन्तवो व्याधयः बाह्यै र्हेतुभि, र्भवन्ति, ते च सप्तविधव्याधिवर्णने प्रत्यक्षखण्डेऽस्माभिः सुश्रुतोक्तरीत्या "संघातबलप्रवृत्ता य आगन्तवो दुर्बलस्य बलवद्विग्रहात्, तेऽपि द्विविधाः शस्त्रकृताः व्यालकृताश्च" इति–आधिभौतिकव्याधिवर्णने व्याख्याताः, ते तु पुनरिह आगन्तुप्रकरणेन स्मार्यन्ते ॥ निजाश्च ये वातपित्तश्लेष्माख्यानां खलु दोषाणां विकृतिजन्यबलेन भवन्ति, तेऽपि दोषबलप्रवृत्तत्वेन व्याख्याताः । अधिष्ठानं तु सर्वेषामपि व्याधीनां मनः शरीरे प्रसिद्धे एव ॥ ते तु व्याधयः—

विकाराः पुनरपरिसंख्येयाः, प्रकृत्यधिष्ठानलिङ्गायतनविकल्पविशेषात् तेषामपरिसंख्येयत्वात् ॥ सू. अ. २० ॥ ४ ॥

सर्वेषामपि व्याधीनां स्थूलभेदा श्चत्वार एव, किन्तु स्थानदोषदूष्यसंसृष्टानां खलु वातपित्तश्लेष्मणां अनुमानखण्डे व्याख्यात त्रिषष्टिदोषभेदप्रकारैः असंख्येयाः पुन र्विकारा भवन्ति, तत्रेमे दोषभेदबोधका विशेषेण विकृतीनामसंख्येयतां परिचाययन्ति–प्रकृत्यधिष्ठानेत्यादि–प्रकृतिर्नाम प्रत्यासन्नं कारणं वातादि, अधिष्ठानं नाम दूष्यं सप्तधात्वाशयादिकं, लिङ्गानि–वातपित्तश्लेष्मतारतम्यजन्यलक्षणानि, आयतनानि दुष्टाहाराचाररूपा बाह्यहेतवः, तेषां प्रकृत्यधिष्ठानलिङ्गायतनानां, यो विकल्पविशेषः तस्मात् तेषां वातपित्तश्लेष्मविकाराणां अपरिसंख्येयत्वं सिद्ध्यति ॥

आगन्तुवातपित्तश्लेष्मनिमित्तेषु प्रधानतया चतुर्विधव्याधिषु वातपित्तश्लेष्मणां वैषम्यं तु नियतमेव, आगन्तुषु व्याधिषु निजेषु च व्याधिषु इयान् भेदः प्रतिपादितः—

आगन्तु हि व्यथापूर्वं समुत्पन्नो जघन्यं वातपित्तश्लेष्मणां वैषम्यमापादयति, निजे तु वातपित्तश्लेष्माणः पूर्वं वैषम्यमापद्यन्ते, जघन्यां व्यथामभिनिर्वर्तयन्ति ॥ च. सू. अ. २० ॥

तथा च दोषाणां स्थानविभागोपदेशेन चिकित्सासौकर्यार्थं च वातपित्तश्लेष्मविकृतीनां दोषाणां स्थानविभाग आर्षवचनैरेवादरणीयः स्यात्—

तेषां त्रयाणामपि दोषाणां शरीरे स्थानविभाग उपदेक्ष्यते, यथा—बस्तिः, पुरीषाधानं—कटिः सक्थिनी पादावस्थीनि च वातस्थानानि, अत्रापि पक्वाशयो विशेषेण वातस्थानम् । स्वेदो रसो लसीका रुधिरमामाशयश्च पित्तस्थानानि, अत्राप्यामाशयो विशेषेण पित्तस्थानम् । उरः शिरोग्रीवा पर्वाण्यामाशयो मेदश्च श्लेष्मणः स्थानानि, अत्राप्युरो विशेषेण श्लेष्मस्थानम् ॥ च. सू. २० अ० ॥

ये तु निजा नाम वातपित्तश्लेषमणां विकारा स्तेषां चिकित्साविशेषविशिष्टस्थानानि उपरिनिर्दिष्टसूत्रोक्तानि बोद्धव्यानि, तत्र लसीका नाम भुक्ताहारगतजलीयतत्त्वस्य श्लेष्मसहकृतपित्तेन आरभ्यमाणः मांसवसाकलान्तर्गतः पिच्छिलो भागः । पित्तस्थाने आमाशयशब्दस्य आमाशयाधोभागरूपोऽर्थो विज्ञेयः, श्लेष्मस्थाने च आमाशयशब्दस्य आहारपरिणामाय आरभ्यमाणः घनद्रव-

रूपः, पिच्छिलाकारकः परिणम्यमानाहाररसस्य आश्रयभूत इति ज्ञेयम् ॥ त एते वातपित्तश्लेष्माणः—

सर्वशरीरचरास्तु वातपित्तश्लेष्माणो हि सर्वस्मिन् शरीरे कुपिताऽकुपिताः शुभाशुभानि कुर्वन्ति—प्रकृतिभूताः शुभानि उपचयबलवर्णप्रसादादीनि, अशुभानि पुनर्विकृतिमापन्नानि विकारसंज्ञकानि ॥ १० ॥

तत्र विकाराः सामान्यजा नानात्मजाश्च, तत्र सामान्यजाः पूर्वमष्टोदरीये व्याख्याताः । नानात्मजांस्त्विहाध्यायेऽनुव्याख्यास्यामः, तद्यथा—अशीतिर्वातविकाराः, चत्वारिंशत् पित्तविकाराः, विंशतिः श्लेष्मविकाराः ॥ ११ ॥

एवं शरीरारम्भकत्वं, व्याध्यारम्भकत्वं च वातपित्तश्लेष्मणामेव आर्षवचनैः आप्तप्रमाणत्वात् सिद्धं भवति, बाल्यादारभ्य निधनपर्यन्ता द्वादशभावास्तु वातपित्तश्लेष्मकृता इति प्रत्यक्षखण्डे एव प्रतिपादितम् ॥ अत्र पुनः वातपित्तश्लेष्मणां निकृष्टलक्षणानि—तद्विकृतिजन्याश्च विकारास्तज्जन्या एवेति शब्दप्रमाणैः प्रतिपादयामहे—रूपरहितस्पर्शवतोऽपि वायोस्तावत् परिचायकानीमानि लक्षणानि " अशीतिर्वातविकाराः " इति पृथक् पृथक् नामभिः सामान्यतया प्रतिपाद्य पुनः—

सर्वेष्वपि खल्वेतेषु वातविकारेषूक्तेषु—अन्येषु चानुक्तेषु वायोरिदमात्मरूपमपरिणामिकर्मणश्च स्वलक्षणम्, यदुपलभ्य तदवयवं वा विमुक्तसन्देहा वातविकारमेवाध्यवसन्ति कुशलाः । तद्यथा

रौच्यं लाघवं वैशद्यं शैत्यं गतिरमूर्तत्वं चेति वायोरात्मरूपाणि भवन्ति, एवंविधत्वाच्च कर्मणः स्वालक्षण्यमिदमस्य भवति ॥ च. सू. अ. २० ॥

वायोः शरीरस्थवातसंज्ञकदोषस्य इदम्—निर्दिश्यमानं अपरिणामि सहजसिद्धं, अन्योपाधिरहितमित्यर्थः, कर्मणश्च विकृतिं प्राप्तस्य वायोः वातसंज्ञकदोषस्य कर्मणः अपि इदं स्वलक्षणम् "अपरिणामि-कर्मणः" इति अपरिणामि कर्म यस्य सः अपरिणामिकर्मा वातसंज्ञको दोषः पित्तश्लेष्मान्वयनिरपेक्षः, तस्य स्वतन्त्र-वाताख्यदोषस्य, रौच्यलाघवामूर्तत्वाद्यवेक्ष्य कुशला भिषजः वातसंज्ञकदोषकृता एवेमे विकारा इति निश्चिन्वन्ति, वाताख्यदोषस्यैव केवलानि लिङ्गानीमानि इति न, किन्तु वाताख्यदोषकृतकर्मणोऽपि "रौच्यलाघवामूर्तत्वादि" इति प्रतिपादनसिद्धं भवति ॥

वाताख्यदोषारब्धानि वातविकारात्मकानि इमानि कर्माणि—

तं तं शरीरावयवमाविशतः स्रंस भ्रंश व्यास भेद साद हर्ष तर्ष कम्प वर्त चाल तोद व्यथाचेष्टाद्या स्तथा खर परुष विशद सुशिराऽरुणवर्णकषायविरसमुखशोषशूलसुप्तिसंकुंचनस्तम्भखञ्जतादीनि वायोः कर्माणि, तैरन्वितं वातविकारमेवाध्यवस्येत् ॥ च. सू. २० अ. ॥

एतादृशविकृतिमतो वाताख्यदोषस्य उपक्रमोऽप्यनुपदमेव वर्णितः स चाधुना "एकैकं दोषं त्रयस्त्रयो रसा जनयन्ति" त्रयस्त्रयश्चोपशमयन्ति" इति शब्दप्रमाणैरेव ब्रूमः "तद्यथा कटु

तिक्तकषाया वातं जनयन्ति, मधुराम्ललवणास्त्वेनं शमयन्ति। कटुकाम्ललवणाः पित्तं जनयन्ति, मधुरतिक्तकषाया स्त्वेनद् शमयन्ति। मधुराम्ललवणाः श्लेष्माणं जनयन्ति, कटुतिक्तकषायास्त्वेनं शमयन्ति ॥ च. वि. स्था. अ. १॥६॥

विमानस्थानोक्तेनानेन क्रमेण सूत्रस्थानीये महारोगाध्यायेऽपि "तं मधुराम्ललवणस्निग्धोष्णैरुपक्रमैरुपक्रमेत, स्नेहस्वेदास्थापनानुवासननेस्तःकर्मभोजनाभ्यङ्गोत्सादनपरिषेकादिभि र्वातहरै र्मात्राकालं च प्रमाणीकृत्य। आस्थापनानुवासनं तु खलु सर्वथोपक्रमेभ्यो वाते प्रधानतमं मन्यन्ते भिषजः॥, तदादित एव पक्वाशयमनुप्रविश्य केवलं वैकारिकं वातमूलं छिनत्ति, तत्रावजिते वातेऽपि शरीरान्तर्गता वातविकाराः प्रशान्तिमापद्यन्ते, यथा वनस्पते र्मूले छिन्ने स्कन्धशाखावरोहकुसुमफलपलाशादीनां विनाशस्तद्वत्॥

स्रंसभ्रंशव्यासभेदसादादीनां तु खलु विकाराणामाविर्भावस्तेषाञ्चोपशमस्तु सर्वासामपि विकारविज्ञानवतीनां चिकित्सापद्धतीनां समान एव, अस्माकं मते तेषां विकाराणामुत्पादकः शरीरस्थो वातसंज्ञकदोष आर्षवचनसिद्धः, अन्येषां मते तादृशविकाराणामुत्पादकः कोऽपि स्यान्नवा, किन्तु "मधुराम्ललवणस्निग्धोष्णादयो भावास्तु एतेषां विकाराणामुपशयकराः इति, एतत्प्रधानविकारोपशमेऽपि आस्थापनानुवासने भवद्भिरपि स्वीक्रियेते, तथापि नो मन्यन्ता मायुर्वेदीयं निर्दिष्टविकारोत्पादकवातसंज्ञकं शारीर-

दोषम् ! का क्षतिरस्मदीयानाम् ! । यदि चिकित्सासाम्यं स्या त्तर्हि रोगोत्पादकः कश्चन भावः, एक एव समर्थनीयः, येन वयं भ्रातृभावेन जगतः शिवं साधयामहे रोगेभ्यश्च मोचयामहे ॥' एवं चिकित्सासाम्यात्—आर्षवचनाच्च स्रंसभ्रंशादीनां विकाराणामुत्पादकः एकः केवलो वातसंज्ञको दोष एवेति फलितं भवति ॥

एवं—ओषप्लोषदाहादयः चत्वारिंशत्संख्याकाः केवलपित्तविकारा अपि आर्षवचनै रुपपादनीयाः स्युः—

सर्वेष्वपि खल्वेतेषु पित्तविकारेषु—अन्येषु चानुक्तेषु पित्तस्येदमात्मरूपमपरिणामिकर्मणश्च स्वलक्षणम्, यदुपलभ्य तदवयवं वा विमुक्तसंदेहाः पित्तविकारमेवाध्यवस्यन्ति कुशलाः, तद्यथा औष्ण्यं, तैक्ष्ण्यं लाघवमनतिस्नेहो वर्णश्च शुक्लारुणवर्जो गन्धश्च विस्रो रसौ च कटुकाम्लौ पित्तस्यात्मरूपाण्येवंविधत्वाच्च कर्मणः स्वालक्षण्यमिदमस्य भवति ॥ च. सू. २० अ. ॥

औष्ण्यतैक्ष्ण्यलाघवानतिस्नेहादिकांश्च दृष्ट्वा—अपरिणामि आत्मस्वरूपं पित्तस्येदमिति निश्चेयम् । 'अपरिणामि' इति कथनेन वातश्लेष्मसंबन्धनिरपेक्षमेवेदं केवलपित्तस्य स्वलक्षणं ज्ञेयम् । एतादृशात् पित्तविकारात् एतानि रूपाण्युपलभ्य विकृत्येकदेशं वा विज्ञाय कुशला भिषजः सन्देहरहिताः सन्तः पित्तविकारमेवाध्यवस्यन्ति ॥ १७ ॥

पित्ताख्यदोषस्येमानि कर्माण्यपि ज्ञात्वा पित्तविकारा एवार्षवचनैः निर्णेयाः—

तं तं शरीरावयवमाविशतो दाहौष्ण्यपाकस्वेदक्लेदकोथकण्डू-स्रावरागाः, यथास्वं च गन्धवर्णरसाभिनिर्वर्तनं पित्तस्य कर्माणि, तैरन्वितं पित्तविकारमेवाध्यवसेत् ॥ १८ ॥

एतेषां पित्तविकाराणा मुपक्रमोऽपि पित्तविकृतिजनकविरुद्धै रसै रेवाचरणीय इत्युपदिशति—

तं मधुरतिक्तकषायशीतैरुपक्रमेत, स्नेहविरेकप्रदेहपरिषेका-भ्यङ्गादिभिः पित्तहरैं मात्रां कालं च प्रमाणीकृत्य, विरेचनं तु सर्वोपक्रमेभ्यः पित्ते प्रधानतमं मन्यन्ते भिषजः, तद्धि—आदित एवामाशयमनुप्रविश्य केवलं वैकारिकं पित्तमूलं चोपकर्षति। तत्रा-वजिते पित्तेऽपि शरीरान्तर्गताः पित्तविकाराः प्रशान्तिमापद्यन्ते, यथाग्नौ व्यपोढे केवलमग्निगृहं च शीती भवति तद्वत् ॥ १९ ॥

वातविकारेषु यथा मधुराम्ललवणा रसा स्तद्युक्तानि वा विशिष्टद्रव्याणि आस्थापनानुवासनं वा प्रधानोपक्रमत्वेनोपयुज्यन्ते, तद्वत् पित्तविकारेष्वपि तच्छमनानां मधुरतिक्तकषायाणां रसानां शीतधर्मप्रधानानामुपयोगः श्रेयस्करः, विरेचनं तु प्रधानतयोपदि-श्यते, तच्च मधुरकषायकटुरसमेव ॥

औष्ण्यतैक्ष्ण्यादिकान् विकारानुपलभ्य, मधुरादिगुणा विरेचनं तु आंग्लचिकित्सापद्धतौ आयुर्वेदीयचिकित्सापद्धतौ वा समानं, कार्यात् कारणानुमितिस्वीकारपक्षे औष्ण्यतैक्ष्ण्याद्युत्पा-दक—धर्मकस्य कस्यचन भावस्य स्वीकृतिरादरणीया चेत्, औषध-

चनोक्तं शरीरारम्भकं विशिष्टविकृत्युत्पादकं पित्तमेव दोषत्वेन स्वीक्रियतां, तत्र न काचन क्षतिः, चिकित्सायाः सरलतात्वात् ॥

एवं श्लेष्मविकारा अपि प्रधानतया तृप्तितन्द्रानिद्राधिक्यस्तैमित्यगात्रगौरवादयो विंशति भवन्ति ॥ सर्वेष्वपि तु खल्वेतेषु श्लेष्मविकारेष्वन्येषु चानुक्तेषु श्लेष्मण इदमात्मरूपमपरिणामि कर्मणश्च स्वलक्षणम्, यदुपलभ्य तदवयवं वा विमुक्तसन्देहाः श्लेष्मविकारमेवाध्यवस्यन्ति कुशलाः । तद्यथा—स्नेहशैत्यशौक्ल्यगौरवमाधुर्यमात्स्न्यानि श्लेष्मण आत्मरूपाणि, एवंविधत्वाच्च कर्मणः स्वालक्षण्य मिदमस्य भवति ॥ २१ ॥ अर्थस्तु सरल एव ॥ विकृतिमापन्नः स श्लेष्मा इमानि कर्माण्यातनुते—

तं तं शरीरावयवमाविशतः श्वैत्यशैत्यकण्डूस्थैर्यगौरवस्नेहस्तम्भसुप्तिक्लेदोपदेहबन्धमाधुर्यचिरकारित्वानि श्लेष्मणः कर्माणि, तैरन्वितं श्लेष्मविकारमेवाध्यवस्येत् ॥ २२ ॥

श्लेष्मप्रधानेषु सन्निपातज्वरेषु सर्वेऽपि वयं चिकित्सकत्वेन प्रसिद्धा आंग्ला आर्याश्च भिषज आतुरेषु श्लेष्मकर्माणीमान्यनुभवामः, न्यूमोनिआऽपरपर्याये श्वसनकसंज्ञके अभिन्यासाख्ये वा सान्निपातिकज्वरे श्वैत्यशैत्यकण्डूगौरवचिरकारित्वादीनि आतुरशरीरे दृष्ट्वा श्लेष्मविकृत्यपहारकान कटुतीक्ष्णोष्णरूक्षगुणप्रधानानेवोपक्रमानुपयुञ्जामहे । तथा च—

तं कटुकतिक्तकषायतीक्ष्णोष्णरूक्षै रुपक्रमै रुपक्रमेत, स्वेद

वमनशिरोविरेचनव्यायामादिभिः श्लेष्महरैः मात्रां कालं च प्रमाणीकृत्य, वमनं तु सर्वोपक्रमेभ्यः श्लेष्मणि प्रधानतमं मन्यन्ते भिषजः । तद्धि आदित एव आमाशयमनुप्रविश्य केवलं वैकारिकं श्लेष्ममूलमपकर्षति, तत्रावजिते श्लेष्मण्यपि शरीरान्तर्गताः श्लेष्मविकाराः प्रशान्तिमापद्यन्ते, यथा भिन्ने केदारसेतौ शालियवषष्टिकादीनि—अनभिष्यन्दमानानि अम्भसा प्रशोषमापद्यन्ते तद्वत इति ॥ २३ ॥

जलीयतत्त्वप्रधानः श्लेष्मा आहारपरिणामकरः प्रतिपादित एव । स च गुरुस्निग्धपिच्छिलशीलधर्मा स्वाश्रयेषु तद्वाहिनीषु वा विकृतिमापन्नः श्वैत्यशैत्यकण्डवादिकान् विकारां स्तत्र तत्र गौरवात्-स्निग्धत्वात्—पिच्छिलत्वात्—शीतत्वाच्च जनयत्येव, ह्रदकवत् संचीयमानो वर्धमानश्च यदा नापह्रियेत, तदा, वृक्षकेदारगतप्रमाणाधिकजलवत् दुःसाध्यान् विकाराञ्जनयन् मरणमेवापादयति, अतः वृक्षकेदारसेतौ भिन्ने, तस्माच्च प्रवाहिते ह्रदके यथा कोथभावाद् वृक्षो रक्षितो भवति, तद्वत् स्वाश्रयेषु तद्वाहिनीषु वा संचितवृद्धो जलीयगुणप्रधानः वमनादिप्रधानकर्मणा विकृतिस्थानान्निवृत्तिं लभमानः आतुरस्य स्वास्थ्यायैवोपपद्यते, इति सर्वेषामपि न श्चिकित्सकानां प्रतीतिसिद्धमेव, श्लेष्मविकृतिहराश्च स्वेदवमन शिरोविरेचनव्यायामादयो भावाः सर्वैरपि भिषग्वरैः प्रत्यहमनुभूयन्ते, एते च भावाः प्रायशः शरीरगताशयवृद्धश्लेष्मकृतार्द्रतानिवर्तका रूक्षा एवेति प्रत्यक्षमनुभवामः, तस्मादार्षवचनोक्तः शरीरे-पञ्चधा विभक्तः, तृप्तितन्द्रागौरवादिकरः श्लेष्मा एव दोषत्वेन स्वी-

क्रियताम् एतत्पक्षस्वीकारे एव चिकित्सालाघवम् " इत्यलं पल्लवितेन ॥

एवं दोषप्रकोपजन्याः शीतोष्णाज्वरादयोऽपि " अथर्ववेद संहितायाम् " वर्णिताः, तत्रोष्णाज्वरस्तावत्—

यद्यर्चिर्यदिवासिशोचिः शकल्येषि यदि वा ते जनित्रम् ।

हूडुर्नामासि हरितस्य देव स नः संविद्वान् परि वृङ्ग्धि-तक्मन् ॥ २ ॥

प्र. काण्ड. अनु. ५ सू. २५ ॥

हे तक्मन् कृच्छ्रजीवनकारिन् ज्वर, त्वं यदि अर्चिः औष्ण्यगुणायुक्तः असि भवसि । यदि वा शोचिः शरीर-संतापकः असि भवसि । यदि वा ते तव जनित्रम् जन्म उत्पत्तिरितियावत्, शकल्येषि—शकलं नाम दाह्ययोग्यकाष्ठ-समूहं, तदिच्छतीति शकल्येट्—अग्निः, तस्मिन् शकल्येषि—अग्नौ तव जन्म इत्यर्थः सिद्ध्यति । तथापि हे देव दीप्यमानज्वर त्वं हरितस्य पीतवर्णस्य हूडुः—रूढुः रोहकः पुरुषशरीरे उत्पादक इत्यर्थः हूडु र्नाम पुरुषशरीरे पीतवर्णोत्पादकः असि—भवसि, यद्यपि ते बहूनि नामानि सन्ति तथापि इदमेव " हूडुः—रूढुः " इति नाम प्रसिद्धं वेदेषु । स एतादृश स्त्वं सविद्वान् सम्यक् स्वकारणं अग्नेः विकृतिरूपं जानन् सन् नः आस्मान् परि वृङ्ग्धि—परिवर्जय

अस्मच्छरीरं विहाय स्वकारणभूतेन अग्निना सह निर्गच्छेत्यर्थः ॥ २ ॥ "ऊष्मा पित्तादृते नास्ति पित्तं नास्त्यूष्मणा विना" इति न्यायेन ज्वरोत्पत्तौ ऊष्मधर्मणः पित्तस्यैव प्राधान्येन विकृतिरिति प्रतिपादितं प्राक् । एतस्माच्च दोषविकृतिजन्यत्वं ज्वरे सिद्ध्यति ॥ एवं शीतज्वरोऽपि तत्रैव व्याख्यातः—

यदि शोको यदि अभिशोको यदि वा राज्ञो वरुणस्यासि पुत्रः।

ह्रूडुर्नामासि हरितस्य देव स नः संविद्वान् परि वृङ्ग्धि तक्मन् ॥३

हे तक्मन् शीतज्वर त्वं यदि शोकः शरीरस्यान्तःशोचकः [असि] इति संबध्यते तापकः भवसि, यदि वा अभिशोकः–अभितः कृत्स्नस्य शरीरस्य शोचकः असि भवसि, यदि वा राज्ञः राजमानस्य वरुणस्य [वरुणाधिष्ठितजलीयतत्त्वारब्धश्लेष्मणः] पुत्रः–जन्यः असि–भवसि शीतज्वरस्य च श्लेष्मारब्धत्वं च प्रसिद्धमायुर्वेदे । हे देव–दीप्यमानज्वर ह्रूडु नामासि, हे तक्मन् स त्वं संविद्वान् नः परिवृङ्ग्धि परिवर्जय" इति पूर्ववद् व्याख्यानुसन्धेया ॥ ३ ॥

"एताभ्यां द्वाभ्यामपि ज्वराभ्यां नमः अस्तु" इति प्रदर्श्य शीतज्वरभेदान् अन्येद्युष्कादीन् दर्शयति चतुर्थ्यां ऋचि ।

नमः शीताय तक्मने नमो रूराय शोचिषे कृणोमि ।

यो अन्येद्युरुभयद्युरभ्येति तृतीयकाय नमो अस्तु तक्मने ॥४॥

शीताय शीतजनकाय तक्मने कृच्छ्रजीवनकारिणे रोगाय नमः कृणोमि नमस्कृणोमि नमस्करोमि, तथा रूराय शीतानन्तरभाविने ज्वराय शोचिषे शोचकाय नमस्करोमि शीतरूरौ नाम एतन्नामानौ ज्वरौ शाखान्तरे स्पष्टं आम्नायेते। "स इन्द्र। आत्मनः शीतरूरावजनयत् तच्छीतरूरयो जन्म" [तै-सं-२ ९-२-३] शीतज्वरभेदानाह—अन्येद्युः अन्यस्मिन् दिने परदिने यः शीतज्वरः अभ्येति—आगच्छति, तथा उभयेद्युः उभयस्मिन् द्वितीये अहनि यः शीतज्वरः आयाति, तस्मै ऐकाहिकाय द्व्याहिकाय च ज्वराय तृतीयकाय तृतीयदिवसे आगच्छते त्र्याहिकाय ज्वराय, चातुर्थिकादीनामपि उपलक्षणमेतत्। सर्वस्मै तक्मने शीतज्वराय नमः अस्तु नमस्कारो भवतु ॥ एवं नमस्कारेण प्रीतः सन् सर्वो ज्वरः अस्मान् परिवर्जयतु इत्यर्थः—

एवं वातपित्तश्लेष्मविकारजेषु रोगेषु यथोचितमेदोमधुसर्पिस्तैलपायनादिकर्माण्यपि विहितानि। तथा च अथर्ववेदस्य प्रथमकाण्डे तृतीयानुवाके सर्वव्याधिग्रस्तेषु संपाताभिमन्त्रणसंस्कृतेन उदकघटेन व्याधितस्याभिषेचनं विहितं, ते च सर्वे व्याध्यः वातपित्तश्लेष्मविकृतिजन्याः इति आथर्ववेदीया ऋच एव प्रतिपादयन्ति।

अनु. ३. सू. १२॥

जरायुजः प्रथम उस्रियो वृषा वातभ्रजास्तनयन्नेति वृष्ट्या।

स नो मृडाति तन्वऽऋजुगो रुजन् य एकमोजस्त्रेधा विचक्रमे ॥१॥

वातपित्तश्लेष्मलक्षणदोषत्रयकारिदेवतात्मना सर्वत्र वर्तमानस्य भगवत आदित्यस्य प्रार्थनया दोषत्रयोद्भूतस्य रोगजातस्य निवृत्तिः उपपद्येते। तथा च–जरायुजः–जरायुस्थानानि नक्षत्राणि अभिभूय उद्भूतः जरायुजः, प्रथमः सर्वस्मात् जगतः पूर्वमुद्भूतत्वात् प्रथमः, उस्राः किरणाः सन्ति अस्य उस्रियः, वातवत् शीघ्रं व्रजतीति वातव्रजाः–यद्वा वातानां व्रजः समूहोऽस्ति यस्य, स वातव्रजाः–ईदृशः सूर्यः स्तनयन् मेघान् गर्जयन् वृष्टया महत्तरेण प्रवर्षणेन सह एति आगच्छति–स आदित्यः नः अस्माकं तन्वे तनूम्–शरीरम् मृडाति मृडयतु–सुखयतु–इत्यर्थः। किं कुर्वन् स आदित्यः अस्मान् सुखयतु–इत्यत आह रुजन्–त्रिदोषजनितं रोगादिकं भञ्जन् निवर्तयन्, पुनश्च ऋजुगः ऋजु अकुटिलं गच्छतीति ऋजुगः सन् अस्मान् मृडयतु। यः सूर्यः एकम् अभिन्नम् ओजः अस्मीयं तेजः त्रेधा त्रिप्रकारेण अग्निवायुसूर्यात्मना विचक्रमे विविधम् आक्रान्तवान्–पृथिव्यादिलोकत्रयम् आक्रम्य अधिपतित्वेन स्थितवान् इत्यर्थः। स सूर्यः नः अस्मान् मृडयतु सुखयतु–इत्यर्थः प्रसिद्ध एव श्रीसायनाचार्यभाष्ये। अनेन त्रिदोषवादारम्भे "वाय्वग्निजलाधिष्ठातारः वातसूर्यचन्द्रमस इव अस्य स्थूल शरीरस्य "वातपित्तश्लेष्माणः प्रतिपादकाः" इति यत् प्रतिज्ञातं तद् श्रुतिसिद्धं भवति। यः सूर्यः एकमेव स्वकीयं ओजः त्रेधा वाय्वग्निचन्द्रात्मना विचक्रमे कृत्स्नशरीराणि आक्रम्य वर्तते, स

एव वातपित्तश्लेष्मलक्षणदोषत्रयकारिदेवतात्मना सर्वत्र प्राणिशरीरेषु वर्तते" इति स्थूलशरीराणां त्रिदोषारब्धत्वं व्याधीनां च सर्वेषां त्रिदोषजन्यत्वं श्रुतिसिद्धं भवति । अतः आदित्यस्य त्रिधाविभक्तात्मकसूर्यस्य प्रार्थनया दोषत्रयोद्भूतस्य रोगजातस्य निवृत्तिरुपपद्यते इति युक्ततमं प्रतिभाति । सर्वेष्वेव रोगेषु आदित्यस्थानभूतो भगवान् जाठरानल एव रक्षणीय इति सर्वतन्त्रसिद्धान्तितत्वात् । एवं दोषत्रयजनितरोगाणामन्यस्यां ऋचि व्याख्यानं साक्षाच्छब्दोच्चारणशब्दरूपं श्रूयते तथा च—

अङ्गे अङ्गे शोचिषा शिश्रियाणं नमस्यन्तस्त्वा हविषा विधेम ।
अङ्कान्त्समङ्कान् हविषा विधेम यो अग्रभीत् पर्वास्या ग्रभीता २

अङ्गे अङ्गे सर्वेषु अङ्गेषु सर्वप्राणिशरीरेषु शोचिषा दीप्त्या शिश्रियाणम् व्याप्य वर्तमानम् वाताख्यदोषभेदरूपेण प्राणात्मना व्याप्यं वर्तमानम् । तथा च श्रूयते " प्राणः प्रजानाम् उदयत्येष सूर्यः " [प्रश्नोपनिषत् १-८] इति हे सूर्य, ईदृशं त्वा नमस्यन्तः स्तुतिनमस्कारादिभिः पूजयन्तः चर्वाज्यसमिदादिरूपेण हविषा विधेम परिचरेम । तथा अङ्कान् अर्चनशीलान् सूर्यदेवस्यानुचरान् समङ्कान् समीपे वर्तमानान् अन्तरङ्गानपि परिवारभूतान् देवान् हविषा चर्वादिरूपेण विधेम परिचरेम । हविष्प्रदाने चायमेव हेतुः— यः ज्वरादिरूपो रोगः ग्रभीता ग्राहकः सन् अस्य पुरुषस्य पर्वशरीरावयवसंधीन् अग्रभीत्—अग्रहीत् । एतेन " स्वेदावरोधः संतापः

सर्वाङ्गग्रहणं तथा, युगपद्यत्ररोगे च स ज्वरो व्यपदिश्यते " इति निदानोक्तं ज्वरलक्षणं श्रुतिसिद्धं भवति ॥ एतादृशो ज्वराख्यो रोगः व्याप्य बाधते इत्यर्थः । तस्य रोगजातस्य निवृत्तये हविषा विधेम इति पूर्वेण संबन्धः ॥ २ ॥

वातपित्तश्लेष्माख्यानां दोषाणां ज्वरादिरोगेषु अनुस्यूतत्वं च तृतीयायामृचि —

मुञ्च शीर्षक्त्या उत कास एनं परुष्परुराविवेशा यो अस्य ।

यो अभ्रजा वातजा यश्च शुष्मो वनस्पतीन्त्सचतां पर्वतांश्च ॥३॥

हे सूर्य शीर्षक्त्याः शीर्षं शिरः अञ्चति गच्छति व्याप्य बाधते इति शीर्षक्तिः शिरोरोगः, तस्मात् सकाशात् एनं पुरुषं मुञ्च मोचय, शिरोरोगं निवर्तयेत्यर्थः । उत अपि च यः कासः हृत्कण्ठमध्यवर्ती प्रसिद्धः श्लेष्मरोगविशेषः एनं पुरुषं अस्य पुरुषस्य परुः परुः सर्वान् सन्धिबन्धान् आ विवेश, तथाविधात् कासरोगात् एनं मोचयेति पूर्वेण संबन्धः । इदानीं वातपित्तश्लेष्मविकारजनितानां सर्वेषामपि व्याधीनाम् अस्मात् पुरुषात् अन्यत्रावस्थानं प्रार्थयते–' यो अभ्रजाः ' इति, यो रोगः अभ्रजाः अपो बिभर्तीत्यभ्रं प्रवर्षको मेघसंघः तस्मात् जायते प्रवर्षणोदकसंसर्गेण उत्पद्यते इति अभ्रजाः–श्लेष्मरोगः, तथा यो वातजाः वातात् दोषरूपेण कोष्ठे निवसतः वायोः जात उत्पन्नो रोगः, यश्च शुष्मः शोषकः पित्तविकारजनितो ज्वरादिरोगोऽस्ति । दोषत्रयो-

द्रूतः स सर्वोऽपि रोगः एनं पुरुषं विहाय वनस्पतीन् काननस्थान् वृक्षान् पर्वतांश्च मनुष्यसंचाररहितान् शिलोच्चयांश्च सचतां समवैतु आश्रयतु इत्यर्थः—॥ ३ ॥ अथ रोगार्तोऽपि स्वस्य आरोग्यं स्वास्थ्यरूपं स्वयमेव प्रार्थयते—

शं मे परस्मै गात्राय शमस्त्ववराय मे ।
शं मे चतुर्भ्यो अङ्गेभ्यः शमस्तु तन्वे३ मम ॥ ४ ॥

मे मम परस्मै परस्ताद् उपरिवर्तमानाय शिरोरूपाय गात्राय शरीरावयवाय शम्—तत्रत्यरोगशमनेन सुखम् अस्तु भवतु । तथा मे मम अवराय अधस्ताद् वर्तमानाय चरणालक्षणाय अङ्गाय शम् सुखम् अस्तु भवतु । तथा मे मम चतुर्भ्यः द्वौ पादौ द्वौ हस्तौ इति चत्वारि, तेभ्यः अङ्गेभ्यः अवयवेभ्यः शम् सुखम् अस्तु । तथा मे मम तन्वे—मध्यशरीराय—सर्वसमष्टिरूपाय शरीराय वा शम् सुखम् अस्तु भवतु ॥ ४ ॥

एवं वातपित्तश्लेष्माख्यदोषाणां रोगोत्पादकहेतुत्वं तच्छान्तिप्रार्थना च श्रुतिशब्दैः प्रतिपादिता ॥

॥ इति अथर्ववेदसंहितायाः प्रथमे काण्डे तृतीयानुवाके प्रथमं सूक्तम् ॥

अथान्यास्वपि अथर्ववेदीयासु ऋचासु वातपित्तश्लेष्मणां दोषत्वेन श्रवणं शब्दप्रमाणरूपं प्रतिपाद्यते—तत्राथर्ववेदस्य

प्रथमे काण्डे पञ्चमेऽनुवाके द्वितीये सूक्ते श्वेतकुष्ठापनोदाय भृङ्गराज हरिद्रेन्द्रवारुणीनीलिकाः पिष्ट्वा शुष्कगोमयेन श्वित्रप्रदेशं आलोहितदर्शनं प्रघृष्य लेपयेत् । पलितनाशनेऽपि पलितानि आच्छिद्य सूक्तद्वयेन पूर्ववद् विलिम्पेत् ॥ उक्तरोगद्वयशान्तये अनेनैव सूक्तद्वयेन आज्यहोमादीनि मारुतकर्माणि च वृष्टिकर्मोक्तवत् कुर्यात् ॥

एताः सर्वा अपि ओषधयः चरकसंहितायाः सूत्रस्थानीये अपामार्गतण्डुलीयेऽध्याये अन्तःपरिमार्जनबहिःपरिमार्जनरूपेण व्याख्याताः, ताश्च दोषदूषितदूष्यविकृत्यपहारका एवेति दोषनिरूपणमस्मिन् वादे श्रुतिप्रमाणसिद्धं भवति ॥ ताश्च अथर्ववेदीया ऋचः ओषधिवर्णनव्याधिवर्णनव्याधिहन्तृरूपाः इमाः वर्णिताः सन्ति—

नक्तं जातास्योषधे रामे कृष्णे असिक्नि च ।
इदं रजनि रजय किलासं पलितं च यत् ॥ १ ॥

हे ओषधे—ओषः फलपाकः अस्यां धीयते इति ओषधिः हे ओषधे—हरिद्राख्ये त्वं नक्तं रात्रौ जाता उत्पन्ना असि भवसि । अतस्त्वं श्वैत्यनिवर्तनेन कार्ष्ण्यम्—आपादयितुं शक्ता भवसीत्यर्थः ॥ तथा हे रामे, व्याधितो जनः अनया ओषध्या रमते इति "रामा नाम भृङ्गराजाख्या ओषधिः । तथा हे कृष्णे ! कृष्णवर्णे कृष्णवर्णापादिके वा इन्द्रवारुणि ! । हे असिक्नि ! असितवर्णे असितवर्णापादिके वा नीलि ! पूर्वं ओषधिशब्देन निर्दिष्टाया हरिद्रायाः रञ्जनक्रियासंबन्धित्वेन कुण्ठितशक्तित्वात् रञ्जनक्रियायामपि,

संबन्धं दर्शयितुं पुनराह रजनीति । यद्वा, अत्र निर्दिष्टानां चतसृणाम् ओषधीनामपि उत्पत्तिरुच्यते "नक्तं जातास्योषध" इति ॥ हे ओषधे रामादिरूपे त्वं नक्तं जातासि । ईदृशव्याख्यानात् न पुनरुक्तिशङ्कावकाशः । हे रजनि रञ्जयति स्वसंसृष्टं वस्त्रादिकम् अर्थम् इति रजनी तत्संबुद्धौ हे रजनि ! हे रामाद्योषधे त्वम् इदम् वक्ष्यमाणं अङ्गम् रजय, श्वित्रादिदोषनिबर्हणेन स्वकीयं रागं संश्लेषय । अत्र रागसंपादिकानाम् ओषधीनां बहुत्वेऽपि प्रत्येकापेक्षया एकवचनम् । तदेवाङ्गमाह किलासः कुष्ठरोगविशेषः—तद्युक्तम् अङ्गम्, तथा पलितम् जरावस्थाप्राप्तं केशानां शौक्ल्यं तद्युक्तमङ्गं च । ईदृशं यदङ्गमस्ति तद्रजयेति संबन्धः ॥ १ ॥

किलासं च पलितं च निरितो नाशया पृषत् ।
आत्वा स्वो विशतां वर्णः परा शुक्लानि पातय ॥ २ ॥

किलास उक्तलक्षणः कुष्ठविशेषस्तम्, पलितञ्च उक्तलक्षणं शुक्लकेशादित्वञ्च, द्वावेतौ विशिष्टव्याधी इतः व्याधिदूषितात् अस्मात् शरीरात् पृथक् पृथक् कृत्य हे ओषधे त्वं निर् नाशय निरवशेषं घातय अपाकुरु इत्यर्थः । तदनन्तरम्—हे रुग्ण, त्वा त्वां स्वः स्वकीयः प्राक् अवस्थितो वर्णः रक्तिमादिरूपः आ विशताम् प्रविशतामित्यर्थः । केशशौक्ल्यस्य पुनरुद्भवो यथा न स्यात्तथा प्रतिपादयति—शुक्लानि शरीरकेशगतशुक्लरूपाणि परा पातय दूरं प्रेरय—यथा पुनरेवं न स्पृशन्ति तथा कुरु इत्यर्थः ॥ २ ॥

अ॒सि॒तं ते॑ प्र॒लय॑न मा॒स्थान॒ म॑सि॒तं तव॑ ।

असि॑क्न्य॒स्योषधे॒ निरि॒तो ना॑शया॒ पृष॑त् ॥ ३ ॥

हे नीलि, ते तव प्रलयनम्—प्रकर्षेण लीयते संश्लिष्यते अत्रेति प्रलयनम्—उत्पत्तिस्थानम् कृष्णवर्णं भवति । तथा च तव आस्थानम पुरुषैः आनीता सती आ समन्तात् तिष्ठति अत्रेति आस्थानम् प्रक्षेपणभाजनादिरूपम्—असितं कृष्णं भवति । कुत-एतद्भवतीत्याह—हे ओषधे नीलि त्वम् असिक्नी असितवर्णा असि भवसि । यतस्तवायं स्वभावः, अतः इतः अस्मात् श्वित्रादिरोग-दूषिताद् अङ्गात् आलेपादिना त्वत्संबंधात् पृथक् किलासं पलितञ्च पृथक् कृत्य निर् नाशय निःशेषेण विनष्टं कुरु ॥ ३ ॥

अ॒स्थि॒जस्य॑ कि॒लास॑स्य तनू॒जस्य॑ च॒ यत् त्व॒चि ।

दूष्या॑ कृ॒तस्य॒ ब्रह्म॑णा॒ लक्ष्म॑ श्वे॒तम॑नीनशम् ॥ ४ ॥

अनया ऋचा अस्थ्यादिधातुगतस्य उत्सादनीयस्य किलास-स्यैव निवृत्तिमाह—अस्थिजस्य तथा तनूजस्य [अत्र तनूशब्देन त्वगस्थ्नोर्मध्यवर्ती मांसधातुरुच्यते—तस्माद् यज्जातं तस्य] एवं त्वचि त्वग्धातौ यद् वर्तमानं तस्य सर्वस्य किलासस्य—सर्वविध कुष्ठव्याधेः, तथा दूष्याकृतस्य दूषयति प्राणिनं हिनस्तीति दूषिः शत्रूत्पादिता कृत्या तया कृतस्य उत्पादितस्य च किलासस्य यत्

लक्ष्म लक्ष्मभूतं चिन्हं, श्वेतं शरीरावयवगतं श्वैत्यं, ब्रह्मणा अनेन प्रयुज्यमानेन वेदमन्त्रेण अनीनशम्–नाशितवान् अस्मि ॥ शत्रुप्रेरितकृत्ययापि व्याधीनां कुष्ठादीनां संभवस्य प्रतिपादितत्वात् "व्याधीनां दैवबलप्रवृत्तात्मको भेदः सिद्ध एव प्रतिसिद्धो भवति ॥ ४ ॥

॥ इति पञ्चमेऽनुवाके द्वितीयं सूक्तम् ॥

पित्ताख्यदोषस्य व्याधीनां जनकत्वेनोपात्तत्वात् नील्याद्योषधीश्च तेन पित्तेनोपमितत्वात् प्रकृतं तृतीयमपि सूक्तं समाद्रियते ।

सुपर्णो जातः प्रथमस्तस्य त्वं पित्तम् आसिथ ।

तद् आसुरी युधा जिता रूपं चक्रे वनस्पतीन् ॥ १ ॥

नील्याद्योषधस्य वीर्यातिशयं प्रकटयितुम् आख्यायिकया उत्पत्तिमाह–सुपर्णः शोभनपक्षोपेतो गरुत्मान् प्रथम आदिभूतः सन् जातः उत्पन्नः । हे नील्याद्योषधे त्वं तस्य गरुत्मतः पित्तम्–शरीरगतः पित्ताख्यो दोषः आसिथ पूर्वं बभूविथ ॥ तत् तथाविधं पित्तं आसुरी आसुराणां मायारूपा काचन स्त्री–सा युधा युद्धेन सुपर्णेन सह संग्रामं कृत्वा जिता जितवती । जयेन लब्धं तत् पित्तं रूपं चक्रे ओषध्यात्मना सेव्यमाकारम्–अकार्षीत् । तदेव रूपमाह–वनस्पतीन् नील्यादीन् चक्रे ॥ एतेषां नील्यादीनां सुपर्णपित्तकार्यत्वरूपप्रतिपादनेन अमोघवीर्यत्वं उक्तं भवति ॥

आसुरी चक्रे प्रथमेदं किलासभेषजम् इदं किलासनाशनम् ।
अनीनशत् किलासं सरूपाम् अकरत् त्वचम् ॥ २ ॥

आसुरी पूर्वमन्त्रोक्ता असुरमायारूपा स्त्री प्रथमा श्वित्रचिकित्सकानामादिभूता सती इदम् सुपर्णपित्तेन निर्मितं नील्यादिकं किलासभेषजम् किलासस्य श्वित्रस्य निवर्तकम् औषधं चक्रे कृतवती ॥ अतः इदं नील्यादिकं इदानीमपि लोके किलासनाशनं किलासस्य रोगस्य निवर्तकं भवति । तद् नील्याद्यौषधं प्रयुज्यमानं सत् किलासं श्वित्ररोगं अनीनशत् नाशयतिस्म । तथा त्वचं त्वग्धातुं श्वित्रदूषितं सरूपां समानरूपां श्वित्ररहितत्वचा समानवर्णामकरत्–अकार्षीत् ॥ २ ॥

सरूपा नाम ते माता सरूपो नाम ते पिता ।
सरूपकृत् त्वमोषधे सा सरूपमिदं कृधि ॥ ३ ॥

हे ओषधे ते तव माता जननी भूमिः सरूपा त्वया समानरूपा कृष्णवर्णैव । तथा ते तव पिता द्यौः, बीजविशेषो वा पितृशब्देन विवक्षितः, सोऽपि सरूपः समानवर्णः [उभयत्रापि नामशब्दः प्रसिद्धपरः] हे ओषधे नील्यादिरूपे त्वं सरूपकृत्–स्वसंसृष्टं पदार्थं आत्मना समानवर्णं करोति सा सरूपकृत्–तादृश्यसीत्यर्थः । सा समानरूपमातापितृजाता त्वं इदं श्वित्ररोगदूषितमङ्गं सरूपं कृधि, त्वया समानवर्णं कुरु ॥ ३ ॥

श्यामा सरूपं करणी पृथिव्या अध्युद्भृता ।

इदमू षु प्र साधय पुना रूपाणि कल्पय ॥ ४ ॥

श्यामा श्यामवर्णा सरूपंकरणी—असरूपं सरूपं क्रियते अनया यद्वा सरूपं, क्रियते अनया इति—तादृशी त्वं पृथिव्या अधि भूमेरुपरि उद्भृता आसुर्या मायया उत्पादिता, अतः हे ओषधे त्वं इदं किलासाक्रान्तमङ्गं सु प्र साधय सुष्ठु रोगविनिर्मुक्तं कुरु । व्याधिसंभवात् पूर्वं यथारूपाण्यवस्थितान्यासंस्तानि पुनः व्याधिनिबर्हणानन्तरमपि कल्पय संपादय ॥ ४ ॥

॥ इति पञ्चमेऽनुवाके तृतीयं सूक्तम् ॥

एवमथर्ववेदे बहूनि सूक्तानि साक्षात् त्रिदोषप्रतिपादकानि ओषधिवर्णनरूपेण वातपित्तश्लेष्मणामस्य शरीरस्य आरम्भकत्वप्रतिपादकान्युपलभ्यन्ते, तृतीयकाण्डे चतुर्थसूक्ते देवानां अस्तुमणिबन्धनवर्णने देवशरीररूपं प्रतिपादयता भगवताथर्ववेदेन देवानां शरीरं वातपित्तश्लेष्माख्यदोषरहिततया प्रतिपादितम् । तथा च—

अश्लेष्माणो अधारयन् तथा तन्मनुना कृतम् ।

कृणोमि वध्रि विष्कन्धं मुष्काबर्हो गवा मिव ॥ २ ॥

अस्तुमणिबन्धनधारणस्य देवानां द्विजानां चाधिकारात्—“अश्लेष्माणः” इति पदेन देवा द्विजाश्च स्तूयन्ते । अश्लेष्मा-

यो नाम विघ्नैरभिमतकार्यसंप्राप्तिशून्या जनाः, यद्वा श्लेष्मोपलक्षितत्रिदोषदूषितशरीररहिताः–दिव्यदेहा देवाः " अधारयन्, विघ्नशमनाय अस्लुवृक्षविकारमणिं दण्डादिकञ्च धृतवन्तः । तथा तद्वदेव तत् मण्यादिधारणं मनुना मनुष्यसृष्टेः कर्त्रा स्वायंभुवेन कृतम्–अनुष्ठितम् ॥ एवमहमपि मण्यादिधारणेन, विष्कन्धम् कार्यप्रवृत्तिप्रतिबन्धकं विघ्नजातं वध्रि–शुष्कचर्ममयीरज्जुयुक्तं करोमि–उन्मूलनपाशयुक्तं कृणोमीत्यर्थः । यद्वा वध्रशब्दो निर्वीर्यत्वरूपधर्मपरः सोऽस्यास्तीति वध्रि–नाम निर्वीर्यं कार्याक्षमं करोमि यद्वा वध्रि वध्यं विनष्टं करोमि । तत्र दृष्टान्तमाह–" मुष्काबर्हो गवामिव " गवां पुंगवानां वृषभानां मुष्काबर्हः मुष्कम्–आबृहति उन्मूलयतीति मुष्काबर्हः, यद्वा आबर्हणम् आबर्हः मुष्कस्याबर्हो मुष्काबर्हः, स एष मुष्काबर्हः यथा तान् पुंगवान् निर्वीर्यान् प्रजननाशक्तान् करोति तद्वत् अहमपि अस्लुवृक्षविकारमणिधारणेन विष्कन्धम्–कार्यप्रवृत्तिप्रतिबन्धकं विघ्नजातं वध्रि–निर्वीर्यं कृणोमि करोमीत्यर्थः ॥ २ ॥

अस्यामृचि वातपित्तश्लेष्माख्यदोषरहितदेवशरीरवर्णनेन मनुष्यादारभ्य सूक्ष्मकीटपर्यन्तानां पार्थिवप्राणिजातानां शरीराणां वातपित्तश्लेष्मारब्धत्वं साधयति––

एवं, सहदेव्यपामार्गाद्योषधिवर्णनपराः बहुमूत्रनाडीव्रणजलोदरविषविकारवर्णनतदुपक्रमपराश्च बह्व्य ऋचः अथर्ववेदीया एव वातपित्तश्लेष्माख्यशारीरदोषवर्णनपराः, तज्जनितव्याधि-

निवारणपराश्च समुपलभ्यन्ते, अत्र तु शारीरदोषवर्णनपरा दिक् एव प्रदर्शिता । शुक्लयजुर्वेदेऽपि--द्वादशाध्याये—

साकं यक्ष्म प्रपत चाषेण किकिदीविना ।
साकं वातस्य ध्राज्या साकं नश्य निहाकया ॥ ८७ ॥

राजयक्ष्मसदृशमहारोगनिवारणे औषधप्रयोगेनापवार्यमाणो-यो रोगराट् तस्यौषधप्रभावेण निवृत्तिरुपदिष्टा महीधरभाष्ये ।

हे यक्ष्म--रोगराज ! त्वम्, किकिदीविना--कफावरुद्धकण्ठोत्थध्वनेः अनुकरणार्थं कि कि शब्दः किकिना कण्ठध्वनिना दीव्यतीति किकिदीविः श्लेष्मरोगः । एवं 'चष' वधे--चषति व्याकुलं कृत्वा हन्ति इति चाषः पित्तरोगः, वातस्य ध्राजिः वातरोगः तेन हे यक्ष्म रोगराज ! त्वं कफपित्तवातरोगवान् सन् तज्जै विकारैः सह प्रपत गच्छ । यया--पीडया कया रुजा विहतोऽस्मि हा--कष्टम्-इति शब्दं करोति सा निहाका नाम--सर्वाङ्गवेदना तया साकं हे यक्ष्म त्वं नश्य विनष्टो भवेत्यर्थः ॥ ८७ ॥

एवं दोषविकृतिविघातकप्रभाववत्त्वं पुनरोषधीनां तु अध्यायस्य आ समाप्तेः कतिपयै मन्त्रै र्व्याख्यातमेव, दोषविकृति-विघातकरप्रभाववत्त्वं पुनः—

ओषधयः समवदन्त सोमेन सह राज्ञा ।
यस्मै कृणोति ब्राह्मणस्त ँ राजन् पारयामसि ॥८८॥

व्याध्यपगमदृढीकरणार्थं ओषधीनां सोमेन राज्ञा संवादरूपोऽयं मन्त्रः सरलार्थ एव ॥ ९६ ॥

नाशयित्री बलासस्यार्शस उपचिता मसि ।

अथो शतस्य यक्ष्माणां पाकारो ऽसि नाशनी ॥ ९७ ॥

बलम् अस्यति निक्षिपतीति बलासः क्षयः, तदाख्यव्याधेः हे ओषधे त्वं नाशययित्री नाशकर्त्री असि । अर्शसः,–अर्शो नामधेयगुदव्याधेः च नाशयित्री असि–उपचिताम्–उपचिन्वन्ति शरीर मुपसन्नतया वर्धयन्ते इति उपचितः, श्वयथुगलगण्ड श्लीपदप्रभृतयः तेषाञ्च नाशिका असि । अथो–अपि च शतस्य यक्ष्मणां बहूनां व्याधीनां पाकारोः–मुखपाकक्षतादेश्च नाशनी नाशकर्त्री असि भवसि । पाको नाम मुखपाकः, अरु र्नाम क्षतमुच्यते तदादेः पाकारोः, अथवा 'रुच्' दीप्तौ, अन्नपाकस्य अरुः अदीप्तिः 'मंदाग्नित्वं' तस्य च त्वं नाशिनी असि भवसि ।९७।

एवं वातपित्तश्लेष्माख्यानां खलु शारीरदोषाणां साक्षाच्छ्रवणमपि सौत्रामणियागप्रकरणे–बहुषु मन्त्रेषु अनुभवामः, शुक्लयजुर्वेदे एकोनविंशेऽध्याये तावत्—

इन्द्रः सुत्रामा हृदयेण सत्यं पुरोडाशे न सविता जजान ।

यकृत् क्लोमानं वरुणो भिषज्यन् मतस्ने वायव्यै र्न मिनाति

पित्तम् ॥ ८५ ॥

सुष्ठु त्रायते रक्षति इति सुत्रामा इन्द्रः पुरोडाशदेवता, इन्द्रस्य हृदयेन हृदयं जजान जनयति । सविता च पुरोडाशेन इन्द्रस्य सत्यं जजान । वरुणो भिषज्यन् इन्द्रस्य चिकित्सां कुर्वन् सन् यकृत् कालखण्डं क्लोमानं गलनाडिकाञ्च जजान । वायव्यैः सौमिकोर्ध्व पात्रैः मतस्ने हृदयोभयपार्श्वस्थे अस्थिनी पित्तञ्च मिनाति [नकारश्चार्थः] पित्तं निर्मिमीते सृजतीत्यर्थः ॥ ८९ ॥ इति श्रौतं पित्तवर्णनम् ॥

अविं न मेषो नसि वीर्य्याय प्राणस्य पन्था अमृतो ग्रहाभ्याम्
सरस्वत्युपवाकैर्व्यानं नस्यानि बर्हिर्बदरैर्जजान ॥ ९० ॥

अविः सारस्वतो मेषश्च नसि इन्द्रस्य नासिकायां वीर्यायावस्थितः सन्, ग्रहाभ्यां सारस्वताभ्यां प्राणस्य प्राणवायोः पन्थाः अमृतः अनश्वरः क्रियते । सरस्वती उपवाकैः यवाङ्कुरैः कृत्वा व्यानं इन्द्रस्य व्यानवायुं जजान जनयति । बर्हिः बदरैः सह नस्यानि नासिकाभवानि लोमानि जजान ॥ ९० ॥ इति श्रौतं वातवर्णनम् ॥

इन्द्रस्य रूपमृषभो बलाय कर्णाभ्यां श्रोत्रममृतं ग्रहाभ्याम् ।
यवा न बर्हिर्भ्रुवि केसराणि कर्कन्धु जज्ञे मधु सारघं मुखात् ॥ ९१ ॥

ऋषभः बलाय सामर्थ्याय इन्द्रस्य रूपं चक्रे । ग्रहाभ्यां

ऐन्द्राभ्यां अमृतं भूतभविष्यद्वर्तमानशब्दग्राहि श्रोत्रेन्द्रियं कर्णाभ्या मिन्द्रस्य कर्णयोश्चक्रे कर्णशष्कुल्योः श्रोत्रेन्द्रियं स्थापितमित्यर्थः। यवाः बर्हिश्च भ्रुवोः केसराणि लोमानि अभवन् । कर्कन्धु बदरं मुखात् सारघं मधुतुल्यं लालाश्लेष्मादि मधुशब्देनोच्यते सादृश्यात्। सरघाः भ्रमराः तैःकृतं सारघं नाम भ्रामरं मधु इत्यर्थः। यथा सारघं मधु इतस्तत आहृतं भवति, एवं लालादि सर्वस्मादङ्गाद्भवति ॥ ११ ॥ इति श्रौतं श्लेष्मवर्णनम् ॥

समापितं श्रौतं प्रकरणम्, सांप्रतमार्षप्रकरणमाद्रियते, सप्तविधव्याधिचिकित्सायामपि सुखसाध्यता कष्टसाध्यता याप्यता असाध्यतारूपाश्च व्याधिभेदाः दोषान्—वातपित्तश्लेष्माख्यानेव शारीरान् प्रमाणीकुर्वन्ति, तथा च साध्ये व्याधावेव चिकित्सा-प्रवृत्तिरुक्ता, असाध्ये तु निवृत्तिरुपदिष्टा, तथाहि—

हेतवः पूर्वरूपाणि रूपाण्यल्पानि यस्य च ।
न च तुल्यगुणो दूष्यो न दोषः प्रकृतिर्भवेत् ॥ ११ ॥
न च कालगुणस्तुल्यो न देशो दुरुपक्रमः ।
गति रेका नवत्वं च रोगस्योपद्रवो न च ॥ १२ ॥
दोषश्चैकः समुत्पत्तौ देहः सर्वौषधक्षमः ।
चतुष्पादोपपत्तिश्च सुखसाध्यस्य लक्षणम् ॥ १३ ॥

च. सं. सू. स्था. अ० १० ॥

व्याध्यारम्भको यो दोषः स व्याधितप्रकृतौ उत्कटो न भवेत् इत्यर्थः, देशो भूमिरातुरश्चेति सर्वसंमतम् । तत्र वातव्याधि-

तस्य दुरुपक्रमो देशः तुल्यगुणवान् 'मरुः' तथा श्लेष्मव्याधौ तुल्यगुणवान् आनूपो देशः मरुदेशनिवासिनां वातगुणाधिकानां जाते वातव्याधौ सुखसाध्यतां नैव पश्यामः, अनुभवामश्च वात-व्याधितानां मरुदेशीयानां चिकित्साकष्टम्—अत्र तु आर्षवचनत्वात् प्रत्यक्षोपलम्भाच्च वाताख्यदोषमेव व्याधिहेतुत्वेन प्रमाणीकर्तुं मर्हामः। एवं श्लेष्मव्याधावपि आनूपो देशो दुरुपक्रमः, शीतप्रदेश निवासिनां ये श्लेष्मणा उपद्रवा अभिन्यासश्वसनकसंज्ञकाः सन्निपात ज्वरा जायन्ते ते तु श्लेष्मणः स्थिरकारित्वात् श्लेष्मपाके देशप्रभावेण च विलम्बात् श्लेष्मव्याधयो नैव सुखसाध्याः किन्तु कष्टसाध्या इति प्रत्यक्षमुपलभामहे अनुभवामश्च तेषां व्याधीनां कष्टसाध्यताम्। अतस्तादृशेषु देशेषु व्याधिचिकित्सायां कष्टसाध्यत्वं श्लेष्माख्यदो-षकृतमेवेति आर्षवादसंमतं स्वीक्रियताम्।

व्याधिप्रापका वातपित्तश्लेष्मसंचयवृद्धिक्षयरूपाः हेतवः, व्याधीनाञ्च पूर्वरूपाणि दोषकृतानि यस्य व्याधितस्य अल्पानि स्युः, स एव व्याधिः सुखसाध्यः, एवं यस्य दूष्यो रसादिधातुः दोषेण तुल्यगुणो न भवेत्, यस्य च दोषः प्रकृति र्न भवेत्, कालगुणो वर्षादिलक्षणश्च यस्य तुल्यो न स्यात् देशोऽपि दुरुपक्रमो न भवेत्, दोषाणां गति रेकविधा एव स्यात्, व्याधेश्च नवत्वं स्यात् रोगस्य कश्चनोपद्रवो न भवेत् व्याधिसमुत्पत्तौ एक एव दोषो हेतुः स्यात् देहश्च सर्वौषधक्षमः स्यात्, "भिषग् द्रव्याण्युपस्थाता रोगी पादचतुष्टयम्" इति चिकित्सायाः चतुर्णां पादानां प्रत्येकं गुण-चतुष्टयसंपत्तिः स्यात्, एतद्विधानां व्याधीनां सुखसाध्यतोपदिष्टा

महर्षिवचनैः, तस्मादाप्तोदेशात् वातपित्तश्लेष्माख्याः शारीरदोषाः इति सिद्धं भवति ॥ एवं कष्टसाध्ययाप्यासाध्यभेदेष्वपि दोषाणां तारतम्यं प्राबल्यं च महर्षिवचनैरेव ज्ञेयं स्यात् । तथा च समग्रं चरकीयमिन्द्रियस्थानमपि वातपित्तश्लेष्मविकारजन्यानामसाध्यव्याधीनां तथाविधत्वं प्रकाशयति । एवं लङ्घनबृंहणरूक्षणस्नेहन स्वेदन स्तम्भनात्मको षड्विधो ह्युपक्रमः, वातपित्तश्लेष्मकृतचयापचयरूपान् यान् विकारान् शमयति, तेऽपि विकाराः वातपित्तश्लेष्मकृता एव । अस्मदीयचिकित्सापद्धतौ परेषाञ्च चिकित्सापद्धतौ, एष षड्विध उपक्रमः न व्यभिचरति, तथा चोक्तम्—

प्रभूतश्लेष्मपित्तास्रमलाः संसृष्टमारुताः ।
बृहच्छरीरा बलिनो लङ्घनीया विशुद्धिभिः ॥ १९ ॥

ऊर्ध्वाधो विशोधनद्रव्यै रेते लङ्घनीया इति सर्वास्वपि पद्धतिषु अविसंवादम् । लङ्घनक्रमेण च निखिलेष्वपि विकारग्रस्तदेहेषु उपशयमुपलभामहे तस्माद् आर्षसंमतत्वात् आप्तोपदेशाच्च शरीरारम्भकात् आहारपरिणामभावाचारभ्य, व्याधिजननकर्मणि निधनोत्पत्तौ च वातपित्तश्लेष्माख्या एव दोषाः स्वीकर्तव्याः स्युः ॥

तथा च—

येषां मध्यबला रोगाः कफपित्तसमुत्थिताः ।
वम्यतीसारहृद्रोग-विसूच्यलसकज्वराः ॥ २० ॥

विबन्धगौरवोद्गार हृल्लासारोचकादयः ।
पाचनैस्तान् भिषक् तेषां प्रायेणादावुपाचरेत् ॥ २१ ॥

रोगाणां यदा मध्यबलत्वं स्यात् ते च रोगा यदि कफपित्त समुत्थिताः स्यु स्तर्हि वम्यतीसारादीनां पाचनक्रम एव श्रेयान् इति महर्षिवचनं आप्तोपदेशत्वात् प्रमाणं भवति " सत्वरचिकित्सकास्तु दक्षतरा भिषजः " शोधन स्तम्भनरूपाणि द्रव्याण्युपादाय प्रयतन्ते, किन्तु पाचनक्रमं विना उपरोक्तेषु व्याधिषु नैवैतादृशी सिद्धि र्दृष्टिगोचरा भवतीति प्रत्यक्षमुपलभामहे अनुभवामश्च । तस्मादार्षोक्तः दोषक्रम एव श्रेयान् इति सिद्धं भवति । एतेन आदौ पाचनं दोषपाचन मौषधं देयं पश्चाच्च यथार्ह उपक्रमो विधेय इति प्रतिज्ञा सिद्धा भवति । एवं बृंहणक्रमोऽपि क्षीणदोषानामर्थसाधकः तथा च प्रतिपादितम्—

क्षीणाः क्षताः कृशा वृद्धा दुर्बला नित्यमध्वगाः ।
स्त्रीमद्यनित्या ग्रीष्मे च बृंहणीया नराः स्मृताः ॥ २६ ॥

एते प्रायः क्षीणदोषैरेव तथाविधा भवन्ति, अत एते यथार्हं गोदुग्धादिभि र्द्रव्यै र्बृंहणीयाः स्युः । क्षीणक्षतकृशादयश्च वातपित्तश्लेष्मणां क्षय रेव भवन्ति, इति अन्यत्र विस्तरः । एवं रूक्षणीया अपि दोषसंचयेन वृद्धदूष्या एव भवन्ति—

अभिष्यन्दा महादोषा मर्मस्था व्याधयश्च ये ।
उरुस्तंभप्रभृतयो रूक्षणीया निदर्शिताः ॥ ३० ॥

च सू. स्था. अ. २२ ॥

अभिष्यन्दन्ते एषु व्याधिष्विति—अभिष्यन्दाः श्लेष्मग्रहणी प्रमेहादयः, महान्तः बलवन्तो दोषा एष्विति महादोषाः बलवद्वातपित्तश्लेष्माणः तादृशाः, एवञ्च ये व्याधयो मर्मस्थाः शिरोहृदयबस्तिस्थाश्च भवन्ति, तथा उरुस्तम्भाढ्यवातादयः, त एते दोषाणां श्लेष्मसंबद्धानामाधिक्याद् रूक्षणीया भवन्ति। अभिष्यन्दादिषु प्रायः श्लेष्मा प्रधानः इतरे वातपित्ते गौणे इति तादृशानां कटुतिक्तकषायैः परस्पराविरोधिगुणवद्भि द्रव्यैस्तादृशैर्वा कर्मभी रूक्षणमेवोपशेते इति प्रत्यक्षं नः सर्वविधानामपि भिषजाम्। तस्मात् दोषप्रत्यनीकमेव रूक्षणमिति आर्षसंमतं सिद्ध्यति—तथा स्नेहनस्वेदनेऽपि दोषगतिविकारवैचित्र्यान्निर्दिष्टे तथा च—

अतः स्वेदाः प्रवक्ष्यन्ते यै र्यथावत् प्रयोजितैः।
स्वेदसाध्याः प्रशाम्यन्ति गदा वातकफात्मकाः॥ ३॥

स्नेहपूर्वं प्रयुक्तेन स्वेदेनावर्जितेऽनिले।
पुरीषमूत्ररेतांसि न सज्जन्ति कथञ्चन॥ ४॥

सरलार्थौ श्लोकावेतौ॥ एवं स्नेहनस्वेदनप्रयोजनं तु—

आमाशयगते वाते कफे पक्वाशयाश्रिते।
रूक्षपूर्वो हितः स्वेदः स्नेहपूर्वस्तथैव च॥ ५॥

वाते आमाशयगते सति स्थानापेक्षया रूक्षणं कृत्वा पश्चाद्वातजन्यदुष्ट्यपेक्षया स्निग्धः कार्यः, एवं पक्वाशयगते कफे स्नेहपूर्वं उपचर्यः, आमाशयशब्देन कफस्थानं ज्ञेयं कफस्थानापेक्षया हि प्रथमं रूक्षः क्रियते यदुक्तम्—"स्थानं जयेद्धि पूर्वं तु स्थानस्थस्याविरोधतः"

इति चक्रदत्ताचार्याः ॥ तथा च कषायमद्यनित्यगर्भिणीरक्तपित्त्या-दीनां स्वेदननिषेधं विधाय ।

" प्रतिश्याये च कासे च हिक्काश्वासेष्वलाघवे ।
कर्णमन्याशिरःशूले स्वरभेदे गलग्रहे ॥ २० ॥
अर्दितैकांगसर्वांगपक्षाघाते विनामके ।
कोष्ठानाहविबन्धेषु शुक्राघाते विजृम्भके ॥ २१ ॥
पार्श्वपृष्ठकटीकुक्षिसंग्रहे गृध्रसीषु च ।
मूत्रकृच्छ्रे महत्त्वे च मुष्कयो रङ्गमर्दके ॥ २२ ॥
पादजानूरु जङ्घार्त्तिसंग्रहे श्वयथावपि ।
खल्लीष्वामेषु शीते च वेपथौ वातकण्टके ॥ २३ ॥
संकोचायामशूलेषु स्तम्भगौरवसुप्तिषु ।
सर्वाङ्गेषु विकारेषु स्वेदनं हितमुच्यते ॥ २४ ॥

च. सू. अ. १४ ॥

एतेषु विकारेषु केचन वातप्रधानाः, केचन वातश्लेष्म प्रधानाः । वातश्लेष्माणावेव स्वेदनं सहेते, भिषजश्च तादृशेष्वेव विकारेषु स्वेदनमुपदिशन्ति, अतः स्वेदनार्हा व्याधयः वातश्लेष्मा-त्मका इति आर्ष मतमेवोपादीयताम् ॥ एवं स्नेहनविधानमपि—चरक-सूत्रस्थानीये त्रयोदशाध्याये—

स्वेद्याः शोधयितव्याश्च रूक्षा वातविकारिणः ।
व्यायाममद्यस्त्रीनित्याः स्नेह्याः स्यु र्ये च चिन्तकाः ॥

एतेषां घृततैलवसामज्जा—मन्यतमेन द्वाभ्यां त्रिभिः महदाख्येन चतुष्टयेन वा स्नेहनं क्रियते। तत्र घृतगुणास्तावत् "घृतं पित्तानिलहरं, रसशुक्रौजसां हितम्। निर्वापणं मृदुकरं स्वरवर्णप्रसादनम् ॥ १४ ॥ तैलगुणास्तावत् "मारुतघ्नं न च श्लेष्मवर्धनं बलवर्धनम्। त्वच्यमुष्णं स्थिरकरं तैलं योनिविशोधनम् ॥ १५ ॥ विद्धभग्नाहतभ्रष्टयोनिकर्णशिरोरुजि। पौरुषोपचये स्नेहे व्यायामे चेष्यते वसा" ॥ १६ ॥ बलशुक्ररसश्लेष्ममेदोमज्जविवर्धनः। मज्जा विशेषतोऽस्थ्नांच बलकृत्स्नेहने हितम्" ॥ १७ ॥

एवं पित्तानिलहरं घृतं, श्लेष्मावर्धकत्वे सति मारुतघ्नं तैलम्। विद्धभग्नाहतादिषु पौरुषत्वापादिका प्रायस्त्रिदोषानुरोधेन बलवर्धनी बृंहणात्मिका वसा। बलशुक्ररसश्लेष्मादिवर्धनगुणवान् मज्जा। एवं स्नेहचतुष्टयमपि वातपित्तश्लेष्मविकृतिहरशमनबृंहणादिगुणवद् इति द्रव्यगुणविदां विश्वजनीनानामपि भिषजां प्रसिद्धतममेव। अमुकस्मिन् व्याधौ घृतमेव योज्यम्—अमुकस्मिंश्च तैलं, केषुचिच्च वसामज्जानौ "कोडलीवर—ओइलाख्यौ" इति नियमः कथं सिद्धयेद्, यदि दोषप्रत्यनीकतया तेषामुपयोगो न स्यात्—तस्मादातुरेषु व्यवह्रियमाणं स्नेहचतुष्टयं शरीरारम्भकाणां दोषसंज्ञां लभमानानां वातपित्तश्लेष्मणाम—विरोधेनैव महर्षिवचनोपदेशात् तत्तद्दोषहरं शमनगुणात्मकं वोपलभामहे ॥ अतः विकृतिहरगुणवद्द्रव्योपयोगेन महर्षिसंमताः चिकित्साविषयाः वातपित्तश्लेष्माण एव धातुत्वेन दोषत्वेन वा, स्वीक्रियताम् इत्यस्माकमाग्रहः। तथा च कालविशेषापेक्षो दोषविशेषापेक्षश्च स्नेहपानक्रमोऽप्युपदिष्टः—

सर्पिः शरदि पातव्यं वसा मज्जा च माधवे ।
तैलं प्रावृषि नात्युष्णशीते स्नेहं पिबेन्नरः ॥ १८ ॥
वातपित्ताधिको रात्रा वुष्णो चापि पिबेन्नरः ।
श्लेष्माधिको दिवा शीते पिबेच्चामलभास्करे ॥ १९ ॥
च-स-सू-स्था- अ० १३ ॥

एषा व्यवस्था दोषापेक्षिण्येवेति युक्तमुपपश्यामः, तेन स्नेहनात्मकोऽप्युपक्रमः षड्विधचिकित्साङ्गभूतः दोषापेक्ष एवेति आप्तवचनात् प्रत्यक्षोपलम्भाच्च सिद्धं भवति । घृतपानार्हा अपि दोषापेक्षयैव निर्दिष्टाः,—" वातपित्तप्रकृतयो वातपित्तविकारिणः । चक्षुः कामाः क्षताः क्षीणाः वृद्धा बालास्तथाऽबलाः ॥ ४१ ॥ आयुः प्रकर्षकामाश्च बलवर्णस्वरार्थिनः । पुष्टिकामाः प्रजाकामाः सौकुमार्यार्थिन श्चये ॥ ४२ ॥ दीप्त्योजःस्मृतिमेधाग्नि बुद्धीन्द्रियबलार्थिनः । पिबेयुः सर्पिरार्ताश्च दाहशस्त्रविषाग्निभिः ॥ ४३ ॥ एवं स्नेहनचिकित्साङ्गं घृतपानमपि दोषापेक्षमिति सिद्धं भवति ॥ एवं तैलवसामज्जामधिकारिणः अधिकक्षीणदोषदूष्या एव प्रतिपादिताः, एतेन स्नेहनोपक्रमेऽपि दोषभेदगणनाऽऽवश्यकीति प्रतीतिरेव सर्वविधानां चिकित्सकानाम् । एवं स्तम्भनात्मकोऽप्युपक्रमः वातादिदोषापेक्षः । स्तम्भनगुणानि द्रव्याणि तावत् " द्रवं तनु सरं यावच्छीतीकरणमौषधम् । स्वादु तिक्तं कषायं च स्तम्भनं सर्वमेव तत् " इति रसगुणप्रधानात्मकं स्तम्भनं प्रतिपाद्य स्तम्भनीयास्तावत् प्रतिपादिताः—

पित्तक्षाराग्निदग्धा ये वम्यतिसारपीडिताः ।
विषस्वेदातियोगार्ताः स्तम्भनीयास्तथाविधाः ॥
वातमूत्रपुरीषाणां विसर्गे गात्रलाघवे ॥ २४ ॥

च. सं. सू. स्था. अ० २२ ॥

" स्तम्भनं स्तम्भयति यद्गतिमन्तं चलं ध्रुवम् । लघूष्णातीक्ष्ण-विशदं रूक्षं सूक्ष्मं खरं स्मृतम् ॥ १२ ॥ इति स्तम्भनगुणोक्तेः, स्तम्भनद्रव्यस्य च लघूष्णातीक्ष्णविशदत्वात् रूक्षत्वात् सूक्ष्मत्वात् खरत्वाच्च गतिमतीं वातविकृतिं, चलात्मिकां पित्तविकृतिं च स्तम्भयति यत् वत्सकटुण्टुकादीति प्रसिद्धमेव । तथा च तथाविधा अपि व्याधिग्रस्ताः वातमूत्रपुरीषाणां विसर्गे सति गात्रलाघवे च सति स्तम्भनीया भवन्ति वम्यतिसारपीडिताः पित्तक्षाराग्निदग्धादयश्चेति युक्तिमुपपश्यामः । एवं षड्विधेऽप्युपक्रमे वातादिदोषभेदगणना वरीवर्तीति महर्षिसिद्धान्तः प्रत्यक्षगुणोपलम्भादेव फलितो भवति । एवमुपक्रमाणामपि षण्णां दोषसाङ्कर्येण बहुविधत्वं भवति तथा चोक्तम्—

दोषाणां बहुसंसर्गात् सङ्कीर्यन्ते ह्युपक्रमाः ।
षट्त्वं नातिवर्तन्ते त्रित्वं वातादयो यथा ॥ ४३ ॥

च. सं. सू. स्था. अ० २२ ॥

एवं महर्षिवचनोपदेशेन विधिनिषेधात्मकेन वातपित्तश्लेष्माणः अस्य स्थूलस्य धातवः दोषाः मलसंज्ञकाश्च स्युः तत्र विधिस्तावत् अपूर्वोच्चारणं विधिः, महर्षेयश्च सुखमयजीवनोपलब्धेः ऋतुदेश-

प्रकृतिसात्म्यविभागेन "इदमाचरितव्यम्" इति ह्युपदिशन्ति। अनर्थप्राप्तिनिवारणाय च निषेधन्ते, इदं नाचरितव्यमिति, स्वस्थवृत्तौ, निवृत्तसन्तापीये च बहूनि वचनानि विधिनिषेधात्मकान्युपलभ्यन्ते। तथा च रसविमाने—

तत्र खल्विमानि अष्टौ आहारविधिविशेषायतनानि भवन्ति। तद्यथा——प्रकृतिकरणसंयोगराशिदेशकालोपयोगसंस्थोपयोक्त्रष्टमानि भवन्ति ॥ २१ ॥ इत्थं प्रकृत्यादीना मष्टानां पृथक् पृथग्लक्षणानि व्याख्याय——

एषां विशेषाः शुभाशुभफलाः परस्परोपकारका भवन्ति, तान् बुभुत्सेत। बुद्ध्वा च हितेप्सुरेव स्यात्, न च मोहात् प्रमादाद्वा प्रियमहितम्–असुखोदर्कं उपसेव्यमाहारजातमन्यद्वा ॥ १४ ॥ अस्मिन् सूत्रे विधिनिषेधौ द्वावपि दर्शितौ "बुद्ध्वा च हितेप्सुरेवस्यात्" इति विधिः, को हि विजानाति केषु–आहारविहारेषु–हितं हितायुरुपलब्धिसाधनं वा" इति। अतः महर्षिप्रतिज्ञातानां प्रकृत्याद्यष्टानां विशेषबोधे एव प्रवर्तितव्यमिति–अपूर्वोचार्यमाणत्वात् एतान्युपदेशवाक्यानि विधिमुखानीति प्रतीयन्ते। एवं "न च मोहात् प्रमादाद्वा प्रियमहितमसुखोदर्कं उपसेव्यमानमाहारजातमन्यद्वा" इति निषेधात्–'न नक्तं दधि भुञ्जीत' इत्यादीनि वाक्यानि निषेधमुखानीति 'इत्थं नाचरितव्यमिति' निषेधः प्रतिपादितः ॥ अनेन प्रकारेण त्रिदोषसिद्धान्तप्रतिपादकौ विधिनिषेधौ वर्ण्येते। तथा च—

तत्रेदमाहारविधिविधानम्—अरोगाणामातुराणामपि केषांचित् काले प्रकृत्यैव हिततमं भुञ्जानानां भवति ॥ ३५ ॥ विधिमुखानि वाक्यानि तावत्।

उष्णं स्निग्धं मात्रावज्जीर्णे वीर्याविरुद्धम् इष्टे देशे इष्टसर्वोपकरणं नातिद्रुतं नातिविलम्बितम् , अजल्पन्-अहसन् तन्मना भुञ्जीतात्मानमभिसमीक्ष्य सम्यक् ॥ ३६ ॥ फलश्रुतिरिव भोजनविधे गुणान् वर्णयति—

" तस्य साद्गुण्यमुपदेक्ष्यामः—उष्णमश्नीयात् । उष्णं हि भुज्यमानं स्वदते, भुक्तं चाग्निमुदर्यमुदीरयति, क्षिप्रं जरां गच्छति, वातं चानुलोमयति, श्लेष्माणं च परिह्रासयति । तस्मादुष्णमश्नीयात् ॥ ३७ ॥

वातमूत्रपुरीषाणां विबन्धो न भवेत , श्लेष्मा च ह्रासितः स्यादिति स्वस्थवृत्तावावश्यकम । तथा चानेन भोजनविधिना वातानुलोमनश्लेष्मपरिह्रासपूर्वकेण भवितव्यं स्वास्थ्यं परिरक्षता मनुजेनेति प्रतिपादितं भवति, एवं " स्निग्धमश्नीयात् , मात्रावदश्नीयात , जीर्णेऽश्नीयात् वीर्याविरुद्धमश्नीयात् , इष्टे देशे अश्नीयात, नातिद्रुतं नातिविलम्बितम् अजल्पन् अहसन्—आत्मानमभिसमीक्ष्य भुञ्जीतेति सर्वाण्यपि वचनानि—स्वास्थ्यमूलकवातपित्तश्लेष्मसाम्यसंरक्षणायैव प्रतिपादितानि ।

तथा च त्रिविधकुक्षीयेऽपि विमाने—विधिमुखानि वातपित्तश्लेष्माख्यदोषत्रयप्रतिपादकानि वाक्यानि—

त्रिविधं कुक्षौ स्थापयेदवकाशांशमाहारस्याहारमुपयुञ्जानः, तद्यथैकमवकाशांशं मूर्तानामाहारविकाराणामेकं द्रवाणामेकं पुनर्वातपित्तश्लेष्मणाम् । एतावतीं ह्याहारमात्रामुपयुञ्जानो नामात्राहारजं किंचिदशुभं प्राप्नोति ॥ ३ ॥ अस्मिन् सूत्रे वातपित्तश्लेष्मणां संचाराय एकमवकाशांशं स्थापयेदिति विधिः, एतद्विधस्य विधेः परित्यागात् अजीर्णविषूचिकालसकादयो बाधन्ते एवेति प्रत्यक्षं पश्यामः, तस्मादार्षवचनोक्ताः वातपित्तश्लेष्माणः स्वसंचाराय कुक्षौ एकमवकाशांशमपेक्षन्ते एवेति सार्वजनीनोऽनुभवः, तस्मादार्षवचनोक्ताः शरीरस्तम्भभूताः वातपित्तश्लेष्माण एव स्वीक्रियन्ताम् । नात्र विवादास्पदलेशोऽपि । तथा च "हिताशीस्यान् मिताशी स्यात् कालभोजी जितेन्द्रियः । पश्यन् विविधान् रोगान् बुद्धिमान् विषमाशनात् ॥ इति स्वास्थ्यपरं विधिवाक्यं त्रिदोष प्रकोपभयमेव दर्शयति । तथा चाजीर्णभोजिनोऽमात्रया च आहारजातं व्यवहरन् दोषप्रकोपात् द्विविधमामप्रदोषं लभते, तच्च द्वैविध्यं विसूचिकालसकभेदेन प्रसिद्धमायुर्वेदे । तत्र विसूचिकामूर्ध्वं चाधश्च प्रवृत्तामदोषां यथोक्तरूपां विद्यात् । अलसकमपि दुर्बलस्याल्पाग्नेर्बहुश्लेष्मणो वातमूत्रपुरीषवेगविधारिणः स्थिरगुरुबहुरूक्षशीतशुष्कान्नसेविन स्तदन्नपानं अनिलप्रपीडितं श्लेष्मणा च विबद्धमार्गमतिमात्रप्रलीनमलसत्वान्न बहिर्मुखी भवति, ततश्छर्द्यतीसारवर्जान्यामप्रदोषलिङ्गानि यथोक्तान्यभिदर्शयत्यतिमात्राणि ॥ १४ ॥ अस्मिन् सूत्रे अलसकवर्णने " अल्पाग्नेः बहुश्लेष्मणः, वातादिवेगविधारिणः, अनिलप्रपीडितं श्लेष्मणा च विबद्धमार्गमन्नपानं

आमदोषसंसृष्टं सद् अलसीभवतीत्युपदिष्टं, तदेतदलसीकरणं वातश्लेष्मकृतक्रियाविशेषैरेव सिद्ध्यति, तस्मादलसिकाख्ये व्याधौ आमदोषरोद्धारौ कौ ? इति प्रश्ने किं वक्तव्यं, तस्मादार्षवचनेन विकृत्युत्पादका वातपित्तश्लेष्माण एव स्वीक्रियन्ताम् । इति संक्षेपेण विधिपालनविधित्यागफलवर्णनं वातपित्तश्लेष्माख्यदोषाणां साम्यतासिद्ध्यर्थं प्रतिफलति ।

निषेधमुखेन तु वातपित्तश्लेष्मप्रतिपादनं 'नवेगान् धारणीयेऽध्याये' समादिष्टम्—तथा च——

"न वेगान् धारयेद्धीमान् जातान् मूत्रपुरीषयोः ।
न रेतसो न वातस्य न छर्द्याः क्षवथो र्न च ॥ ३ ॥
नोद्गारस्य न जृम्भाया न वेगान् क्षुत्पिपासयोः ।
न बाष्पस्य न निद्राया निश्वासस्य श्रमेण च ॥४॥

मूत्रपुरीषादिवेगान् प्रसह्य धारयतः बस्तिमेहनशूलकृच्छ्रादयो भवन्ति । एतेषां वेगविधारणाद्वाताख्यदोषप्रकोपाद् उपरिनिर्दिष्टा व्याधयो भवन्ति, यदि नाम वाताख्यो दोषो नैव स्वीकर्तव्य श्चेत् वेगविधारणात् पुनः कस्य प्रकोपे एतेषां व्याधीनामुद्भवः संभाव्येत, तस्मादार्षवचनोक्तो वाताख्यदोष एव स्वीक्रियताम् । एवं वंशकरीरादि विदाहकरद्रव्यभक्षणे पित्तप्रकोपः, गुरुमधुररसाम्लादीनां प्रमाणाधिकभक्षणे च श्लेष्मप्रकोपः ॥ तथा च 'आत्रेयभद्रकाप्यीये'——

"नेति भगवानात्रेयः——सर्वानेव मत्स्यान् न पयसा अभ्य-

वहरेद्विशेषतस्तु चिलिचिमम्, स हि महाभिष्यन्दितमत्वात्, स्थूललक्षणतरानेतान् व्याधीनुपपजनयति—आमविषमुदीरयति चेति । ग्राम्यानूपौदकपिशितानि च मधुतिलगुडपयोमाषमूलकबिसै विरूढधान्यैश्च नैकधाऽद्यात्, तन्मूलं च बाधिर्यान्ध्यवेपथुजाड्यकलमूकतामेणिमण्यमथवा मरणमाप्नोति । न पौष्करं रोहिणीकं वा शाकं न कपोतान् न सार्षपतैलभ्रष्टान् मधुपयोभ्यां सहाभ्यवहरेत् । तन्मूलं हि शोणिताभिष्यन्दधमनीप्रविचयापस्मारशंखकगलगण्डरोहिणीकाना मन्यतमं प्राप्नोति, अथवा मरणमिति । न मूलकलशुनकृष्णगन्धीर्जकसुमुखसुरसादिभिः पयः सेव्यं कुष्ठाबाधभयात् । न जातु शाकं न निकुचं पक्वं मधुपयोभ्यां सहोपयोज्यम्, एतद्धि मरणायाथवा बलवर्णतेजोवीर्योपरोधाय अलघु व्याधये षाण्ढ्याय चेति । तदेव निकुचपक्वं न माषसूपगुडसर्पिभिः सहोपयोज्यं वैरोधिकत्वात् । तथाम्लाम्रातकमातुलुङ्ग निकुच करमर्दमोचदन्तशठबदरकोशाम्रभव्यजाम्बवकपित्थतिन्तिडीक पारावताक्षोडपनसनालिकेरदाडिमामलकान्येवंप्रकाराणि चान्यानि द्रव्याणि सर्वं चाम्लं द्रवमद्रवं च पयसासह विरुद्धम् । तथा कङ्गु वनकमकुष्ठककुलत्थमाषनिष्पावाः पयसा सह विरुद्धाः । पद्मोत्तरिकाशाकं शार्करो मैरेयो मधु च सहोपयुक्तं विरुद्धं वातं चातिकोपयति । हारिद्रकः सर्षपतैलभृष्टो विरुद्धः पित्तं चातिकोपयति । पायसो मन्थानुपानो विरुद्धः श्लेष्माणं चातिकोपयति । उपोदिका तिलकल्कसिद्धा हेतुरतीसारस्य । बलाका वारुण्या सह कुल्माषैरपि विरुद्धा, सैव शूकरवसापरिभृष्टा सद्यो व्या-

पादयति । मयूरमांसमेरण्डसीसकावसक्तमेरण्डाग्निप्लुष्टं एरण्ड तैलयुक्तं सद्यो व्यापादयति । हारिद्रकमांसं हारिद्रसीसकावसक्तं हारिद्राग्निप्लुष्टं सद्यो व्यापादयति । तदेव भस्मपांशुपरिध्वस्तं सक्षौद्रं मरणाय । मत्स्यनिस्तालनसिद्धाः पिप्पल्यस्तथा काकमाची मधु च मरणाय, मधु चोष्णं उष्णार्तस्य मधु मरणाय । मधुसर्पिषी समधृते, मधु वारि चान्तरिक्षं समधृतं, मधुपुष्करबीजं, मधु पीत्वा-उष्णोदकं, भल्लातकोष्णोदकं, तक्रसिद्धः कंपिल्लकः, पर्युषिता काकमाची, अङ्गारशूल्यो भासश्चेति विरुद्धानीत्येतद्यथाप्रश्नमभि-निर्दिष्टं भवतीति ॥ ८६ ॥ च. सं. सू. स्था. अ० २६ ॥

अस्मिन् सूत्रे पद्मोत्तरिकाशाकं वातातिकोपनं, सर्षपतैलभृष्टो हारिद्रकः पित्तातिकोपनः, मस्तुानुपानो पायसो श्लेष्मातिकोपनः । एवमन्ये विरुद्धा भावाः कुष्ठादिमहारोगान् सद्योमरणं वा आपा-दयन्तः सर्वदेशीयैरपि अधिगन्तव्या अनुमन्तव्याश्च स्युः । ‘पद्मो-त्तरिकाशाकादि यदि महतीं विकृतिं जनयति’ इत्यधिगन्तव्यं चेत् तर्हि तस्या महत्या विकृतेरुत्पादकः क? इति पृष्टे दक्षतर-चिकित्सकाः किं ब्रूयुः, तस्मादार्षवचनोक्तो वाताख्यः पञ्चधा विभक्तः सकलशरीरव्यापी दोष एव, स्वीक्रियताम्, अस्य स्वीकारे न काचन क्षतिः। एवं सर्षपतैलभृष्टहारिद्रकपक्षिविशेषभक्षणे ये ओषचोषादयः संभवन्ति, तेषामोषचोषादीनामुत्पादकं किम्? इति पृष्टे भो दक्षतरचिकित्सका भवन्तः किं ब्रूथ? यदि विदाहौष-चोषादिजनकं किमपि स्वीकर्तव्यञ्चेत् तर्हि पञ्चधा विभक्तं विशेषेण

त्र अग्न्याशये विद्यमानं पित्तमेव स्वीक्रियतां नान्या गतिः ।, पार्यसस्तु भारतीयैर्दत्ततैश्च बहुधा व्यवह्रियते एव, तैश्च पायसभक्त-णोत्तरं कृतमन्थानुपानाः आमदोषविसूचिकाग्रस्ता बहव आतुरा दृष्टिगोचराः कृताः स्युः, यदि नाम पायसोत्तरमन्थानुपानात् विकृतिं दृष्ट्वा विकृत्युत्पादकोऽस्मिन् व्याधौ कः ? इत्यनुमानेनापि हेतु र्नो-पलब्धश्चेत्तर्हि तत्र आर्षवचनसंमतः श्लेष्माख्यदोष एव स्वीक्रियताम्, अस्यामेव विकृत्युत्पादकदोषाणामंशांशकल्पनायां भवन्तो जितहस्ताः प्राणाभिसराश्च स्युः, साध्यश्चेद्व्याधिस्तर्हि सुखायुषः प्रदातारः स्युः ॥ एवं विधिनिषेधमुखानि तावदार्षवचनानि, सुश्रुतचिकित्सा-स्थानीयेऽनागताबाधप्रतिषेधनीये प्रतिपादितानि, दन्तधावनविधे-रारभ्य भोजनव्यायामविधिवर्णनरूपाणि रात्रौ शयनपर्यन्तानि । तद्वर्णितविध्यनुसारेण वर्तमानः वातपित्तश्लेष्मणां साम्यं संपाद्य मनुष्यः स्वस्थः सन् सुखं जीवति, इति सुखायुषो भोक्तृत्वं वात-पित्तश्लेष्मणां प्रकृतिस्थानां रक्षणेनैव संपद्यते, इति समग्रस्यायु-र्वेदस्य सिद्धान्तः । निषिद्धाचरणाच्च ऐहिकं पारलौकिकञ्च सुखं सुखकरसाधनभूतं वा आत्मसंस्कारविशेषं धर्ममनायासेन त्यजति । अतएव ' न ब्राह्मणो हन्तव्य ' इतिवत् न निषिद्धमाचरणीयम् ' इति प्रदर्शनार्थं कानिचित् सौश्रुतवचनानि उद्ध्रियन्ते । " तत्रादित एव नीचनखरोम्णा शुचिना शुक्लवाससा लघूष्णीषच्छत्रोपानत्केन-दण्डपाणिना काले हितमितमधुरपूर्वाभिभाषिणा बन्धुभूतेन भूतानां गुरुवृद्धानुमतेन सुसहायेनानन्यमनसा खलूपचरितव्यम् , तदपि न रात्रौ, न केशास्थिकण्टकाश्मतुषभस्मोत्करकपालाङ्गारामेध्यस्नान-

बलिभूमिषु, न विषमेन्द्रकीलचतुष्पथश्वभ्राणामुपरिष्टात् ॥ ८९ ॥

न रागद्विष्टपरुषपैशुन्यानृतानि वदेत्, न देवब्राह्मणपितृपरिवादांश्च, न नरेन्द्रद्विष्टोन्मत्तपतितक्षुद्रनीचान्नारानुपासीत ॥९०॥

वृक्षपर्वतप्रपातविषमवल्मीकदुष्टवाजिकुञ्जराद्यधिरोहणानि परिहरेत्, पूर्णनदीसमुद्राविदितपल्वलश्वभ्रकूपावतरणानि, भिन्नशून्यागारश्मशानविजनारण्यवासाग्निसंभ्रमव्यालभुजङ्गकीटसेवांश्च, ग्रामाघातकलहशस्त्रसनिपातव्यालसरीसृपशृङ्गिसन्निकर्षांश्च ॥ ९१ ॥

नाग्निगोगुरुब्राह्मणप्रेङ्खादम्पत्यन्तरेणाभियायात्। न शवमनुयायात्। देवगोब्राह्मणचैत्यध्वजरोगिपतितपापकारिणां च छायां नाक्रमेत। नास्तं गच्छन्तमुद्यन्तं वाऽऽदित्यं वीक्षेत। गां धापयन्तीं धयन्तीं परशस्यं वा चरन्तीं परस्मै न कस्मैचिदाचक्षीत, न चोल्कापातेन्द्रधनूंषि। नाग्निं मुखेनोपधमेत्। नापो भूमिं वा पाणिपादेनाभिहन्यात् ॥ ९२ ॥

न वेगान् धारयेत्। न बहिर्वेगान् ग्रामनगरदेवतायतनश्मशानचतुष्पथसलिलाशयपथिसन्निकृष्टानुत्सृजेन्न प्रकाशं न वाय्वग्निसलिलसोमार्कगोगुरुप्रतिमुखम् ॥ ९३ ॥

न भूमिं विलिखेत्, नासंवृतमुखः सदसि जृम्भोद्गारश्वासक्षवथूनुत्सृजेत्, न पर्यङ्किकावष्टम्भपादप्रसारणानि गुरुसन्निधौ कुर्यात् ॥ ९४ ॥

न बालकर्ण नासास्रोतोदशनविवराण्यभिकुष्णीयात्, न वीजयेत् केशमुखनखवस्त्रगात्राणि, न गात्रनखवक्त्रं वादित्रं कुर्यात्, न काष्ठलोष्ठतृणादीनभिहन्याद् भिन्द्याद्वा ॥ ९५ ॥

न प्रतिवातातपं सेवेत, न भुक्तमात्रोऽग्निमुपासीत, नोत्कटकालपकाष्ठासनमध्यासीत, न ग्रीवां विषमं धारयेत्, न विषमकायः क्रियां भजेत भुञ्जीत वा, न प्रततं (विस्फारिताक्षं) ईक्षेत विशेषाज्ज्योतिर्भास्करसूक्ष्मचलभ्रान्तानि, न भारं शिरसा वहेत्, न स्वप्नजागरणशयनासनस्थानचङ्क्रमणयानवाहनप्रधावनलङ्घनप्लवनप्रतरणहास्यभाष्यव्यवायव्यायामादीनुचितानप्यति सेवेत ॥ ९६ ॥

उचितादप्यहितात् क्रमशो विरमेत्, हितमनुचितमप्यासेवेतक्रमशो न चैकान्ततः पादहीनात् ॥ ९७ ॥

नावाक्शिराः शयीत, न भिन्नपात्रे भुञ्जीत, न विनापात्रेण, नाञ्जलिपुटेनापः पिबेत्, काले हितमितस्निग्धमधुरप्रायमाहारं वैद्यप्रत्यवेक्षितमश्नीयात, ग्रामगणगणिकापणिक–शत्रुसत्रशठपतितभोजनानि परिहरेत्, शेषाण्यपि चानिष्टरूपरसगन्धस्पर्शशब्दमानसानि, अन्यान्येवंगुणान्यपि वा संभूय दत्तानि, मक्षिकाबालोहपतानि नाप्रक्षालितपादो भुञ्जीत, न मूत्रोच्चारपीडितो न सन्ध्ययो नानुपाश्रितो नातीतकालं हीनमतिमात्रं चेति ॥ ९८ ॥

न भुञ्जीतोद्धृतस्नेहं नष्टं पर्युषितं पयः ।
नात्मानमुदके पश्येन्न नग्नः प्रविशेज्जलम् ॥ ९९ ॥

न नक्तं दधि भुञ्जीत न चाप्यघृतशर्करम् ।
नामुद्गयूषं नाक्षौद्रं नोष्णां नामलकै र्विना ॥
अन्यथा न ज़येत् कुष्ठविसर्पादीन् गदान् बहून् ॥ १० ॥

घृतमद्यातिसेवाप्रतिभूसाक्षित्वसमाह्वानगोष्ठीवादित्राणि न सेवेत, स्रजं छत्रोपानहौ कनकमतीतवासांसि न. चान्यै र्धृतानि धारयेत, ब्राह्मणमग्निं गां.च नोच्छिष्टः स्पृशेत् ॥ १०१ ॥ एवं "यस्मिन् यस्मिन्नृतौ ये ये दोषाः कुप्यन्ति देहिनाम् । तेषु तेषु प्रदातव्या रसास्ते ते विजानता ॥ १०२ ॥ वर्षासु न पिबेत्तोयं पिबेच्छरदि मात्रया । वर्षासु चतुरो मासान् मात्रावदुदकं पिबेत् ॥ १०३ ॥ उष्णं हेमे वसन्ते च कामं ग्रीष्मे तु शीतलम् । हेमन्ते च वसन्ते च सीध्वरिष्टौ पिबेन्नरः ॥ १०४ ॥ शृतशीतं पिबेद्ग्रीष्मे प्रावृट्काले रसं पिबेत् । यूषं वर्षति, तस्यान्ते प्रपिबेच्छीतलं जलम् ॥ १०५ ॥

एवमेतानि निषेधमयानि वाक्यानि गुणविकृतिपरत्वेन दोषविकृतिपरत्वेन वा समदोषस्वरूपस्य आत्मेन्द्रियमनसां प्रसन्नतारूपस्य.च स्वास्थ्यस्य विघातकराणीति द्योतितं, तस्मात् पुरुषार्थचतुष्टयसाधनभूतस्वास्थ्यपरिपालनाय विहितानि विधिवाक्यान्यनुस्मरन् निषिद्धांश्च भावान् परित्यजन् उभयलोकयो र्हितमश्नुते, तानि च विधिनिषेधवाक्यानि वातपित्तश्लेष्माख्यानां दोषाणां सत्त्वरजस्तमसां च गुणानां साम्यताप्रतिपादनपराणीति आप्तवाक्योपदेशात् सिद्धं भवति ।

एवमाहारपरिणामकरा ये " ऊष्मा–वायुः क्लेदः स्नेहः कालः समयोगश्चेति " षड्भावाः प्रत्यक्षखण्डे प्रतिपादिता स्तेषां भावानां इमे कर्मविशेषा भवन्ति । तद्यथा–ऊष्मा पचति, वायुरपकर्षति, क्लेदः शैथिल्यमापादयति, स्नेहो मार्दवं जनयति, कालः पर्याप्तिमभिनिर्वर्तयति, समयोगस्त्वेषां परिणामधातुसाम्यकरः सम्पद्यते ॥ १९ ॥ अस्मिन् सूत्रे पचनकर्मणा ऊष्मधर्मणाश्च पित्तस्य, अपकर्षणकर्मात्मकस्य च वातस्य, शिथिलीभावसंपादकस्य क्लेदनधर्मणाश्च श्लेष्मणः, एवं पित्तवातश्लेष्मणामेव धातुसंज्ञां दोषसंज्ञां वा-लभमानानां पांचभौतिकानां शारीरभावानामेव प्रधानतया स्वीकारः, इतरे त्र आहारपरिणामकरा स्नेहकालसमयोगाख्या भावा गौणा इति महर्षिवचनेभ्यः प्रत्यक्षोपलम्भाच्च सिद्धं भवति । इत्थं " वात पित्तश्लेष्माणः पाञ्चभौतिकाः शारीरदोषाः " साक्षादाप्तोपदेशाद् अथर्ववेदसूक्तैः यजुर्वेदीयमन्त्रैः स्वतःप्रमाणवद्भिश्च वाक्यैः सिद्धा भवन्ति । विस्तरस्तु " कायचिकित्सा, शल्य शालाक्य भूतविद्या कौमारभृत्य, अगदतन्त्र, रसायन, वाजीकरणाख्येषु अष्टसु आयुर्वेदाङ्गेषु प्रतिपादितः । स्थूलशरीरस्यास्य वातपित्तश्लेष्माण एव प्रतिपादकाः, तदेतत् " वातपित्तश्लेष्माण एव देहसंभवहेतवः तैरेवाव्यापन्नैरधोमध्योर्ध्वसन्निविष्टैः शरीरमिदं धार्यते, अगार मिवस्थूणाभिस्तिसृभिः, अतश्च त्रिस्थूणमाहुरेके " तथा च " दोषधातुमलमूलं हि शरीरम् " इत्यादि सुश्रुतसूत्रस्थानीयै र्वचनैः प्रत्यक्षखण्डे प्रतिपादितम् ॥ तथा चानुमानखण्डे " सर्वा-

यपि पार्थिवशरीराणि त्रिदोषारब्धानि, सर्वेऽपि रोगाः त्रिदोषविकृतिजन्याः त्रिविधाभिश्च चिकित्साभिः वातपित्तश्लेष्माण एव चिकित्सितव्यतया प्रतिपादिताः । इत्यादि सद्धेतुकैरनुमानैरनुमितं, शब्दखण्डे चास्मिन् आप्तवाक्योपदेशरूपै महर्षिवचनैः समर्थितम् । " शारीरदोषास्त्रयो वातपित्तश्लेष्माणः, द्वौ च मानसौ दोषौ " इति चरकवचनैरपि प्रमाणितं । एतेन अस्मदादिशरीराणि यथा पाञ्चभौतिकानि तथा शरीरारम्भकाः वातपित्तश्लेष्माणोऽपि दोषसंज्ञकाः पाञ्चभौतिकाः वैषम्येण च व्याध्युत्पादकाः निधनोत्पादकाश्च भवन्तीति सिद्धम् इत्थं " धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टयी " वातपित्तश्लेष्मणां स्वरूपज्ञानजन्यारोग्यलाभे एव सिद्ध्यति " इति सिद्धं भवति " तदनन्यत्वमारम्भणशब्दादिभ्यः, भावे चोपलब्धेः " ब्र-सू-अ-२-पा-२-सू-१४ " इत्यत्र भगवत्पूज्यपादैः ब्रह्मणो यद्व्यतिरिक्तं तद्ब्रह्मानन्यत्वं वाचारम्भणं विकारो नामधेयं मृत्तिकेव सत्यमितिवत् निखिलस्यापि स्थूलजातस्य वातपित्तश्लेष्मानन्यत्वं युक्तमुपपश्यामः । तथा च भिषजां ज्ञानार्थं कानिचित् प्रकरणानि प्रतिपादितानि, तेषु दशविधेष्वपि वातपित्तश्लेष्मणां व्याधिजनकत्वं सिद्धमेव । तानि यथा " इमानि खलु तावदिह कानिचित् प्रकरणानि ब्रूमो भिषजां ज्ञानार्थम्, ज्ञानपूर्वकं कर्मणां समारम्भं प्रशंसन्ति कुशलाः । ज्ञात्वा हि " कारणकरणकार्ययोनिकार्यकार्यफलानुबंधदेशकालप्रवृत्त्युपायान् सम्यगभिनिवर्तमानः कार्याभिनिवृत्ताविष्टफलानुबन्धं कार्यमभिनिर्वर्तयत्यनतिमहता प्रयत्नेन कर्त्ता ॥ वि. स्था. अ. ८. सू. ८. ॥

एषु दशविधेषु कार्यफलप्रवृत्ती, उच्येते—तत्र दोषाणां वातपित्त-श्लेष्मणां विकृतानां साम्यं प्रयोजनरूपं कार्यफलं दोषाणां प्रकृतिस्थापनमेव द्योतयति, प्रवृत्तिस्तु पुनः आरोग्यसंपादनरूपकार्यार्था, साऽपि क्रियाविशेषेण, कर्मविशेषेण यत्नविशेषेण कार्यसमारंभभेदेन च साधनीया भवति, अत एते क्रिया—कर्म यत्नकार्यसमारंभविशेषाश्च दोषतद्भेदान् दोषजन्यविकृतींश्च लक्षयीकृत्यैव साधनीयाः स्यु रितिशब्दखण्डे सिद्धान्तितम् । एवं चिकित्सास्थलेषु प्रायो वातपित्तश्लेष्मणामेव तारतम्येन भेदाः स्वीकृताः,

तथाच—" अत उर्ध्वं कफे मन्दे वातपित्तोत्तरे ज्वरे । परिपक्वेषु दोषेषु सर्पिष्पानंयथाऽमृतम् " इति जीर्णविषमज्वरादिषु दोषगणनापेक्षयैव सर्पिष्पानचिकित्सा विहिता अतः निदानचिकित्सयो दोषाणां भेदा एव नियता इति सिद्धम् ॥

हरिः ॐ तत्सत् श्री धन्वन्तरये नमः

" आयुर्वेदीयोपनिषत् ॥ "

" खाद्यश्चेतनाषष्ठा धातवः पुरुषः स्मृतः । चेतनाधातुरप्येकः स्मृतः पुरुषसंज्ञकः ॥ १ ॥ नेन्द्रियाणि न चैवार्थाः सुखदुःखस्य हेतवः । हेतुस्तु सुखदुःखस्य योगो दृष्टश्चतुर्विधः ॥ २ ॥ सन्तीन्द्रियाणि सन्त्यर्था योगो न च नास्ति रुक् । न सुखं कारणं तस्मा योग एव चतुर्विधः ॥ ३ ॥ नात्मेन्द्रियमनोबुद्धिगोचरं कर्म वा विना । सुखदुःखं यथा यत्तु बोद्धव्यं तत्तथोच्यते ॥ ४ ॥ स्पर्शनेन्द्रियसंस्पर्शः स्पर्शो मानस एव च । द्विविधः सुखदुःखानां वेदनानां प्रवर्तकः ॥ ५ ॥ इच्छाद्वेषात्मिका तृष्णा सुखदुःखात्प्रवर्तते तृष्णा च सुखदुःखानां कारणं पुनरुच्यते ॥ ६ ॥ उपादत्ते हि सा भावान् वेदनाश्रयसंज्ञकान् । स्पृश्यते नानुपादाने नास्पृष्टो वेत्ति वेदनाः ॥ ७ ॥ वेदनानामधिष्ठानं मनो देहश्च सेन्द्रियः । केशलोमनखाग्रान्नमलद्रवगुणैः विना ॥ ८ ॥ योगो मोक्षे च सर्वासां वेदनानामवर्तनम् । मोक्षे निवृत्ति र्निःशेषा योगो मोक्षप्रवर्तकः ॥ ९ ॥ आत्मेन्द्रियमनोऽर्थानां सन्निकर्षात् प्रवर्तते । सुखदुःखमनारम्भादात्मस्थे मनसि स्थिरे ॥ १० ॥ निवर्तते तदुभयं वशित्वं चोपजायते । सशरीरस्य योगज्ञा स्तद्योगमृषयो विदुः ॥ ११ ॥ आवेशश्चेतसो ज्ञानमर्थानां छन्दतः क्रिया । दृष्टिः श्रोत्रं स्मृतिःकान्ति रिष्टतश्चाप्यदर्शनम् ॥ १२ ॥ इत्यष्ट विधमाख्यातं योगिनां बलमैश्वरम् शुद्धसत्वसमाधानात् तत्सर्वमुपजायते ॥ १३ ॥

मोक्षो रजस्तमोऽभावात् बलवत्कर्मसंक्षयात् । वियोगः कर्मसंयोगैरपुनर्भव उच्यते ॥ १४ ॥

तत्रोपायाः

सतामुपासनं सम्यगसतां परिवर्जनम् । व्रतचर्योपवासश्च नियमाश्च पृथग्विधाः ॥ १५ ॥ धारणं धर्मशास्त्राणां विज्ञानं विजने रतिः विषयेष्वरति मोक्षे व्यवसायः परा धृतिः ॥ १६ ॥ कर्मणामसमारम्भः कृतानाञ्च परिक्षयः । नैष्कर्म्यमनहंकारः संयोगे भयदर्शनम् ॥ १७॥ मनोबुद्धिसमाधानमर्थतत्त्वपरीक्षणम् । तत्त्वस्मृते रुपस्थानात् सर्वमेतत् प्रवर्तते ॥ १८ ॥ स्मृतिः सत्सेवनाद्यैश्च धृत्यन्तै रुपलभ्यते । स्मृत्वा स्वभावं भावानां स्मरन् दुःखात् प्रमुच्यते ॥ १९ ॥ वक्ष्यन्ते कारणान्यष्टौ स्मृतिर्यैरुपजायते । निमित्तरूपग्रहणात् सादृश्यात् सविपर्ययात् ॥ २० ॥ सत्त्वानुबन्धादभ्यासाज्ज्ञानयोगात् पुनः श्रुतात् । दृष्टश्रुतानुभूतानां स्मरणात् स्मृतिरुच्यते ॥ २१ ॥ एतत्तदेकमयनं मुक्तै मोक्षस्य दर्शितम् । तत्त्वस्मृतिबलं, येन गता न पुनरागताः ॥ २२ ॥ अयनं पुनराख्यातमेतद्योगस्य योगिभिः । संख्यात धर्मैः सांख्यैश्च मुक्तै मोक्षस्य चायनम् ॥२३॥ सर्वं कारणवद्दुःखमस्वं चानित्यमेव च । न चात्मकृतकं तद्धि तत्र चोत्पद्यते स्वता ॥ २४ ॥ यावन्नोत्पद्यते सत्या बुद्धि नैतदहं यथा । नैतन्मम च विज्ञाय ज्ञः सर्वमनिवर्तते ॥ २५ ॥ तस्मिंश्चरमसंन्यासे समूलाः सर्ववेदनाः । ससंज्ञाज्ञानविज्ञाना निवृत्ति यान्त्यशेषतः ॥ २६ ॥

अतः परं ब्रह्मभूतो भूतात्मा नोपलभ्यते ।
निःसृतः सर्व्वभावेभ्य श्चिह्नं यस्य न विद्यते ॥ २७ ॥
गति र्ब्रह्मविदां चात्र नाऽऽस्तज्ज्ञातुमर्हति ॥ २८ ॥

उमाचरणचित्तेन उमाचरणशर्म्मणः ।
यदुमाचरणादीप्तं तदेतद् " यादवेऽर्पितम् " ॥

हरिः ॐ तत्सत् ।

इति श्री त्रिवाडयुपांह्व निर्भयरामात्मज भानु-
शङ्करशर्म्मणा संगृहीते त्रिदोषवादे शब्दखण्डः
॥ समाप्तश्चायं ग्रन्थः ॥

आ. शु. ९ रविवासरः वि. सं. १९९१

ता. ४–८–३९

